# संस्कृतपालिभाषयोः कारकाणां विभक्तीनाञ्च तुलनात्मकमध्ययनम्

## (पाणिनीय-मोग्गल्लानव्याकरणयोस्सन्दर्भे)

## Saṃskṛtapālibhāṣayoḥ Kārakāṇāṃ Vibhaktīnāñca Tulanātmakamadhyayanam

(Pāṇinīya-Moggallānavyākaraṇayossandarbhe)

जवाहरलालनेहरूविश्वविद्यालयस्य विद्यावारिधिरित्युपाधये
प्रस्तुतश्शोधप्रबन्धः

A Thesis Submitted to
Jawaharlal Nehru University
For the award of the Degree of “DOCTOR OF PHILOSOPHY”


शोधनिर्देशकः
प्रो. सी. उपेन्द्र रावः

शोधकर्त्ता
आनन्दकुमारः



संस्कृतप्राच्यविद्याध्ययनसंस्थानम्
जवाहरलालनेहरूविश्वविद्यालयः
नवदेहली- 110067 [ भारतम् ]


2018

संस्कृत एवं प्राच्यविद्या अध्ययन संस्थान
जवाहरलाल नेहरु विश्वविद्यालय
नई दिल्ला-110067

School Of Sanskrit and Indic Studies
JAWAHALAL NEHRU UNIVERSITY
New Delhi-110067

## DECLARATION

I Anand Kumar hereby declare that this thesis entitled संस्कृतपालिभाषयोः कारकाणां विभक्तीनाञ्च तुलनात्मकमध्ययनम् (पाणिनीय-मोग्गल्लानव्याकरणयोस्सन्दर्भे) submitted in the Jawaharlal Nehru University, New Delhi, 110067, for the award of the Degree of Doctor of Philosophy, is my original work, and has not been submitted so far, in part or full for any other Degree or Diploma in any University/Institution.

(Anand Kumar)

Scanned by CamScanner

संस्कृत एवं प्राच्यविद्या अध्ययन संस्थान
जवाहरलाल नेहरु विश्वविद्यालय
नई दिल्ली-110067
School Of Sanskrit and Indic Studies
JAWAHALAL NEHRU UNIVERSITY
New Delhi-110067

# CERTIFICATE

This Thesis entitled संस्कृतपालिभाषयोः कारकाणां विभक्तीनाञ्च तुलनात्मकमध्ययनम् (पाणिनीय-मोग्गल्लानव्याकरणयोस्सन्दर्भे) submitted by Anand Kumar to Jawaharlal Nehru University, New Delhi-110067, for the award of the degree of Doctor of Philosophy, is an original work and has not been submitted so far, in part or full, for any other degree or diploma of any University. This may be placed before the examiners for evaluation and for award of the degree of Doctor of Philosophy.

Prof. Girish Nath Jha

Chairperson and Dean

Dean
School of Sanskrit & Indic Studies
Jawaharlal Nehru University
New Delhi-110067, INDIA

Prof C. Upender Rao

(Supervisor)

PROF. C. UPENDER RAO
School of Sanskrit and Indic Studies
Jawaharlal Nehru University
New Delhi-110067, INDIA

# कृतज्ञताज्ञापनम्

विभुं व्यापकं भगवन्तं शोधकार्यस्यास्य पूर्णतावसरे कृतज्ञस्सन्नहमादौ वन्दे। तदनु प्रथमां विद्यादात्रीं स्नेहमूर्त्तिम्मातरं कृपाकरञ्च पितरन्नमामि। एतच्छोधनिर्देशकमद्गुरुम् प्रो. चौडुरि उपेन्द्र राववर्य्यमहोदयं प्रणतोऽस्मि यत्कृपयाविष्टस्सन्नहम स्मिञ्छोधप्रबन्धेऽनु-सन्धातुम्प्रवृत्तोऽभवम्। गुरुवर्यस्य सौम्यत्वेन वैदग्ध्येन च अयं शोधप्रबन्धः पूर्णताङ्गत इति हार्दङ्कार्तज्ञ्यञ्ज्ञापयामि। संस्थानाध्यक्षपदासीनाय प्रो. गिरीशनाथ झामहोदयाय तत्सर्वविधसाहाय्यार्थन्नमनम् आभारञ्च प्रकटयामि। संस्थाने विद्याप्रदातॄणां सर्वेषामपि आचार्याणाम् ऋणं सुस्मार्य सादरन्नौमि।

भाषाविज्ञाने व्याकरणे च स्वश्रमसाध्यशोधानां प्रणयनेन अध्ययनसौकर्यार्थं विदुषां संशोधकानामहम् अधमर्णः अस्मि। स्वग्रन्थप्रदानेन मां सभाजितवतः विदुषः कमलेशकुमारचोकसीमहोदयस्य, काले-काले च उपयुक्तग्रन्थप्रदातुः गुरोः जयकृष्णन्महाभागस्य अपि मे महत्साहाय्यमभवदत: धन्यवादन्ददे। शोधावधौ शोधवृत्तिप्रदानार्थं विश्वविद्यालयानुदानायोगस्य अप्यहं कृतज्ञः अस्मि। संस्थानस्य कार्यालये पुस्तकालये च कर्मनिरतेभ्यः सर्वेभ्यः अपि तेषां सहयोगार्थं धन्यवादं ज्ञापयामि।

टङ्कणेन संशोधनेन शोधप्रबन्धस्य स्रष्ट्रे राकेशाय सप्रेम कार्तज्ञ्यं वितरामि। तथैव साहाय्यं विहितवत्याः पवित्रायाः सन्दीपस्य धीरेन्द्रस्य चापि अहङ्कृतज्ञोऽस्मि। शोधावधौ पारिवारिकदायित्वनिर्वाहेण मम कृते सौकर्यस्य विधायिने अनुजाय सत्येन्द्राय, प्रजावत्यै रेखायै, भ्रातृव्याय अनुवेदाय च मङ्गलङ्कामये। यानि च मित्राणि दीपा रीनू अशोकः सुभाषः दत्तात्रेय्यादीनि तदा-तदा अपि मे सहायकानि अभवन् तेभ्यः अपि अत्र साधुवादङ्कुर्वे।

आनन्दकुमारः

विषयानुक्रमणिका


विषयसूची — पृष्ठ संख्या

कृतज्ञताज्ञापनम्

विषयानुक्रमणिका

संकेताक्षरसूची

प्रथमोऽध्यायः – प्रस्तावना 1-22

- संस्कृतपालिभाषयोः परिचयः ।
- उत्पत्तिविकास-सम्बन्धिसिद्धान्तानां तत्र कारकतत्त्वस्य भाषावैज्ञानिकपरिचयः ।

द्वितीयोऽध्यायः- संस्कृतपालिव्याकरणयोः परिचयः । 23-53

- पाणीनीयव्याकरणं तस्य परम्परा च ।
- मोग्गल्लानव्याकरणं तस्य परम्परा च ।

तृतीयोऽध्यायः – संस्कृतव्याकरणे कारकाणां विभक्तीनां च स्वरूपम् । 55-119

- पाणीनीयव्याकरणे कारकाणां विभक्तीनां च प्रतिपादनम् ।
- उत्तरवर्तिवैयाकरणैः विहितं कारकव्याख्यानम् ।

चतुर्थोऽध्यायः – पालिव्याकरणे कारकाणां विभक्तीनां च विवेचनम् । 121-146

- मोग्गल्लानव्याकरणे (इतरव्याकरणेषु च) कच्चायनसद्दनीत्यादिषु ।
- बौद्धशास्त्रीयशाब्दबोधे कारकाणां विभक्तीनां च प्रवृत्तेः विवेचनम् ।

पञ्चमोऽध्यायः – उभयभाषयोः दर्शनपरम्परासु कारकार्थव्याख्यानम् । 147-194

- संस्कृतव्याकरणदर्शने कारकार्थः
- बौद्धशास्त्रीयशाब्दबोधे कारकार्थः

षष्ठोऽध्याय – संस्कृतपालिव्याकरणोपनिबद्धकारकाणां विभक्तीनां च तुलना उभयोः भाषयोः कारकेषु जायमानपरिवर्तनस्य कारणानि – 197-213

* सामाजिककारकाणि
* भाषिककारकाणि
* दार्शनिककारकाणि
* धार्मिककारकाणि

सप्तमोऽध्यायः – उपसंहारः 215-218

सन्दर्भग्रन्थसूची

I. प्राथमिकस्त्रोतांसि
II. अन्यग्रन्थाः
III. द्वितीयकस्त्रोतांसि
IV. कोशग्रन्थाः

# संकेताक्षर सूची
# Abbreviation

| | |
|---|---|
| उद्योत | भाष्यप्रदीपोद्योतः |
| कच्चा. | कच्चायनव्याकरणम् |
| का.वृ. | काशिकावृत्तिः |
| का.व्या. | कातंत्र-व्याकरणम् |
| चन्द्र. | चन्द्रकीर्ति व्याख्या |
| चा.सू. | चान्द्र व्याकरणसूत्रम् |
| जै.महा. | जैनेन्द्र महावृत्तिः |
| दुर्ग. | दुर्गसिंह वृत्तिः |
| निरु. | निरुक्तम् |
| पद. | पदमञ्जरी |
| प.ल.मं. | परमलघूमञ्जूषा |
| पा.सू. | पाणिनीयसूत्रम् |
| पा.वा. | पाणिनीयवार्तिकम् |
| प्र.कौ. | प्रक्रियाकौमुदी |
| प्रौ.म. | प्रौढमनोरमा |
| बा.म. | बालमनोरमा |
| बृ.श.शे. | बृहच्छब्देन्दुशेखरः |
| भा.वृ. | भाषावृत्तिः |

| | |
|---|---|
| भू.का. वैयाकरणभूषणकारिका | |
| म.भा. | पातञ्जलमहाभाष्यम् |
| मुग्ध. | मुग्धबोध-व्याकरणम् |
| रूपा. | रूपावतारः |
| मोग्ग. | मोग्गल्लानव्याकरणम् |
| ल.मं. | लघूमञ्जूषा |
| ल.श.शे. | लघुशब्देन्दुशेखरः |
| वा.प. | वाक्यपदीयम् |
| वै.भू.सा. | वैयाकरणभूषणसारः |
| श.कौ. | शब्दकौस्तुभः |
| सं.सा. | संक्षिप्तसारः |
| सि.कौ. | सिद्धान्तकौमुदी |
| हरि.व्या. हरिनामामृतव्याकरणम् | |

प्रथमोऽध्यायः

# प्रस्तावना

- संस्कृतपालिभाषयोः परिचयः
- उत्पत्तिविकाससम्बन्धिसिद्धान्तानां परिचयः
- तत्र कारकतत्त्वस्य भाषावैज्ञानिकपरिचयः

संस्कृतपदेन भाषाविशेषस्य बोधः भवति या चतुस्सहस्रादधिकं वर्षाणि मानवस्य सेवां विदधाति। नैकाः अन्याः गिरः संस्कृताद् उद्भूय जगति अनवरतं प्रवाहमाना: सन्ति। इयं च वाक् आभारतवर्षं व्याप्य तस्य परिचयं निश्चिनोति। अस्याः वाचः प्राचीनतमं स्वरूपं ॠग्वेदे उपलभ्यते। यद्यपि वैदिकयुगे संस्कृतनाम्नः प्रयोगः नासीत्। इदं नाम वैदिकयुगस्य अवसानादुत्तरम् अस्य साहित्यिकस्वरूपस्य पूर्णविकासानन्तरमेव बभूव। अनेन सहैव प्राकृतभाषाः अस्याश्च प्रवृत्तय अपि जनसामान्ये उपस्थिताः दरीदृश्यन्ते। शास्त्रीयजटिलतायाः अभावेन प्राकृतं सामान्यजनैः उपासितम् अथ शिष्टैस्संस्कृतम्। विकारप्राचुर्यात् प्राकृतस्यापि शास्त्रं प्रणीतमवर्तत। तत्र च भेदविधानमक्रियत। नाट्यशास्त्रे भरताचार्येण अष्टादशेऽध्याये नाट्यप्रयुक्तभाषाणां प्रतिपादने संस्कृतं प्राकृतं च समानतयैव प्रतिपादिते। तत्र चासौ संस्कारगुणवर्जितमिति प्राकृतं निर्दिशति।[1] संस्कारशैथिल्यात् प्राकृतं भिन्नावस्थासु विभिन्नभेदरूपमुपलभ्यते। तद्विपरीतं सस्कृतं पाणिनिना केन्द्राभिगामितया स्थिरीकृतम् अथ भिन्नावस्थास्वपि सामान्यस्वरूपमुपलभ्यते।

संस्कृतविद्वद्भिः वाङ्गमयस्य परिगणने संस्कृतप्राकृते उभेऽपि सादरं स्मृते स्तः। काव्यादर्शकारः भाषाणामाधारेण वाङ्ग्मयं चतुर्धा विभनक्ति प्रथमे परिच्छेदे-

तदेतद् वाङ्गमयं भूयः संस्कृतं प्राकृतं तथा।
अपभ्रंशश्च मिश्रं चेत्याहुरार्याश्चतुर्विधम्॥[2]

संस्कृतभाषा यद्यपि भारतीयभाषाभिः सह समन्वयं साधयन्ती विकासमकरोत् किन्तु पाश्चात्यप्रमुखाः नैके विद्वांसः अस्मिन् विकासक्रमे आसु भाषासु प्रतियोगित्वं प्रदर्शयन्ति। तेषाम्मतेन प्राचीनाः बौद्धविद्वांसः जैनशास्त्रकाराश्च संस्कृतं शास्त्रपरम्परायाः

---

[1] ना.शा. 18/2 एतदेव विपर्यस्तं संस्कारगुणवर्जितम्। विज्ञेयं प्राकृतं पाठ्यं नानावस्थान्तरात्मकं॥

[2] काव्यादर्श 1/32

बहिष्कर्त्तुमैच्छन्त। ते च स्वीयं प्रणयनमुद्देश्यपुरस्सरमेव संस्कृतेतराभिः वाग्भिः प्रणीतवन्तः।[3] भारतविद्याविज्ञः कीथनामा इमं सिद्धान्तं समर्थयति। तदनुसारं ललितविस्तरः महावस्तुप्रभृतिभिर्ग्रन्थैः प्राकृतस्य संस्कृतीकरणस्यैव प्रयासः आसीत्।[4] इमा च पद्धति पाणिनीयतन्त्रस्य उपस्थित्या शान्ताऽभवत् उत्तरकाले भाषासु पुनरपि सामञ्जस्यमैच्छत्। जैन-बौद्धशास्त्रकाराः मुक्तकण्ठेन संस्कृतस्य प्रयोगं स्वीचक्रुः।

भाषावैज्ञानिकाः संस्कृतभाषायाः ऐतिह्यं त्रिधा विभजन्ते। भाषाविज्ञानिनः भारतीयभाषासमूहम् आर्यभाषा नाम्ना अभिदधते। आसां भाषाणामुद्भवं ते भारतीयभाषाभ्यः यूरोपीयभाषाभ्यश्च स्वीकुर्वन्ति। अर्थात् अनयोस्सम्बन्धः भवति। इदं तथ्यं पाश्चात्यभाषाविद्भिः अष्टादशे शतके प्रकाशितम्। 1786 क्रैस्ताब्दस्य फरवरीमासे द्वितीयदिनाङ्के बङ्गाल एशियाटिक सोसायटी संस्थायाः वार्षिकसम्मेलने इदं तथ्यं प्राकटयत् यत् संस्कृतभाषायाः संरचना अद्भुता वर्तते। इमा भाषा ग्रीकभाषायाः अधिकतरं पूर्णा लाटिनभाषायाः च बहुला अस्ति, तथा च संस्कृतम् अस्मात् भाषाद्वयात् परिष्कृततरं वर्तते। तदनु च अन्येऽपि भाषाशास्त्रिणः तं समर्थितवन्तः। अस्मात् प्रकाशनादुत्तरं आभिर्भाषाभिस्सह गौथिक-कैल्टिक-फारसीभाषाः एकेन एव परिवारेण सह सम्बध्य ऐतिहासिकं भाषाशास्त्रमित्यध्ययनपद्धतिः आरब्धा।

ज्ञानविज्ञानसंश्लिष्टं विश्वभाषाविभूतिमत् । ध्वनि-वाक्य-पद-ज्ञानं भाषाविज्ञानमिष्यते ॥

ज्ञानविज्ञानसंश्लिष्टं विश्वभाषाविभूतिमत् । ध्वनि-वाक्य-पद-ज्ञानं भाषाविज्ञानमिष्यते ॥

भाषाविज्ञानस्य परिचय : भासयति या सा भाषा । मानवः केन प्रकारेण वक्ति ? तस्योपभाषायाः विकासः केन प्रकारेण भवति ? भाषासूपभाषासु च केन प्रकारेण, केन केन हेतुना कदा-कदा च भवति परिवर्तनमथवा विकासः ? केन प्रकारेण काचनापि भाषा विकसिता सति कस्याश्चन स्वतन्त्रायाः भाषायाः स्वरूपं धत्ते ? एतेषां समेषां विषयाणां विधिवद् अध्ययनं क्रियते भाषाविज्ञाननामके विषये । शास्त्रेऽस्मिन् शब्दानामुत्पादितः

[3] उपमितिभवप्रपञ्चकथा 1/51-52 संस्कृता प्राकृता चेति भाषे प्राधान्यमर्हतः।
तत्रापि संस्कृता तावद् दुर्विदग्धहृदि स्थिता॥
बालानामपिसद्बोधकारिणी कर्णपेशला।
तथापि प्राकृता भाषा तेषामपि न भासते॥

[4] ए. बी. कीथ संस्कृतसाहित्येतिहासः पृ. 18

रूप-विकासः वाक्यानां संरचना प्रभृतीनां विषयाणां विवेचनं क्रियते । भाषाविज्ञानं तु अनेकेषां प्राचीनानाम् अर्वाचीनानां च भाषाणां, तेषाम् अवयवानां च साङ्गोपाङ्गमध्ययनं विधिविशेषमाश्रित्य क्रियते । भारतवर्षे वैदिककालाद् आरभ्य भाषाविषयकं चिन्तनं विवेचनं विश्लेषणं च उपलभ्यते ।

वर्णनात्मक-ऐतिहासिक-तुलनात्मकाध्ययनानां माध्यमेन भाषायाः प्रकृतेः विकासस्योत्पत्तेः संरचनायाश्चाध्ययनपूर्वकम् एतेषां समेषां विषयाणां सैद्धान्तिकं निर्धारणमेव भाषाविज्ञानम्। भाषाविज्ञानं भाषायाः उत्पत्तेः तस्याः संरचनायाः तस्या विकासस्य तस्याः ह्रासस्य च अध्ययनं क्रियते । भाषाविज्ञाननामके विषये शब्दानामुत्पादितः रूपविकासः वाक्यानां संरचना प्रभृतीनां विषयाणां विवेचनं क्रियते । अनेन प्रकारेण भाषाविज्ञानस्य माध्यमेन कस्याश्चन भाषायाः वैज्ञानिकमध्ययनं क्रियते इति निश्चीयते ।

वेदाः ---- विश्ववाङ्मयस्य प्राचीनतमनिधिस्वरूपवैदिकग्रन्थाः वर्तन्ते । तेषु ग्रन्थेषु भाषाविज्ञानसम्बद्धनिर्वचनादय: प्राप्यन्ते । यथा- वृत्रं हनति वृत्रहा[5], अमावस्या मामा वसन्ति सुकृतः[6], उदानिषुर्महीरिति तस्मादुदकम् इति उच्यते।[7] यजुर्वेदे सर्वप्रथमं विश्लेषणार्थे ‘व्या-कृ’ धातोः प्रयोगः उपलभ्यते । यथा- दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापतिः[8], वेदपुरुषस्य मुखं भवति व्याकरणम् । किमित् चेत्- मुखं विना भोजनव्यापारः नास्ति । भोजनं विना शरीरं नास्ति । शरीरं विना प्राणरक्षणं न भवति । ऋग्वेदे व्याकरणस्य प्रशंसा एवमस्ति –

चत्वारि श्रृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महादेवो मर्त्यां आविवेश ॥ (ऋग्वेद)

व्याकरणस्य इच्छापूर्तिकारणत्वाद् वृषभेति नाम्ना सम्बोधनमस्ति । अस्य चत्वारि श्रृङ्गाणि भवन्ति । तानि – नामाख्यातोपसर्गनिपाता:। त्रयः पादाः – वर्तमान-भूत-भविष्यत्कालाः एते त्रयः कालाः विद्यन्ते । द्वे शीर्षे – सुप्तिङौ। अस्य सप्त हस्ताः –

---

[5] यजु.३३/९६

[6] अथर्व. ७/७९/२

[7] उदक् उस् अन्-अर्थ. ३/१३/३

[8] यजु १९/७७

प्रथमादयः सप्तविभक्तयः सन्ति । त्रिधा बद्धः – व्याकरणरूपवृषभः उरः, कण्ठः, शिरः इति स्थानेषु बद्धः। अयं महान् देवो, यः मनुष्येषु प्रविष्टो विद्यते । भगवान् पतञ्जलिः व्याकरणस्य प्रयोजनानि यानि प्रत्यपादयत् । तेषु रक्षा, ऊहः, आगमः, लघुः, असंदेहः, अपभाषणम्, दुष्टः शब्दः, अविद्वांसः, विभक्तिं कुर्वन्ति, नामकरणमिति । यस्तु प्रयुङ्क्ते, यो वा इमाम्, चत्वारि इत्यादि महाभाष्योदाहरणानि अपि व्याकरणाध्ययनामपि प्रयोजनानि सन्ति । व्याकरणशास्त्राणां विधिवत् ज्ञानं वेदांगस्वरूपस्य च रक्षां करोति एवं च स्वर्गे लोके च कामधुक् भवति इति वचनमपि चरितार्थं भवति । समुचितज्ञानाभावे तु –

मन्त्रोहीनः स्वरतो वर्णतो वा, मिथ्याप्रयुक्तो व तमर्थमाह ।

स वाग्वज्रो यजमानं हिनस्ति, यथेन्द्रशत्रुः स्वरतोपराघात् ॥ (महा. भाष्ये)

एतेन स्पष्टो भवति यत्- स्वरवर्णापराध-परिहाराय शिक्षाग्रन्थः अपेक्षितो वर्तते । संस्कृतवैदिकवाङ्मये बहूनि रूपाणि प्राप्यन्ते, येषां प्रयोगः सम्प्रति लौकिकसंस्कृते, भाषायां वा नैव दृश्यते । एतस्यामवस्थायां लौकिक- अलौकिकयोः संस्कृतयोः अध्ययनं करोति भाषाविज्ञानम् । भाषावैज्ञानिकानां प्रयोगेणैव सुनिश्चितं जातं यत् संस्कृत-पालि-प्राकृतानां भाषाणां मूलम् एकमेव आस्ते । संस्कृतसाहित्यस्य वैज्ञानिकम् अध्ययनं करोति भाषाविज्ञानम् । भाषाविज्ञानस्य सम्बन्धः सर्वेषां मानवानां भाषाभिः सममस्ति । इत्थं भाषाविज्ञाने ध्वनेः धवनि-उच्चारणोपयोगिनां स्वरयन्त्रमुखजिह्वाद्यङ्गानां, प्रकृति-प्रत्ययादीनां, संज्ञा-सर्वनाम-क्रिया-विशेषणादीनां, नामाख्यातोपसर्गनिपातानां, पदपदार्थविषयकानां विकारादीनां, विकारमूलककारकानाम् अन्येषां विविधविषयाणाञ्च अध्ययनं क्रियते ।

वेदांगानि – वेदानां षडङ्गेषु व्याकरणं, शिक्षा, निरुक्तं, कल्पं, ज्योतिषं, छन्दश्चेति ।

छन्दः पादौ तु वेदस्य, हस्तौ कल्पोऽथ पठ्यते,

ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।

शिक्षा घ्राणन्तु वेदस्य, मुखं व्याकरणं स्मृतम् ।

तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥[9]

येषु छन्दः – शिक्षा-व्याकरणं-निरुक्तं-भाषासम्बद्धानि वेदाङ्गानि सन्ति । पदानां लयात्मकं पाठं तु छन्दः शास्त्रम्, ध्वनिविज्ञानस्य मूलरूपा शिक्षा, व्याकरणं प्रातिशाख्यं च प्रकृति प्रत्ययविभाजनद्वारा भाषाशास्त्रीयं विश्लेषणं बोधयत्, निरूक्तं वैदिकशब्दानां निर्वचनं करोति।

ब्राह्मणग्रन्था आरण्यकग्रन्थाश्च – ब्राह्मणग्रन्थेषु इन्द्र-वरुण-वृत्रादिशब्दानां निर्वचनं तदर्थविवेचनं च प्राप्यते । गोपथब्राह्मणे[10] ओंकारशब्दे धातु-प्रत्यय-उपसर्ग-निपात-विभक्तीत्यादयः भाषाशास्त्रीयशब्दानां प्रयोगः सर्वप्रथमम् उपलभ्यते ।

भाषा तु यादृच्छिकवाचिकध्वनिसंकेतस्य सा पद्धतिः अस्ति, यया मानवः पारस्परिकविचाराणां विनिमयं करोतीति । इत्थं भाषाविषयकाः विचारणीयाः विषयाः अधोलिखिताः सन्ति –

१. भाषा तु एका पद्धतिरस्ति । २. भाषा संकेतात्मिका अस्ति । ३. वाचिकध्वनिसंकेत एव भाषाऽस्ति । ४. भाषायां यादृच्छिकसंकेतस्य समावेशः भवति । ५. उच्चारणावयवेभ्यः निस्सृतः ध्वन्यात्मक-विचार एव भाषाऽस्ति । (प्लेटो) ६. व्यक्ता वाचि वर्णा येषां ते इमे व्यक्तवाचः ।(पतञ्जलि:)

पाणिनीयशिक्षायाम् – वर्णानां विभागः पञ्चधा कृतं स्यात् – १. स्वरतः २. कालतः३. स्थानात् ४. आभ्यन्तरप्रयत्नात् ५. बाह्य-प्रयत्नात् । संस्कृतभाषा-विषयकवर्णोत्त्पति सिद्धान्तस्य वैज्ञानिकं बहु निरूपणं कृतम् ।

पाणिने: प्राचीनवैयाकरणा: –

ब्रह्मा संस्कृतव्याकरणस्य आदिज्ञाता अस्तीति मन्यते । ब्रह्मावृहस्पतये प्रोवाच, बृहस्पतिरिन्द्रायेन्द्रो भारद्वाजाय भारद्वाज: ऋषिभ्य: ऋषयो ब्राह्मणेभ्यः इति ऋकतन्त्रे[11]

[9] पाणि. शिक्षा

[10] १/२४

[11] १/४

उद्धृतः । अक्षरसमाम्नाय शिक्षावेदाङ्गस्य मौलिकप्रमुखः वर्तते । एतेन स्पष्टं भवति यत् शिक्षावेदांगस्य आदिप्रवर्तकः सृष्टिकर्ता ब्रह्मा अस्ति । द्वितीयप्रवक्ता अङिगिरसः पुत्रो बृहस्पतिः देवानां पुरोहितम् अस्ति । तृतीयप्रवक्ता देवराजः इन्द्रः, चतुर्थो भारद्वाजः, पञ्चमः ऋषभः षष्ठः ब्राह्मणः वर्तन्ते । इन्द्रेण व्याकरणस्य  पदानां प्रकृतिप्रत्यदीनां विभाजनं कृतम् । इत्थम् अनेके वैयाकरणाः आसन् तेषु प्रमुखाः सन्ति – ब्रह्मा प्रथमः वैयाकरणः। बृहस्पतिः द्वितीय इन्द्रः तथैव भारद्वाजः भागुरिः काशकृत्स्नः शौनकी गौतमः व्याडिः वशिष्ठः अत्रिः गालवः चाक्रवर्मणः शाकटायनः शाकल्यः स्फोटायन गार्ग्यः पाणिनिः पतञ्जलिः भट्टोजिदीक्षितः आचार्य वरदराजः माध्यन्दिनिः काश्यपः आपिशलिः सेनकः कात्यायनः नागेशभट्टः कौण्डभट्टः भर्तृहरिः वैयाघ्रपदः प्रभृतयस्सन्ति।

पाणिनेः पूर्वाचार्याणां ८५ वैयाकरणानां नामानि उपलभ्यन्ते । पाणिनेः अष्टाध्यायां १८ वैयाकरणानां नामानि उपलभ्यन्ते । प्रातिशाख्यादिषु उद्धृताः ५९ वैयाकरणानां नामानि । एतेषु वैयाकरणेषु इन्द्रः सर्वप्रथमं प्रकृतिप्रत्ययविश्लेषणस्य प्रवर्तक आसीत् । पाणिनिः एव विश्वस्य सर्वोत्कृष्टो वैयाकरणः । पाणिनेः अष्टाध्यायां ३९९७ सूत्राणि सन्ति । अष्टाध्याय्यां ध्वनिविज्ञानदृष्ट्या ध्वनीनां विवेचनम्, पदविज्ञानदृष्ट्या सुब्तिङ्विवेचनम्, वाक्यविज्ञानदृष्ट्या वाक्यस्य अवबोधनम्, अर्थविज्ञानदृष्ट्या शब्दार्थस्य अवबोधनम् । पाणिनिरेव सर्वप्रथमं संस्कृतभाषावैज्ञानिकः आसीत् । पाणिनिपरवर्तिषु वैयाकरणेषु वार्तिककारः – कात्यायनः, अष्टाध्यायी-व्याख्याकारः महाभाष्यकारः- पतञ्जलिः इति प्रमुखा आसन् ।

व्याकरणेतरशास्त्रेषु भाषाशास्त्रीय अध्ययनम् –

क. काव्यशास्त्रीयग्रन्थेषु शब्दशक्तेः ध्वनेः च विवेचनं प्राप्यते । तत्र उल्लेखनीयग्रन्थाः सन्ति-

१. नाट्यशास्त्रे – १ भरतमुनिः २ काव्यादर्शे दण्डिः, ३. ध्वन्यालोके आनन्दवर्धन, ४. सरस्वतीकण्ठाभरणे भोजराजः, ५. काव्यप्रकाशे मम्मटः ६. साहित्यदर्पणे विश्वनाथः ७. रसगंगाधरे जगन्नाथश्च ।

ख. दार्शनिकग्रन्थेषु अपि शब्दशक्तेः स्फोटसिद्धान्तस्य अर्थविज्ञानस्य च विवेचनं प्राप्यते । तत्र प्राधान्येनोल्लेख्याः ग्रन्थाः सन्ति – जगदीशभट्टकृता

शब्दशक्तिप्रकाशिका, गदाधरभट्टकृतौ व्युत्पत्तिवादशक्तिवादग्रन्थौ, जयन्तभट्टकृता न्यायमञ्जरी, प्रभाकरसूरिकृत:- प्रमेयकमलमार्तण्ड:, कुमारिलभट्टकृतं मीमांसाश्लोकवार्तिकं च ।

ग. भाषाशास्त्रीयाध्ययने आधुनिकसंस्कृतज्ञानां योगदानम् –

भाषाशास्त्रस्य आधुनिकरूपेण अध्ययनं पाश्चात्यविद्वत्साहाय्यमूलकमेव तथापि कोषांचिद् भारतीयानामत्र विशेषतो योगदानं प्राप्यते । तत्र मुख्यत्वेन उल्लेख्या विद्वांस: सन्ति डा. रामकृष्ण गोपाल भण्डारकर – Wilson philological lecturers, डा. सिद्धेश्वर वर्मा- phonetic observation of ancient Indian grammarians, डा. सुनीतिकुमार चटर्जी- origin and development of Bengali language, डा. मंगलदेवशास्त्री- तुलनात्मकभाषाविज्ञानम्, डा. बाबूराम सक्सेना- सामान्यभाषाविज्ञानम्, डा. कपिलदेव द्विवेदी- अर्थशास्त्र और व्याकरणदर्शन, डा. भोलानाथ तिवारी- भाषाविज्ञानम् । अन्येऽपि बहवो विद्वासों विविधभाषाणां भाषाशास्त्रीयेऽध्ययने प्रवृत्ताः संलक्ष्यन्ते ।

भाषाविज्ञानानां वर्गीकरणम् –

संस्कृतभाषायाः भाषावैज्ञानिक वर्गीकरणं संस्कृतभाषायाः वैज्ञानिकमध्ययनमेव भाषाविज्ञानमित्यभिधीयते । इदानीं भाषाविज्ञानस्य पञ्चैव प्रकारास्समुपलब्धा: सन्ति । प्रकाराः संक्षेपेण अत्र प्रस्तूयन्ते ।

ऐतिहासिकं भाषाविज्ञानम् –

अस्मिन् भाषाविज्ञाने भाषायाः विकारस्य अध्ययनं क्रियते । अस्मिन् अध्ययने कस्याश्चनैकस्या एव भाषायाः परिवर्तितानां रूपाणाम् अध्ययनं क्रियते । यथा- संस्कृतभाषायाः वैदिकलौकिकरूपयो: अध्ययनम् । ऐतिहासिकभाषावैज्ञानिकाः इदमपि प्रतिपादयन्ति यत् संस्कृतपालिप्राकृतभाषाणाम् एकमेव मूलमास्ते ।

प्रायोगिकं भाषाविज्ञानम् –

भाषाविज्ञानस्यास्य विभागस्य सम्बन्धः विविधक्षेत्रेषु भाषाविज्ञानस्य प्रयोगेण सह विद्यते । अन्यस्याः भाषायाः शिक्षा केन प्रकारेण प्रदेया? अनुवादः केन प्रकारेण

करणीयः? उच्चारणस्य दोषा: केन प्रकारेण अपाकरणीयाः ? इत्यादीनां प्रभृतीनां विषयाणां विचारः अत्र क्रियते ।

संरचनात्मकं भाषाविज्ञानम् –

अस्मिन् भाषाविज्ञाने भाषायां प्रयुक्तानां सर्वेषां तत्त्वानां पारस्परिके विशेष्टे सन्दर्भेऽध्ययनं क्रियते । संरचनात्मकभाषाविज्ञानस्य विषये पाश्चात्येषु देशेष्वधिकं कार्यं वहति । संरचनात्मकेन भाषाविज्ञानेन निश्चिताः निष्कर्षाः समुपलभ्यन्ते ।

वर्णानात्मकं भाषाविज्ञानम् –

भाषाविशेषस्य वक्तारः कस्मिनश्चित् समयविशेषे येन प्रकारेण तस्याः भाषायाः व्याहरणं व्यवहरणं च कुर्वन्ति, तस्यैव विश्लेषणात्मकध्ययनं वर्णनात्मकं च करोति भाषाविज्ञानम् । स च समयविशेषो भूतकालिको वर्तमानकालिको वा भवितुमर्हति । एतादृशीनामपि भाषाणामध्ययनं वर्णनात्मकेन भाषाविज्ञानेन क्रियते । एतादृशी व्यवहारमात्राश्रिताः संस्कृतभाषा अतीतकालविशेषे कीदृश्यासीत् ? तस्या कति ध्वनय आसन्? पदानां रचना कीदृश्यासीत्? वाक्यानि कीदृशान्यासन् ? इत्यादिकानां विषयाणामध्ययनं वर्णनात्मकं भाषाविज्ञानं करोति ।

तुलनात्मकं भाषाविज्ञानम् –

अस्मिन् भाषाविज्ञाने एकाधिकानां भाषाणां तुलनात्मकमध्ययनं विभिन्नात् कालानाश्रित्य क्रियते । कस्यचन परिवारविशेषस्य विभिन्नानां भाषाणाम् ऐतिहासिकस्य सम्बन्धस्य ज्ञानाय तासां तुलनात्मकध्ययनं क्रियते । कदाचित् तासां साम्यवैषम्ययोर्ज्ञानाय चापि तुलनात्मकध्ययनं क्रियते ।

भाषाविज्ञानस्याङ्गानि –

भाषाविज्ञानं साहित्यसम्पत्तिविरहिताया अपि भाषायाः वैज्ञानिकमध्ययनं करोति । भाषाविज्ञानस्य सम्बन्धः कालानां भाषाविषयकाणां तत्त्वैः साकं भवति भाषायाः कस्याश्चन तत्वानि संकलय्य तानि चाश्रित्य सिद्धान्तानापि निर्धारणं करोति । अस्मिन् अध्ययने ध्वनीनामुच्चारणस्य अक्षराणां शब्दानां वाक्यानां च संरचनायाः विवेचनं क्रियते।

१. ध्वनिविज्ञानम् – सम्पूर्णा भाषा ध्वन्याश्रिता भवति। अत एव भाषाविज्ञानेऽपि ध्वनेरध्ययनस्य महत्त्वपूर्णस्थानं भवति । ध्वनिविज्ञाने मानवशरीरस्योच्चारणोपयोगिनाम् अवयवानां परिचयः क्रियते। तानि चाङ्गानि यत्था – क. स्वरयन्त्रम्, ख. मुखम्, ग, जिह्वा, घ. ताल्वादिकं च । तदन्तरं ध्वनीनामुच्चारणस्थानस्य उच्चारणप्रत्ययदृष्ट्यापि वर्गीकरणं क्रियते । अत एव ध्वनिविज्ञानस्य इमे विषयाः सन्ति – उच्चारणावयवा:, ध्वनीनां संख्या, ध्वनीनां, वर्गीकरणम्, ध्वनिविकाराणां दिशः, तासां कारणानि ध्वनिनियमाश्च।

२. पदविज्ञानम् – पदपदार्थनिरूपयता महर्षिणा पाणिनिनाऽभिहितम् – सुप्तिङन्तं पदम् । तथाविधाः वर्णाः पदशब्देनाभिधीयन्ते येषां वर्णसमूहानामन्ते सुब्विभक्तीनामथवा तिङ्विभक्तीनां संयोगो भवति । आचार्यविश्वनाथेनाप्यभिहितम् – वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः इति । अस्मिन् पद विज्ञाने नानाविधानां पदानामध्ययनं क्रियते। यथा- संज्ञा सर्वनाम, क्रिया, क्रिया-विशेषणादिकानां, धातुरूपाणां, शब्दरूपाणाम्। अनेनैव साकस्मिन् विज्ञाने पदानां मूलम्, पदानां व्युत्पत्तिः, पदानां वाक्येषु प्रयोगाः, पदानां काले-काले सञ्जातं रूपपरिवर्तनम्, पदानां प्रयोगेषु देशकालानुसारेण विकारादिका: विवेच्यन्ते । पदानि एव भाषायाः मूलभूतानि सन्ति । अत एव पदविज्ञानं भाषाविज्ञानस्य मूलभूतं विद्यते।

३. वाक्यविज्ञानम् – अनेकेषां सार्थकानाम् अन्वितानाञ्च पदानां समूहो वाक्यमित्यभिधीयते । वाक्यस्य स्वरूपं निरूपयता आचार्येण विश्वनाथेनाभिहितम् – वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः इति । अयमाशयो यत् पदानां समूह एव वाक्यमित्यभिधीयते, परन्तु तस्मिन् पदसमूहे वैशिष्ट्यत्रयमपेक्षितं भवति वाक्यम् – १. योग्यता-योग्यानां पदानां समूहो वाक्यमित्यभिधीयते । यथा जलेन सिञ्चतीत्येव वाक्यम् । २. आकांक्षा-साकाक्षांणामेव पदानां समूहो वाक्यमभिधीयते। ३. आसत्तिः – अनेनैव प्रकारेण पदेषु वाक्यासत्तिरप्यावश्यकी। सा चासत्तिरपि द्विप्रकारवती भवति – कालकृता स्थानकृता च। अत्र वाक्यानाम् ऐतिहासिकं तुलनात्मकध्ययनमपि प्रस्तूयते।

४. अर्थविज्ञानम् – शब्दार्थयोः शब्दविदः अभेद-सम्बन्धं स्वीकुर्वन्ति । सर्वे शब्दाः सार्थकाः भवन्ति । येन प्रकारेणात्मानं विना शरीरं नश्यति, तेनैव प्रकारेण शब्दानामपि सार्थकता अर्थैरेव भवति । अत एवार्थविज्ञानं भाषाविज्ञानस्यातीव महत्त्वपूर्णाङ्गं वर्तते । अर्थविज्ञाने शब्दानामर्थनिर्धारणस्य प्रक्रिया अधीयते । इत्थं शब्दानाम् अर्थपरिवर्तनानि तेषामर्थपरिवर्तनानां कारणानि प्रभृतयो विषयाः अर्थविज्ञानस्य विषयाः सन्ति ।

भाषाणां वर्गीकरणम् –

सम्प्रति अस्मिन् संसारे त्रीणि सहस्राणि भाषा: प्रचलन्ति । एतासां सर्वासा भाषाणां द्विधा वर्गीकरणं कृतमस्ति ।

१. आकृतिमूलकं वर्गीकरणम् – वर्गीकरणस्याधारः सम्बन्धतत्त्वमस्ति । वर्गीकरणेऽस्मिन् वाक्याणां पदानाञ्च अध्ययनं क्रियते । एतदनुसारेणात्र वर्गद्वयम् उपलभ्यते- क. अयोगात्मिकाः भाषाः, ख. योगात्मिकाः भाषाश्च । योगात्मिके भाषासंवर्गे पुनस्त्रिविधाः उपवर्गाः सन्ति – १. अश्लिष्टाः, २. श्लिष्टाः, ३. प्रश्लिष्टाश्च।
२. पारिवारिकं वर्गीकरणम् – भाषायाः पारिवारिकं वर्गीकरणमतीव वैज्ञानिकमस्ति। वर्गीकरणेऽस्मिन् रचनातत्त्वम् अर्थतत्त्वम् समानरूपेण आलोच्येते । ध्वनिः पदरचना, वाक्यरचना, अर्थः, शब्दसम्पत्तिः, स्थानसान्निध्यं च एतेषु षट्सु विषयेषु साम्ये सति भाषायाम् एकः परिवारः भवति ।

डा. देवेन्द्रनाथशर्मा महोदयः वर्गीकरणेऽस्मिन् अष्टादशभाषापरिवाराणां नामानि निर्दिशति – भारोपीय- परिवारः , द्राविड- परिवारः, बुरुशस्की- परिवारः, ककेशी- परिवारः, यूराल-अल्टाई- परिवारः, चीनी- परिवारः, जापानी-कोरियाई- परिवारः, अत्युत्तरी- परिवारः, बास्क- परिवारः, सामी-हामी- परिवारः, सूडाली- परिवारः, बान्तू- परिवारः, होतेन्तोत-बुशमैनी- परिवारः, मलय-पोलिनेशियाई- परिवारः, पापुई- परिवारः, आस्ट्रेलियन- परिवारः, द.पू.एशियाई- परिवारः, अमरीकी- परिवारः

भारोपीय-भाषापरिवारस्य सामान्य-परिचयः -- विश्वेऽस्मिन् सर्वेषु भाषा परिवारेषु भारोपीयभाषापरिवारस्य सर्वातिशायी महत्त्वमस्ति । यतः भौगोलिकसाहित्यिक-सांस्कृतिक-वैज्ञानिक-भाषावैज्ञानिक-राजनैतिक-सामाजिकोत्कर्षेभ्यः विश्वस्य सर्वाः भाषाः भारोपीयभाषापरिवारस्य ऋणिन: सन्ति । सम्प्रति भाषापरिवारोऽयं एशिया महाद्वीपादारभ्य यूरोप-महाद्वीपपर्यन्तं विस्तीर्णमस्मि । अध्ययनसौकर्यदृष्ट्या ते वर्गीकृतानि सन्ति । यथोक्तं कपिलदेवद्विवेदि महोदयेन –

ईरानी-भारती चैव बाल्टो-सुस्लाविकी ।
आर्मीनी अल्बनी चैताः शतम्वर्गे समाश्रिताः ।
इटालिकी च ग्रीकी च जर्मानिक केल्टिकी तथा ।
हित्ती तोखरिकी चैताः केन्टुमवर्गे प्रकीर्तिताः ॥ (भाषाविज्ञान)

भारोपीय भाषापरिवार – केन्टुमवर्ग, शतमवर्ग

केन्टुमवर्ग – भारत-इरानी, बालटोस्काविकी, आर्मीनी, अल्बानी (इलीरी)

शतमवर्ग – ग्रीकभाषा, केल्टिक, जर्मानिक, इटालिक, हित्ती, तोखरी

भारोपीय-भाषापरिवारस्य वैशिष्ट्यानि – आचार्यवरेण कपिलदेवद्विवेदिमहोदयेन दशधा वर्णितं वैशिष्ट्यं भारोपीय भाषा परिवारस्य।

भारोपीयपरिवारवैशिष्ट्यं दशकं मतम् ।
श्लिष्टयोगात्मकत्वं तु प्रकृतिप्रत्ययात्मता ॥
एकाक्षरत्वं धातूनां सुप्-तिङौ कृच्च तद्धिताः ।
स्वातन्त्र्यमुपसर्गाणां पदमूला च वाक्यता ।
प्रत्ययार्थानभिव्यक्तिः समासाभिरुचिस्तथा ।
अपश्रुतेः प्रयोगश्च, प्रत्ययाधिक्यमेव च ॥ (भाषाविज्ञान)

1. श्लिष्टयोगात्मकत्वम्
2. प्रकृतिप्रत्ययात्मता
3. धातूनाम् एकाक्षरत्वम्
4. सुप्-तिङ्-कृत्-तद्धित-प्रत्ययात्मकता
5. उपसर्गाणां स्वातन्त्र्यम्

6. पदमूलवाक्यता
7. प्रत्ययार्थानभिव्यक्तिः
8. समासाभिरुचिः
9. अपश्रुतिप्रयोगः
10. प्रत्ययाधिक्यम्

पालिभाषा :-

पालिभाषायाः प्रसिद्धिः बुद्धवचनानां भाषात्वेन अस्ति।[12] प्राकृतेषु मागधी प्राकृतम् इत्यपि अस्या परिचयः क्रियते।[13] भाषाविज्ञानिनः इमां मध्यभारतीयार्यभाषां प्रवदन्ति।[14] अन्ये च वेदकालीना लोकभाषा विकासक्रमे क्रैस्तपूर्वे सप्तमे शतके यद् रूपं प्राप्नोत् तत् रूपविशेषं प्राचीनपालिनाम्ना परिचिन्वन्ति। इयञ्च भाषा भगवता बुद्धेन उपदेशाय प्रयुक्ता आसीत्। अस्याः स्वरूपं अनुपलब्धप्रायमेव स्वीक्रियते। तदुत्तरं राज्ञा अशोकेन शिलालेखेषु लिखिता भाषा अशोककालीनपालि बुद्धानन्तरं त्रिषु शतकेषु (270 ई.पू.) विकसिताऽभवत्।[15]

पालिति नाम वस्तुतः भगवतः बुद्धस्य वाचः कृते प्रयुक्तमासीत् इत्यपि केषाञ्चन मतिः।[16] तद्वचनानां भाषा मगधदेशे तत्काले भाष्यमाणा काचिद् भाषा स्यात् इति विद्वांसः भावयन्ति। सा च भाषा प्राचीनप्राकृतानां कोशली मागधीप्रभृतीनां संस्कृतस्य च मिश्रणं भवेदिति तेषां मतम्।[17] सिंहलदेशतः प्राप्ते शिलालेखेऽपि अस्य समर्थनमुपलभ्यते-

---

[12] A dictionary of the Pali Language, Robert Caesar Childers.

[13] In the Buddhas words, Bhikkhu Bodhi, P.10

[14] Pali as a MIA language is different from Sanskrit is not so much with regard to the time of its origin than as to its dialectal base, since a number of its morphological features betray the fact it is not a direct continuation of Rigvedic Sanskrit; rather desents from a dialect (or a number of dialects) which were despite meny similarities, different from Rigvedic. Pali A Grammar of the language of the Theravada Tipitaka. Indian Philosophy and South Asian Studies. Oberilies Thomas, Vol. 5, P. 6

[15] पालि भाषा और साहित्य, इन्द चन्द्र शास्त्री, वक्तव्य, पृ. 1

[16] The word Pali however signifies only “text” “sacred text”. If we use this word to designate the language it is merely a convenient abbreviation for *Palibhasa.* Synonymous with *Tantibhasa.* William gyger, Pali literature and language. Introduction P. 1

[17] वाग्विज्ञान (भाषाशास्त्र), आचार्य सीताराम चतुर्वेदी, पृ. 449

*पाळिमत्तमिधानीतं नत्थि अठ्ठकथा इधा।* अत्र पालिशब्दस्योपयोगः मूलस्य उपदेशस्य कृते एव क्रियते अठ्ठकथायाः कृते पालिसंज्ञा न प्रयुज्यते। इदञ्च तथ्यं पालिवैय्याकरणः कात्यायनः अपि एकेन सूत्रेण प्रमाणयति- *ततो बुद्धवचनम्हि* इत्यनेन। अठ्ठकथायां बुद्धघोषः उपलब्धपाठात् मूलवचनोक्तपाठस्य भेददर्शनाय पालिशब्दं मूलसिंहलपाठस्यार्थे प्रयुनक्ति- *महच्चापीति पालि* त्यादिना। राहुल सांकृत्यायनस्य मतेन अपि बुद्धवचनानां भाषायाः नाम पालिः न सत् अन्या भाषा अस्ति, पालिशब्दस्तु अन्यार्थक एव।[18]

तथैव पालिभाषा पैशाचीभाषायाः एव परिस्थितीजन्यं रूपविशेषमिति श्रीधर वेंकटेश केतकरप्रभृतयः प्रतिपादयन्ति।[19] बुद्धस्य मातृभाषा पैशाची एव इति भाषाविद् राजकमल वोरा तर्कयति।[20] एषां मतेन पालिभाषा पैशाची भाषायाः विकसिता स्यात्। जर्मन् विद्वान् विलियम गाईगर पालिभाषां प्राचीनां जनभाषां मनुते।[21] रीस डेविड च तं समर्थयति।[22] कनाई लाल हजारा पालिं भारतीयभाषासु सर्वाधिकविकसितां भाषां प्रतिपादयति।[23] अथ च बुद्धस्य पश्चात् पालिभाषायां कृत्रिमभाषागत वैशिष्ट्यानामपि समावेशोऽभूत्।[24] यथा हि संस्कृतशास्त्रेष्वपि इदं दृश्यते प्राचीनाचार्याः सरलभाषया शास्त्राणि कुर्वन्ति स्म अर्वाचीनैश्च जटिला भाषा आश्रिता।[25] तस्य मतेन आधुनिकविद्वद्भिः एतद्विषये प्रामाणिकः यत्नः अनुष्ठेयः।[26] नार्मनवर्यः पालिभाषायाः विकासं पार्थक्येन विवृणोति। तन्मतेन बुद्धवचनानां संकलनं भिन्नेषु स्थानेषु भिन्नासु च

---

[18] आज हम पालि शब्द को भाषा के अर्थ में व्यवहृत् करते हैं और इसमें बौद्ध धर्म के “थेरवाद” का सम्पूर्ण त्रिपिटक एवं अनुपिटक साहित्य प्राप्त है। प्रारम्भ में यह शब्द मूल बुद्धवचन अथवा त्रिपिटक के लिए प्रयुक्त होता रहा और बाद में यह उस भाषा का द्योतक हो गया, जिसमें बुद्ध वचन प्राप्त है। इस प्रकार भाषा के अर्थ में पालि का प्रयोग नवीन ही है, विशेषकर उन्नीसवीं शती से इसका व्यापक प्रचार हो गया है। राहुल सांकृत्यायन, पालि साहित्य का इतिहास, पृ. 3-4

[19] प्राचीन महाराष्ट्र, पृ. 377

[20] भारत की प्राचीन भाषाएँ, राजकमल वोरा, पालि भाषा. पृ. 20

[21] William gyger, Pali literature and language. Introduction P. 1

[22] Buddhist India, T.W. Rhys Davids, ch. 9

[23] Pali Language And Literature; A systematic survey and historical study, Kanai Lal Hazara, P. 11

[24] William gyger, Pali literature and language. P. 1-44

[25] Pali Language And Literature; A systematic survey and historical study, Kanai Lal Hazara, P. 20

[26] Ibid. P. 29

देशकालपरिस्थितिषु भिन्नजनैः सम्पादितमित्यतः अत्र परिस्थितीनां प्रभावेन संस्कृतीकरणं सञ्जातमस्ति।[27]

भिक्खु बोधिनः मतेन पालिभाषा विस्तृते भारतीयपरिवेशे अन्यान्यबौद्धविदुषां प्रभावेण तत्तद्विद्वत्सम्बद्धप्राकृतानां मिश्रणेन क्रैस्तपूर्वे तृतीये शतके स्थितिं प्राप्ता। अत एव इयं भाषा बौद्धचिन्तनस्य भारतीयसंस्कृतेश्च विस्तृतपरिप्रेक्ष्यस्य प्रतिनिधित्वम् आवहति।[28] किन्तु ए. के. वार्डर, अकीरा हिरकावाप्रभृतयः पालि भाषायाः भुवं मध्यपूर्वभारतं, मध्यभारतं च निर्दिशन्ति। मध्यपूर्वभारते अवन्तिजनपदे स्थविरनिकायस्य स्थितिरवर्तत, तेषां स्थानीयप्राकृते दक्षिणस्थमहासांघिकानां भाषायाः मिश्रणेन पालिभाषायाः निर्मितिर्जाता स्यादिति च तत्र तर्कः।[29] पॉल गॉर्नर इमं तर्कं पश्चिमभारतसन्दर्भेऽपि प्रस्तौति। यतः सौराष्ट्रशिलालेखेन सह असौ त्रिपिटकानां भाषायाः साम्यं पश्यति।[30]

**व्युत्पत्तिः-** पञ्चधा व्युत्पाद्यते पालिशब्दः।

- अठ्ठकथायां पालिशब्दः साक्षाद् बुद्धवचनानां कृते एव उपलभ्यते। अतस्तदेव पालीति।
- त्रिपिटके *परियाय* इति शब्दः बहूत्र धर्मशब्देन साकं वा स्वतन्त्रोऽपि च पठ्यते- *को नाम अर्थ भन्ते धम्म परियायो ति* इत्यादिषु। अयं च शब्द: बुद्धवचनार्थ एव। अशोकस्य प्रसिद्धे भाब्रूशिलालेखे *पलियाय* इति अस्य पाठान्तरं भवति। लेखेऽस्मिन् धर्मराजस्य भिक्षुसंघस्थ भिक्षूणां कृते संबोधितमस्ति यत् हे भिक्षव! बुद्धवचनानाकर्णयथ तेषां च पालनं कुरुथ इति। पालिशब्दोऽत्र पालने रक्षणे वापि अस्ति।
- भिक्खु सिद्धार्थः इमं शब्दं संस्कृतस्य पाठशब्दाद् व्युत्पादयति। स च क्रमशः पाठ>पाड>पार>पाल>पालि इतिवत् सम्पन्नः। तन्मतेन ब्राह्मणाः पुरा वेदस्य पाठ इत्यर्थे। पाठशब्दं प्रयुञ्जते स्म। ते च माहाशालाः यदा भिक्षुसंघमागच्छन् तदा तै: त्रिपिटकमपि पाठ इत्येव संबोधितम्। तस्मादेव पालीति वाक्संज्ञा अभवत्।

---

[27] Pali Litrature, K.R. Norman, P. 1-7

[28] In the Buddhas words, Bhikkhu Bodhi, P.10

[29] Indian Buddhism, A. K. Warder, P. 284

[30] A History of Indian Buddhism; From Shkyamuni to Early Mahayana, Akira Hirkawa, Paul Groner. P.119

- पं विधुशेखर भट्टाचार्यः पालिं शब्दं पक्तिवाचकं वक्ति। अभिधानप्पदीपिकायां पालिशब्दः बुद्धवचनेऽर्थे उपभ्यते। पालिसाहित्ये अम्बपालि दन्तपालि इत्यादौ च पङ्क्त्यर्थकः। अतः अयं बुद्धोक्ताः पङ्क्तयः इत्येनमर्थं बिभर्ति।
- मैक्स वेलेसर जर्मन् विद्वान् पालिशब्दं पाटलीतिनगरवाचकशब्देन सह अभिसंबध्नाति। पाटलीपुत्रस्य भाषा इत्येनर्थं च साधयति।
- अन्ये च पल्लि इति ग्रामार्थकाच्छब्दात् पालिशब्दं व्युपाद्य अस्यार्थं ग्रामीणा भाषा इति कल्पयन्ति।
- तथैव प्राकृतशब्दादपि अस्य व्युत्पत्तिः पाकड>पाअड>पाउड>पाअल>पालि इतिवत् साध्यते।
- प्रालेयकशद्बात् प्रतिवेशीत्यर्थकात् इत्यपरे वदन्ति।

एषा मतसन्ततिः पालिभाषामधिकृत्य आधारभूतसूचनाः प्रस्तौति। अनया भाषया सह सम्बद्धानि भिन्नानि तथ्यानि अस्या चरित्रगताः विशेषताः पुरस्कुर्वन्ति।

**देशकालौ विकासक्रमश्च-** भगवतः बुद्धस्य मागधिकत्वात् तद्वचनानां भाषायाः स्थानं मगधदेशः इति नैकेषां विदुषां स्थापना अस्ति। पुनश्च त्रिपिटस्य अधिकभागस्य विशेषतः सुत्तपिटकविनयपिटकयोः भाषया सह मागधीभाषायाः साम्यमपि एतन्मतं पोषयन्ति। अठ्ठकथाकारः बुद्धघोषः इदं प्रमाणयति *एत्था सकनिरूत्ति नाम सम्मासम्बुद्धेन वुत्ताप्पकारो मागधिको वोहारो*।[31] अनेन च मागधी मूलभाषा इत्यपि उच्यते। किन्तु नाटककारैः अप्रयुक्तत्वात् पालि: मागधिभाषायाः प्रकारविशेष: स्यात् इत्यपि केचन तर्कयन्ति। ई. कुहप्रभृतिनां पाश्चात्यविदुषाम् इदं मतमस्ति यत् पालिभाषा मध्यभारतस्य उज्जयिन्याः वा स्यादिति यतः गिरनारशिलालेखस्य भाषया सह अस्या साम्यमस्ति। अथापि सिंहलदेशं गतः भारतीयः बौद्धविद्वान् महिन्दः मध्यदेशवास्तव्य एवासीत् मूरवर्यः प्रतिपादयति।[32] गीयर्सन् पालिभाषां मध्यकालीनभाषां स्वीकरोति किन्तु तां पैशाच्याः विकारं वदति। तस्य मतेन पैशाची मध्यभारते विन्ध्यप्रदेशस्य भाषा आसीत्।[33] ओल्डनबर्ग् पालिभाषां कलिङ्गैरभिसंबध्नाति। यतः महिन्दस्य कथा अस्य न सम्मता।[34]

---

31 समन्तपासादिका, चुल्लवग्ग, गा. 33/1

32 Originala Sanskrit Texts, vol. 2, P.356

33 The Paishachi Language of North Western India, Asiatic Society Monographs, Vol. 8, Cf. William Geiger, Pali Literature and Language, Introduction, P. 4

34 The Vinaya Pitaka, Vol. 1. p. L

ई. मुल्लरश्च तं समर्थयति।[35] राजकमल वोरा पैशाच्या सह पालिभाषायाः सम्बन्धं वक्ति।[36] तदनुसारं पालिभाषायाः चरित्रं धार्मिकम् अस्ति न तु भौगोलिकम्। राहुल सांकृत्यायनः इमां भाषां युगमिति उपमिमीते। भारतस्य भिन्नेषु प्रदेशेषु पालिभाषायाः अन्यतमरूपाणि व्यवहारे आसन्, अथ च तेषामपि कालान्तरेण अन्यभाषासु परिणतिरभूत्।[37]

इत्थंभूतया चर्चया अपि किञ्चित्सार्थकमापादयितुमशक्ताः सन्तः पाश्चात्यविद्वांसः बौद्धवाङ्गमयस्य प्रमाणान् उरीचक्रुः।[38] यत् पालिभाषायाः मूलं तु मागधी वाक् आसीत् किन्तु साहित्यिकाभाषाः यथा अन्यानामपि सम्बद्धानां भाषाभेदानां प्रतिनिधित्वं कुर्वन्ति साहित्यकविकासक्रमे तथैव पालि भाषाऽपि सम्बद्धप्राकृतानां प्रतिनिधीभाषा भवितुमर्हति।[39]

अथ कोऽस्याः काल इति तु अस्याः भुवमिव अनेकमतसमलङ्कृता महती वचनपरम्परा। विकासक्रमे पालिभाषायाः विकासस्य अनेकानि चरणानि उपलभ्यन्ते। भाषाविज्ञानिनः

---

[35] Simplified Grammar of Pali Language, P. 3

[36] पालि भाषा भी पशाची प्राकृत की तरह प्राचीन प्राकृत का रूप है। ऐतिहासिक दृष्टि से पालि हमें पैशाची के बाद का रूप प्रतीत होगा। किन्तु सचाई यह है कि पैशाची का दक्षिणी रूप (सिंहल देश का रूप) पालि है।.... पैशाची प्राकृत का भौगोलिक रूप है पालि प्राकृत का भौगोलिक रूप नहीं है। पालि वाङ्गमय प्रधान रूप से बौद्ध धर्म का वाङ्गमय है। पालि धार्मिकभाषा अधिक है। पालि का नामकरण भौगोलिक नहीं। भारत की प्राचीन भाषाएँ, पालि भाषा, पृ. 20

[37] इन्हीं से ही ईसवी सन् के आरम्भ में "पाली काल" में उत्तरी भारत 16 जनपदों में बँटा हुआ था, जिनकी अपनी-अपनी बोलियाँ (पाली भाषाएँ) रही होंगी, जिन का नाम १) अंगिका, २) मागधी, ३) काशिका, ४) कोसली, ५) वृज्जिका, ६) मल्लिका, ७) चेदिका, ८)वात्सी, ९) कौरवी, १०) पाँचाली, ११) मात्सी, १२) शौरसेनी, १३) आश्मकी, १४) आवन्ती, १५) गान्धारी, १६) काम्बोजी था।...ईसा पूर्व काल की 6 शताब्दियों मे ये बोलियाँ जिन जनपदों में बोली जाती थीं उनमें आजकल निम्न बोलियाँ बोली जाती हैं। ... राहुल निबन्धावली, हिन्दी की मूल-भाषा कौरवी बोली है, पृ. 63

[38]A. Berriedale Kieth, Pali, the Language of Southern Buddhist India, Indian Historical Quarterly I 1925, P. 501, P.V.Bapat, the relation Between Pali and Ardhamagadhi, Ibid. IV, 1928, P. 23. Cf. William Geiger, Pali Literature and Language, Introduction,

[39] … and I am also inclined to do the same- according to which Pali Should be regarded as a form of Magadhi, the language in which Buddha himself had preached. This language of Buddha was whoever surely no purely popular dialect, but a language of the higher and cultured classes which had been brought into being already in pre Buddhistic times through the needs of communication in India. *For a geographic description.* William Geiger, Pali Literature and Language, Introduction, P. 5. see also Rhys Davids, Buddhist India, P. 140

अस्याः आरम्भं मध्यकालीनभारतीय-आर्यभाषायाः आरम्भेण सहैव स्वीकुर्वन्ति।[40] अस्याः नामानि देशभाषा-मूलभाषा-प्रथमप्राकृतम्-मूलमागधीप्रभृतीनि भारतीयभाषाप्रवृत्तौ अस्याः स्थानं निरूपयन्ति। अस्याः कालः क्रैस्तपूर्वात् षष्ठशतकादारभ्य क्रैस्तपूर्वं प्रथमशतकं यावत् स्वीक्रियते।[41]

पालिभाषायाः साहित्ये अनेकविधाः प्रवृत्तयः समाविष्टास्सन्ति। स्थूलतया पालिसाहित्यं पिटकसाहित्यम् अनुपिटकञ्चेति द्विधा विकासमाप्नोत्। तच्च पालि (षष्ठशतकात् क्रैस्तपूर्वात् क्रैस्तपूर्वं प्रथमशतकम्) – अनुपालि (क्रैस्तपूर्वात् प्रथमशतकादुत्तरम्) नामभ्यां प्रसिध्यते। विमलाचरण लौने पालिसाहित्यस्य पञ्च चरणान् अन्यप्रकारेण निर्दिशति-

प्रथमकालः : 483 BCE – 283 BCE

द्वितीयकालः: 383 BCE – 665 BCE

तृतीयकालः: 265 BCE – 230 BCE

चतुर्थकालः: 230 BCE – 80 BCE

पञ्चमकालः: 80 BCE – 20 BCE इतिवत्।

## साहित्यम्

त्रिपिटकम्- इद साहित्यं पालीति संज्ञया प्रसिद्धम्। नामानुगुणमत्र त्रयः पिटकाः सन्ति। सुत्तपिटकम्, विनयपिटकम्, अभिधम्मपिटकम् च। एषां पिटकानां सङ्कलनं क्रस्तपूर्वे तृतीयशतके समाप्तिमगत्। तदैव एषां स्वरूपं स्थापितमभवत्। अथ कोऽस्य अंशः बुद्धेनोक्तः कतमश्चान्यैः इति निर्धारणं क्लेशकरमेव। तत्र सुत्तपिट्टकं पञ्च निकायेषु विभक्तम् अस्ति। दीघनिकायः, मज्झिमनिकायः, संयुत्तनिकायः, अङ्गुत्तरनिकायः खुद्दकनिकायश्चेति। एषु निकायेषु विषयगतानां वचनानां प्रकाशनं विद्यते। खुद्दकनिकाये पञ्चदशग्रन्थाः समाविश्यन्ते। ते च धम्मपदम्, थेरगाथा, थेरीगाथा, जातकम्,

[40] William Geiger, Pali Literature and Language, Introduction, P. 1

[41] राहुल निबन्धावली, हिन्दी की मूल-भाषा कौरवी बोली है, पृ. 63

बुद्धवंसप्रभृतयः सन्ति। विनयपिटकस्य प्रमुखविषयः बौद्धसंघस्य व्यवस्था भिक्षूणां भिक्षुणिनाञ्च नित्यनैमित्यिककृत्यानां निर्देशः अस्ति। विनयपिटकः त्रिधा विभक्तः अस्ति- सुत्तविभङ्गः, खन्धकः, परिवारश्च। अभिधम्मे तु सप्त ग्रन्थाः समाविश्यन्ते- धम्मसंगणि, विभागः, धातुकथा, पुग्गलपञ्ञत्तिः, कथावत्थुः, यमकः, पट्ठानश्चेति। एषु बौद्धविद्यायाः विस्तृतं विशिष्टञ्च प्रतिपादनम् अस्ति।

अनुपालि- अनुपालि-अनुपिटकसाहित्यं वा त्रिषु भागेषु विभक्तमस्ति। पूर्वबुद्धघोषयुगम् (100-400 ईसवीयाब्दम्), बुद्धघोषयुगम्, (400-1100 ईसवीयाब्दम्), बुद्धघोषोत्तरं युगम् (1100-अद्ययावत्)। पूर्वबुद्धघोषयुगम्- अस्य युगस्य चतस्रः रचनाः अत्यन्तं महत्वपूर्णाः सन्ति। नोतिपकरणम्, पेटकोपदेसः, मिलिन्दपन्हः, दीपवंसः इति च। नेतिपकरणम् सद्धमावबोधस्य कृते उपयोगी ग्रन्थः अस्ति। तथा च पेटकोपदेसोऽपि। द्वयोरप्यनयो कर्त्ता महाकच्चानः स्वीक्रियते। मिलिन्दपन्हः सहित्यिकदार्शनिकदृष्ट्या आदृतो ग्रन्थः स्थविरवादिनाम्। अयं च ग्रन्थः कस्यचित् संस्कृतग्रन्थस्य परिवर्धितोऽनुवाद इत्यपि केषाञ्चित् मतम्।[42] ग्रन्थस्याद्यमध्यायत्रयम् एव मौलिकम् इत्यपि केषाञ्चत् प्रतिपादनम्। ग्रन्थे मिलिन्दः (ग्रीसदेशस्य राजा) भदन्तनागसेनश्चेत्यनयोः वार्तालापस्य माध्यमेन विषयवस्तु प्रतिपादितमस्ति। अस्य कालः क्रैस्तपूर्वं 150 इत्यस्ति। अस्मिन् बौद्धधर्मस्य मूलसिद्धान्तानां सरलं विवरणम् उपलभ्यते। दीपवंसे तु सिंहलदेशस्येतिहासः महासेनं यावत् (325-352 ई.) वर्णितः अस्ति।

बुद्धघोषयुगम्- अस्मिन् काले मुख्यतया पालिषु टीकाः अलिख्यन्त। आसां टीकानां नाम अठ्ठकथा। बुद्धदत्तः बुद्धघोषः धम्मपालश्च त्रिपिटकेषु पूर्वतः उपलब्धायाम् अठ्ठकथायां स्वीयाः अठ्ठकथाः निर्मिताः। एभिः क्रमशः पञ्च, सप्तदश, तथा च सप्त इति अस्य इव एकोनत्रिंशत् टीकाः प्रणीताः। तत्र बुद्धघोषः स्वकृतिभिरुभौ अतिशेते। अतः तस्य नाम्नैवास्य युगस्य प्रसिद्धिरस्ति। तत्र पूर्वोक्तौ द्वौ समकालीनौ धम्मपालः तयोरुत्तरः। अन्ये अपि केचन टीकाकाराः तदा अभूवन्।

---

[42] पालिभाषा और साहित्य, वक्तव्य

बुद्धघोषोत्तरं युगम्- उत्तरकालीना टीकापरम्परा अत्र समाविश्यते। तत्र प्रमुखाः ग्रन्थकाराः टीकाकाराश्च एते- सारिपुत्तः, विदेहथेरः, बुद्धिप्पियः, धम्मकित्तिः, मेघंकरः, महाकस्सपः, सारदस्सी, विदुस्रपोल पियतस्सः।

इतरसाहित्यम्- पालिभाषायाम् अन्यदपि चतुर्विधं साहित्यं प्रणीतमुपलभ्यते। वंससाहित्यम्, काव्यसाहित्यम्, अभिलेखसाहित्यम्, व्याकरणादिकं च शास्त्रसाहित्यम्।

वंससाहित्यम्- इदं इतिहासपरकं साहित्यमस्ति। अस्मिन् दीपवसः, महावंसः, चुल्लवंसः, बुद्धघोसुप्पतिः, महाबोधवंसः, संदेसकथा, संगीतिवंसादयः ग्रन्थाः विशिष्यन्ते।

काव्यसाहित्यम्- अस्य भेदद्वयमुपलभ्यते वर्णनकाव्यानि यथा- अनागतवंस, तेलकटाहगाथा, जिनालंकार, जिनचरितम्, पज्जमधु, सद्धम्मोपायनम्, पञ्चगतिदीपनम्, लोकप्पदीसारश्चेति। अपराणि च काव्य-आख्यानानि यथा रसवावाहिनी, बुद्धालङ्कारः, सहस्सवत्थुप्पकरणम्, राजाधिराजविलासिनी चेति। एषां सर्वेषामपि उपजीव्यं त्रिपिटकमेव। काव्यशास्त्रीयदृष्ट्या एषाम् उत्कृष्टतां न्यूनां वदन्ति विद्वांसः।[43]

अभिलेखसाहित्यम्- पालिसाहित्ये बुद्धवचनादनन्तरम् एषां स्थानमतीव महत्त्वपूर्णमस्ति। न केवलं भारतस्य अपितु विश्वेऽखिलेऽपि साहित्यिकसंस्कृत्योः निधयः स्वीक्रियन्ते एते। अतीव सरलया गिरा शैल्या च उत्कीर्णाः इमे लेखाः जीवनस्य गंभीरान् पक्षान् प्रकाशयन्ति। एषामुत्कीर्णनं क्रैस्तपूर्वात् तृतीयशतकादारभ्य क्रैस्तोत्तरं पञ्चदशशतकं यावदासीत्। एते लेखाः विभिन्नस्थानेषु विभिन्नकृतिषु चोपलभ्यन्ते। साञ्च्याम् भरहुतादिषु च अशोकस्य लेखाः उपलभ्यन्ते। सारनाथे कनिष्कस्याभिलेखाः, मौंगन, मब्जानगरयोः षष्ठशतकीयौ स्वर्णपत्रे उत्कीर्णौ लेखौ (ब्रह्मदेशे), बोबोगी-पागोडास्थ(ब्रह्मदेशे)खण्डिताः पाषणलेखाः पागाने कल्याण्यां च स्थिताः अभिलेखाः तत्र प्रमुखाः सन्ति।

---

[43] पालिभाषा और साहित्य, वक्तव्य

व्याकरणादिकं च शास्त्रसाहित्यम्- साहित्यपालिवैय्याकरणेषु कच्चान-मोग्गलान-अग्गवंसाः प्रसिद्धाः। एभिः क्रमशः कच्चान-मोग्गलान-सद्दनीत्याख्यानि व्याकरणानि विरचितानि। तथा च एषां नामभिरेव तिस्रः वैयाकरणसम्प्रदायाः अपि पालिभाषायाः प्रचलन्ति। अन्यैरपि कश्चिद्वैय्याकरणैः व्याकरणानि प्रणीतानि। छन्दश्शास्त्रे वुत्तोदयम् काव्यशास्त्रे च प्रसिद्धे स्तः अनयोः कर्त्ता सङ्घरक्खितः स्वीक्रियते।

**पालिव्याकरणम्-** व्याकरणं साहित्यिकभाषायै आवश्यकं भवति। तदभावे तत्र निबद्धं साहित्यं परिस्थितिभेदेन लयमियात्। पालिभाषा न अस्य अपवादः। यद्यपि व्याकरणस्य प्रवित्तिः अत्र शनकैः प्ररूढा किन्तु अस्य महत्वं धम्मपदे उल्लिखितम् उपलभ्यते-

वीततण्हो अनादानो निरुत्तिपदकोविदो
अक्खराणां सन्निपातम् जञ्ञा पुब्बपरानिका
सा वे अन्तिमासारीरो महापञ्ञो (महापुरीसो)
ति वुच्चति[44]

अत्र इदं स्पष्टतया प्रतिपादितमस्ति यत् अवैय्याकरणः नार्हति । नेत्तिप्पकरणेऽपि व्याकरणस्य तत्वानामुल्लेखः उपलभ्यते-

*भगवा अक्खरेहि संकासेति, पदेहि पकासेति, व्यञ्जनेहि विवरति, आकारेहि विभजति, निरुत्तिहि उत्तानिकरोत, निद्देसेहि पञ्ञापेति; अक्खरेहि च पदेहि च उग्घाटेति, व्यञ्जनेहि च अक्खरेहि च विपञ्चयति, निरुत्तिहि निद्देसेहि च वित्थारेति।*[45]

अठ्ठकथाकारैस्तत्र-तत्र पाणिनीयव्याकरणास्य सन्दर्भैः बुद्धवचनानां व्याख्यानं प्रस्तुतम्। सुत्तनिपातव्याख्यानेऽपि अयं प्रसङ्गः दृश्यते सुत्तनिपातव्याख्याने।[46] तत्र निर्दिश्यते- *वत्तमानसामीपे वत्तमान*[47] वचनमिदं च सन्दर्भयन् व्याख्याकारः पाणिनीयशास्त्रं स्मरन्नाह *वचनलक्खण पाणिनि* इति। तथैव विसुद्धिमग्गे इन्द्रियसच्चनिद्देसे[48] इदं पठ्यते-

---

[44] धम्मपद गा. 352

[45] नेत्तिप्पकरण pp. 8,9

[46] भाग 3, पृ. 23

[47] द्र. वर्तमानसामीप्ये वर्तमानवद्वा, पा.सू. 3/3/131

[48] P.T.S.Edition, pp. 491-492

*को पन नेसम् इन्द्रियत्थो नामाति? इन्दालिङ्गत्थो इन्द्रियत्थो; इन्दादेसित्थो इन्द्रियत्थो; इन्दादेसितत्थो इन्दियत्थ इन्दाजुट्ठतो इन्द्रियत्थो; सो सब्बो पि इधा यथायोगं युज्जति। भगवा हि सम्मासम्बुद्धो परमिस्सरियभावतो इन्दो, कुसलाकुसलं च कम्मं कम्मेसु कस्सचि इस्सरियभावतो। तेन एवेत्थ कम्मसञ्ञानितानि तानिन्द्रियानि कुसलाकुसलकम्मं उल्लिङ्गेन्ति। तेन च सित्थानीति इन्दालिङ्गत्थेन इन्दासित्थात्त्थेन इन्दादित्थात्थेन च इन्द्रियाणि। तेन एव भगवता मुनिन्देन कानिचि गूअरासेवनाय, कानिचि भावनासेवनाय, सेवितानीति इन्दाजुत्थात्थेनापि एतानि इन्द्रियाणि।*

अत्र पाठे उक्तानि पदानि पाणिनीयशास्त्रे प्रतिपादितत्वात् एव सार्थकानि भवितुमर्हन्ति।[49]

कोषकारेऽपि अभिधानप्पदीपिकायाः संस्कृतकोषकास्यामरसिंहस्य प्रभावः दृश्यते रचनाशैलीमधिकृत्य।[50] पालिभाषायाः सिंहलशैल्याः अपि अत्र प्रभावः संभवति।[51] सैव च एकाक्खरकोषे, वुत्तोदयादिषु ग्रन्थेष्वपि।

व्याकरणाग्रन्थाः- पालिव्याकरणस्य त्रयः मुख्याः परम्पराः सन्ति। ताश्च कच्चायन-मोग्गल्लान-सद्दनीतिः। तत्र कचायनः सर्वप्रथमः पालिवैयाकरणः इतिवत् स्मर्यते। अस्य व्याकरणस्य नाम सुसन्धिकप्प आसीत्। अस्य शैकीकातन्त्रव्याकरणवदस्ति। इदञ्च व्याकरणं क्रैस्तस्य पञ्चमशतके ब्रह्मदेशं नीतम् इत्यस्ति प्रसिद्धिः। पालिव्याकरणस्य कच्चायनव्याकरणस्य प्रतिनिधिरचनाः - रूपसिद्धिः, बालवतारः इति सप्ताध्यायी धर्मकीर्तिना प्रणीता धर्मारामेण च तट्टीका, महानिरुत्तिः, चुल्लनिरुत्तिः, निरुत्तिपिटक, मञ्जुसतिकाव्याख्या च। रूपसिद्धिटीकां दीपङ्करः प्रणिनाय।[52]

मोग्गलानस्य सम्प्रदायं च पयोगसिद्धिः, मोग्गलानवुत्तिः, पदाधानञ्चेत्येते ग्रन्थाः अनुसरन्ति। पदाधानस्यापरं नाम सद्दत्थरन्तकरः इत्यस्ति अस्मिन् च षड् अध्यायाः सद्द-सन्धि-समास-क्रिया-प्रत्ययोपसर्गरूपाः सन्ति।

---

[49] इन्दियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रजुष्टमिन्द्रियार्थमिति वा । पा सू 5/2/93

[50] Lone, History of Pali Literature, Pali Grammara, P. 621

[51] तदेव

[52] तत्रैव

सद्देनीतिसम्प्रदायं चुल्लसद्दनीतीति एकैव प्रमुखरचना अनुसरति। सद्दनीतिः ब्रह्मदेशे अद्यापि शास्त्रत्वेनाद्रियते।

पालिव्याकरणे अन्याः रचनाः सबन्धचिन्ता, सद्दसारत्थजालिनी, कच्चायनभेदः, कारिकाकारिकवुत्तिः इत्येताः सन्ति।

## द्वितीयोऽध्यायः

# संस्कृतपालिव्याकरणयोः परिचयः

- पाणिनीयव्याकरणं तस्य परम्परा च।
- मोग्गल्लानव्याकरणं तस्य परम्परा च।

व्याकरणं नाम शब्दानुशासनम्। तच्च लोके वेदे च प्रयुज्यमानशब्दानां प्रकृतिप्रत्ययात्मकोपदेशपरं शास्त्रम्। अस्य शास्त्रस्य महनीयता माधवीयधातुवृत्तौ दर्शिता—

व्याकरणात् पदसिद्धिः पदसिद्धेरर्थनिर्णयो भवति।
अर्थात्तत्वज्ञानं तत्त्वज्ञानात् परं श्रेयः॥[53]

महाभारतेऽपि व्याकरणमहनीयता गीयते-

सर्वार्थानां व्याकरणाद् वैयाकरण उच्यते।
तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा॥[54]

भर्तृहरिरप्युक्तार्थमेव पोषयति। अत एवोक्तं तेन वाक्यपदीये-

अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।
तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते॥[55]

भर्तृहरिर्व्याकरणं मोक्षदायकशास्त्रमपि मन्यते। अत एवोक्तं तेन वाक्यपदीये—

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः॥[56]

जगति सर्व एव निःश्रेयसमिच्छन्ति। निःश्रेयसाधिगमस्तत्त्वज्ञानाद् भवति। तत्त्वज्ञानं पदपदार्थज्ञानाधीनम्, पदपदार्थज्ञानं च लाघवेन शब्दानुशासनाधीनम्। अतो लाघवेन शब्दानां शब्दार्थानां च बोधाय व्याकरणाध्ययनमावश्यकम्।

पाणिनीयाऽष्टाध्यायी

---

[53] मा.धा.वृ.भूमिका

[54] महा.,उद्यो.४३.६१

[55] वा.,१.१३

[56] वा.१.१६

पाणिनेः अष्टाध्यायी संस्कृतवैयाकरणानां मार्गदर्शिका। अस्याः विधानानां अनन्यथाभावात् लाघवात् उपायेषु कौशलाच्च इयं सर्वानपि त्रिकालोद्भवान् वैय्याकरणान् अतिशेते। उपलब्धभाषिकोपाय-सूत्रग्रन्थेषु अयं प्राचीनतमः सूत्रग्रन्थः।[57]

पाणिनेः कालविषये स्थापितेषु मतेषु सामान्यपूर्वं पञ्चमं शतकमिति मतं अधिकस्वीकृतम् अस्ति।

अष्टै अध्यायान् बिभ्रदयं ग्रन्थः व्याकरणस्य विभिन्नप्रकरणानि विवृणोति। तत्र च प्रत्यध्यायं चत्वारः पादाः सन्ति सूत्राणि च ३९७८ सन्ति। सूत्रसंख्यामधिकृत्य मतान्तराणि सन्ति। वैदिकाः अपि अष्टाध्याय्याः पाठं कुर्वन्ति तेच ३९९४ सूत्राणि मन्वते। ते हि १४ वर्णसूत्राण्यपि सुत्रेषु गणयन्ति। तेषु इमा उक्तिरस्ति-

त्रीणिसूत्रसहस्राणि ततः नवशतानि च।
चतुर्नवति सूत्राणि पाणिनिः कृतवान् स्वयम्॥

पादेषु सूत्राणां संख्या तत्तत्प्रतिपादितप्रकरणानाम् आवश्यकतामनुसरति। एकस्मिन् पादे न्यूनतमा सूत्रसंख्या ३८ अधिकतमा च २२३ अस्ति।

सपादसप्ताध्यायी त्रिपादी चेति अष्टाध्याय्याः भागद्वयं प्राकृतिकमस्ति। प्रथमभागः सिद्धान्तकाण्डः उच्यते। अपरश्च असिद्धान्तकाण्डः। पाणिनीयाः विधिभागः विधिशेषभागः इत्यपि द्विधा विभजन्ति अष्टाध्यायीम्। तृतीयचतुर्थपञ्चमाध्यायाः विधिभागः अस्ति शिष्टं च शास्त्रम् विधिशेषः। फेडेगनप्रमुखाः (Faddegon) एके विद्वांसः- analytical (विवरणात्मकम्/विधायकम्) synthetic (कृत्रिमम्) इति विभजन्ति शास्त्रम्। प्रथमभागः आदिमः पञ्च अध्यायात्मकः अपरश्च शिष्टः।

पाणिनिः स्वीयं शास्त्रं प्रकरणशः न ग्रथयति अपितु अनुवृत्तिः[58] विप्रतिषेधः[59] इति सिद्धान्तेन ग्रथनम् अस्य शास्त्रस्य अद्वितीयः सिद्धान्तः।

| अध्यायः | सूत्राणां संख्या | प्रकरणानि | सूत्राणि |
|---|---|---|---|
| प्रथमः | ३५१ | प्रत्याहाराणि | ० |
| | | संज्ञाः | अनियन्त्रता(scattered |

[57] यः पातञ्जलशिष्येभ्यो भ्रष्टो व्याकरणागमः। काले स दाक्षीणात्येषु ग्रन्थमात्रे व्यवस्थितः॥
पर्वताद् आगमं लब्ध्वा भाष्यबीजानुरिभिः। स नीतो बहुमार्गत्वं चन्द्राचार्यादिभिः पुनः॥ वाक्य. २/४८०-४८१
[58] सूत्रांशानां क्रमशः अनुवर्तनम्
[59] विप्रतिषेधे परं कार्यम् इति नियमेन बलवतां विधानानां पश्चात्क्रमे उक्तिः

| | | | |
|---|---|---|---|
| | | | ) |
| | | परिभाषाः | अनियन्त्रिता |
| | | अशिष्यप्रकरणम्[60] | १/२/५१-१/२/५७ |
| | | एकशेषप्रकरणम् | १/२/६४-१/२/७३ |
| | | अनुबन्धप्रकरणम्(इत्संज्ञाप्रकरण म्) | १/३/२-१/३/९ |
| | | वाच्यप्रकरणम्- | |
| | | कर्तृवाच्यम् | १/३/१२-१/३/७७ |
| | | कर्मवाच्यम् | १/३/७८-१/३/९३ |
| | | वाक्य(रचना)(syntax) | १/४/२३-१/४/५५ |
| | | Particals कर्म्मप्रवचनीयम् गतिश्च | १/४/५६-१/४/९६ |
| द्वितीयः | २६८ | समासप्रकरणम् | २//१/१-२/२/३८ |
| | | विभक्तिप्रकरणम् | २/३/१-२/३/७३ |
| | | समासानां गणनायाः लिङ्गविधानम् | २/४/१-२/४/३१ |
| | | क्रिया(प्रत्यय)विधानम्(verb morphology) | २/४/३५-२/४/५७ |
| | | वर्णलोपप्रकरणम्(elision) | २/२/५८-२/४/८४ |
| तृतीयः | ६३१ | सनाद्यन्ताः (secondary verbal roots) | 3/1/5-3/1/32 |
| | | विकरणप्रकरणम् | ३/१/३३-३/१/९० |
| | | प्राथमिक-प्रत्यविधानानि- | |
| | | १. कालिकप्रत्त्ययानि प्रेरणाश्च (tenses and | अनियन्त्रितानि |

[60] अन्यव्याकरणेष्वपि अशिष्यसदृशविधानानि उपलभ्यन्ते

| | | | |
|---|---|---|---|
| | | moods) | |
| | | २. नामधातुप्रकरणम् (gerundive) | ३/१/९१-३/१/१३२ |
| | | ३. तृजादिप्रत्ययाः | ३/१/१३३-३/४/७६ |
| | | क्रियागत विकाराः (verbal inflection) | ३/४/७७-३/४/११७ |
| चतुर्थपञ्च मौ | ६३५+५५ ५ | सुपः (विभक्तयः) | ४/१/२ |
| | | स्त्रीप्रत्ययाः | ४/१/३-४/१/८१ |
| | | तद्धितप्रत्ययाः समासान्ताश्च (secondary derivatives) | ४/१/७६-५/४/१६० |
| षष्ठः | ७३६ | ध्वनिसम्बन्धीनि विधानानि(general phonological process) स्वराणां(vocalic) सन्धयश्च | ६/१/१-६/१/१५७ |
| | | स्वरविधानानि/बलाघाताः (accentuation) | ६/१/१५८-६/२/१९९ |
| | | समासान्तप्रत्ययाः, विभक्तीनाम् अलोपप्रकरणम्, पुंवद्भावः[61] | ६/३ |
| सप्तमः | ४३८ | प्रत्ययेषु परिवर्तनानि (अङ्गाधिकारः) | ७/१-७/४ |
| | | वृद्धिप्रकरणम् | ७/२/१-७/२/७ ७/२/११४-७/३/३५ |
| | | इडागमः | ७/२/८-७/२/७८ |
| अष्टमः | ३६९ | द्वित्वप्रकरणम् (reduplication) | ८/१/१-८/१/१५ |
| | | वाक्ये स्वरविधानानि/बलाघाताः (sentence accent) | ८/१/८-८/१/७४ |

[61] ८ टेबल में

| | | | |
|---|---|---|---|
| | | असिद्धप्रकरणम्(वाक्यसंयोजनम्, व्यञ्जनसन्धिः) | ८/२-८/४ |

पाणिनीयव्याकरणस्य वैशिष्ट्यम्

पाणिनीयव्याकरणस्य वैशिष्ट्यं मुख्यरूपेण पञ्चसु भागेषु विभक्तुं शक्यते-सूत्राणां लघूकरणम्, सूत्राणां विशिष्टो रचनाप्रकारः, भाषावैज्ञानिकता, लोकप्रामाण्यम्, प्रकृतिप्रत्ययविभागकल्पनं चेति।

सूत्राणां लघूकरणम्-

पाणिनेः सर्वोत्तमा कृतिरष्टाध्यायी। कृतिरियं सूत्रप्रणाल्यां निर्मिता। अत्रत्यानि सूत्राणि संक्षिप्ततमानि। सूत्राणां लघूकरणे प्रत्याहारसूत्राणाम्, संज्ञापरिभाषाधिकारसूत्राणाम्, गणपाठस्य, अनुबन्धानां च महत्त्वपूर्णं स्थानम्।

पाणिनिना अष्टाध्याय्या आरम्भे चतुर्दश सूत्राणि पठितानि। इमानि सूत्राणि 'प्रत्याहारसूत्राणि' इति नाम्ना ख्यातानि। अत्र स्वरा व्यञ्जनानि च वैज्ञानिकक्रमेण विन्यस्तानि। इमानि प्रत्याहारसूत्राणि 'अण्, अक, अच्, हल् इत्यादीनामनेकासां संज्ञानां विधानं कुर्वन्ति। एताः संज्ञाः स्वीयेन संक्षिप्ततमरूपेण तत्तद्वर्णानां बोधिका भवन्ति। इमाः संक्षिप्तरूपाः संज्ञास्तत्तद्विधिसूत्रेषु प्रयुज्यन्ते, येन विधिसूत्राणां रूपं लघु जायते। यथा- 'इको यणचि' इति सूत्रे त्रयः प्रत्याहाराः प्रयुक्ताः सन्ति। अत्र 'इक्' इति संज्ञया 'इ उ ऋ लृ' इति चतुर्णां वर्णानां बोधो जायते, 'यण्' इति संज्ञया 'य् व् र् ल्' इति चतुर्णां वर्णानाम्, 'अच्' इति संज्ञाया च, 'अ इ उ ऋ लृ ए ओ ऐ औ' इति नवानां वर्णानां बोधो जायते। तदेवमत्र तत्तद्वर्णानामुच्चारणं विनैव इगादिसंज्ञाभिस्तेषां बोधो जायते, येन विधिसूत्रं लघुरूपं भवति।

पाणिनीयव्याकरणे संज्ञापरिभाषाविधिनियमातिदेशाधिकाररूपाणि षड्विधसूत्राण्युपलभ्यन्ते। तदुक्तं कैश्चिद् विद्वद्भिः--

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रमुच्यते॥

सूत्राणामिदं विभाजनं कार्यपरकम्। एतेषु संज्ञापरिभाषाधिकारसूत्राणि सूत्राणां लघूकरणे विशेषसहायकानि।

पाणिनिना स्वव्याकरणे 'गुण-वृद्धि-लोप-उपसर्ग-गति-निपात-टि-घु' आदिसंज्ञाविधायकसूत्राणि विन्यस्तानि। एते गुणादिसंज्ञा वर्णविशेषाणां बोधिका भवन्ति विधिसूत्रेषु च प्रयुज्यन्ते, येन विधिसूत्राणां रूपं लघु जायते। यथा- *अदेङ् गुण:* इति संज्ञासूत्रेण पूर्वम् 'अ ए ओ' इति वर्णत्रयस्य गुणसंज्ञा विधीयते, तदनन्तरं चायं गुणशब्द: *आद्गुण:* इति विधिसूत्रे प्रयुज्यते, येनैकेनैव गुणशब्दप्रयोगेण 'अ ए ओ' इति वर्णत्रयस्य बोधो जायते। अत एव संज्ञाशब्दानां शक्तिनियामकत्वमुच्यते।

पाणिनीयव्याकरणे *इको गुणवृद्धी, अचश्च, आद्यन्तौ टकितौ* इत्यादिपरिभाषासूत्राणि पठितानि सन्ति। एतानि सूत्राणि विधिसूत्रेण सहैकवाक्यतया स्वीयमर्थं बोधयन्ति, येनोच्चारणं विनैव विधिसूत्राणामर्थविशेषो जायते, विधिसूत्रं च लघुरूपं भवति। यथा- *इको यणचि* इति सूत्रमचि परे इको यणादेशं निर्दिशति। सुधी+उपास्य इत्यत्र यणादेशप्रसङ्गे नात्र ज्ञायते यत् कस्मिन्नचि कस्य इकश्च यणादेशो विधेय:। अत्राचि परेऽनेकेषामिकां दर्शनात्। अत: *इको यणचि* इति सूत्रे *तस्मिन्निति निर्दिष्टे पूर्वस्य* इति परिभाषासूत्रमुपस्थितं भवति। तेनास्य सूत्रस्यायमर्थो जायते—'अचि परेऽव्यवहितपूर्वस्येको यण्भवति' इति। अत एव सुधी+उपास्य इत्यत्र धकारोत्तरवर्त्तिन ईकारस्यैव यण्भवति। तदेवमत्राव्यवहितपूर्वशब्दोच्चारणं विनापि तदर्थबोधो भवति।

पाणिनीयव्याकरणे *पूर्वत्राऽसिद्धम्, कारके, अनभिहिते* इत्यादीन्यधिकारसूत्राणि पठितानि सन्ति। यद्यप्यधिकारसूत्राणां स्वस्मिन् न किमपि फलं भवति, तथाप्येतानि प्रकरणविशेषं यावदनुवर्त्तन्ते। येन तत्तत्सूत्रेषु तेषामुच्चारणं विनापि तदर्थबोधो जायते। यथा- *कारके* इत्यधिकारसूत्रं वर्त्तते। अस्याधिकारक्षेत्रं सम्पूर्णं कारकप्रकरणम्। अत्रापादानादिसंज्ञाविधायकसूत्रेषु कारकशब्दोऽनुवर्त्तते अतस्तत्तत्संज्ञाविधायकसूत्रेषु कारकशब्दपाठं विनापि तदर्थबोधो जायते।

क्रमेणैकत्र पठितो धातूनां प्रातिपदिकानां वा समूहो गणपाठ उच्यते। सूत्राणां लघूकरणे गणपाठस्य महत्त्वपूर्णं स्थानम्। यदा केचन धातव: शब्दा वा स्वरूपेण परस्परं भिन्ना अपि, तेषु कस्मिंचिदपि कार्यविशेषे समानता दृश्यते, तदा लाघवेन तेषां समानरूपकार्यविधानाय पूर्वं गणपाठ विधीयते, तदनन्तरं च गणपाठनिर्दिष्ट: संज्ञाशब्द: विधिसूत्रेषु प्रयुज्यते। येन विधिसूत्रे लाघवं जायते। यथा-

पाणिनिना समस्तधातवो दशसु गणेषु विभक्ता:। अयं गणविभागो धातुभ्यो विकरणप्रत्ययसमानतामभिलक्ष्यैव जात:। पाणिनिना येभ्यो धातुभ्य: समानरूपविकरणप्रत्ययो दृष्टेस्ते धातवस्तेन पूर्वमेकस्मिन्नेव गणे निर्दिष्टास्तदनन्तरं च तत्तद्विकरणप्रत्ययविधायकसूत्रेषु तत्तद्गणसंज्ञशब्दा निर्दिष्टा:। येन विकरणप्रत्ययविधायकसूत्राणां रूपं लघु जातम्। यथा- दीव्यति, नृत्यति, दीयते इत्यत्र सर्वत्र 'दिव्, नृत्, दीङ्' इति धातुभ्य: श्यन्रूपविकरणप्रत्ययो दृश्यते। अत: पाणिनिना पूर्वं 'दिव्, नृत्, दीङ्' इति धातव इति पठितास्तेषां च दिवादिसंज्ञा कृता, तदनन्तरं च दिवादिसंज्ञाशब्द: श्यन्विकरणप्रत्ययविधायके *दिवादिभ्य: श्यन्* इति सूत्रे निर्दिष्टे। येन दिवादिगणपठितसमस्तधातुभ्य: श्यन्-प्रत्ययो जायते।

पाणिनिना स्वव्याकरणेऽनेके प्रातिपदिकगणा: पठिता:। यथा- सर्वादिगण:, स्वरादिगण:, चादिगणश्च। तत्र पाणिनिना सर्वादिगणे त एव शब्दा: पठिता:, येषां कासाञ्चिद् विभक्तीनां स्थाने समानरूपं सर्वनामकार्यं जायते। सर्वादिशब्दानां 'जस् ङे ङसि ङि' इति विभक्तीनां स्थाने क्रमश: 'शी स्मै स्मात् स्मिन्' इत्यादिकं शब्दसमूहं क्रमेणैकत्र पठति, तस्य च सर्वनामसंज्ञां करोति,तदनन्तरं च 'सर्वनाम' इति संज्ञाशब्दं ***सर्वनाम्न: स्मै*** इत्यादिविधिसूत्रेषु प्रयुङ्क्ते। अत्र पठितेन 'सर्वनाम' इति शब्देन सर्वादिगणपठिता: सर्वे शब्दा ज्ञायन्ते।

सूत्राणां लघूकरणाय पाणिनिना धातव: प्रत्ययाश्च सानुबन्धा: पठिता:। अनुबन्धा इत्संज्ञका: भवन्ति, इत्संज्ञकैरनुबन्धैश्चात्मनेपदपरस्मैपद- इडागम-गुण-वृद्धि-सम्प्रसारणादीनि विविधकार्याणि जायन्ते। पाणिनिरनुबन्धकार्यविधायकसूत्रेषु धातुप्रत्यययोर्निर्देशं विनैव अनुबन्धस्वरूपमेव निर्दिशति। येनानुबन्धप्रयुक्तकार्यविधायकसूत्रं लघु जायते। यथा- एधादय: षट्त्रिंशद् धातवो धातुपाठेऽनुदात्तेद्रूपेण पठिता लभ्यन्ते। अत: पाणिन: *अनुदात्तङित आत्मनेपदम्* इत्यत्रानुदात्तेद्धातूनामात्मनेपदसंज्ञाविधानार्थम् 'अनुदात्तेद्' इति शब्दमेव पठति। तेन सर्वेषामेवानुदात्तेद्धातूनां बोधो जायते।

पाणिनीयसूत्राणां लघुतां वीक्ष्यैव वैयाकरणेष्वियमुक्ति: प्राचलत्- '*अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणा:' इति। तदुक्तमष्टाध्याय्याम्- सूत्रं प्रतिष्णातम्* (८.३.९०) इति। पाणिनेरुक्तविधं सूत्रकौशलं वीक्ष्य वैयाकरणेष्विदं सूत्रलक्षणं प्राचलत्-

अल्पाक्षरमसन्दिग्धं सारवद् विश्वतो मुखम्।

अस्तोभनवद्यं च सूत्रं सूत्रविदो विदुः॥

अस्य सारगर्भितसूत्राण्यवलोक्य भगवान् पतञ्जलिः प्रावोचत्- *प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म, तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण*[62] इति। अत एव काशिकाकारो मुक्तकण्ठेन तं प्राशंसत्- *'महती सूक्ष्मेक्षिका वर्त्तते सूत्रकारस्य'*[63] इति।

सूत्राणां विशिष्टो रचनाप्रकारः-

पाणिनेः षड्विधसूत्रेषु विधिसूत्रं प्रधानम्। विधिसूत्रं त्रिविधम्- उत्सर्गविधिः, अपवादविधिः, निपातनविधिश्चेति। तत्र सामान्येनोत्सर्गविधिर्भवति, विशेषेण चापवादः। निपातनं तु रूढ्यर्थे भवति। ***कर्मण्यण्*** (३.२.१), ***आतोऽनुपसर्गे कः***(३.२.३, ***अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु***(३.१.१०१) इति सूत्राण्युक्तार्थे प्रमाणभूतानि। अनया रीत्या महतोऽपि महान् शब्दराशिरनायासेनावगन्तुं शक्यते। निपातनविधिविषयेऽनेकभ्रान्तधारणा विद्यन्ते। अतोऽत्र तत्स्वरूपस्य प्रयोजनस्य च निरूपणं प्रस्तूयते।

निपातनविधेः स्वरूपम्

आचार्याणां विशिष्टशब्दप्रयोगो निपातनपदवाच्यो भवति। सूत्रेणानुपपन्नोऽप्याचार्येण सूत्रादिषु व्यवह्रियमाणशब्दो निपातनात् भवति। तदुक्तं काशिकायाम्- *'यदिह लक्षणेनानुपन्नं निपातनम्' 'निपातनं च रूढ्यर्थमपि'*[64] *बाधकान्येव हि निपातनानि भवन्ति*[65] निपातनस्य सर्वापवादत्वम्' इत्यादिवचनानि निपातनविधिविषये व्याकरणनये प्रसिद्धानि जातानि।

निपातनविधेः कार्याणि

निपातनात् त्रिविधकार्यं सम्पद्यते- अप्राप्तेः प्रापणम्,प्राप्तेर्वारणम्, अधिकार्थविवक्षा च। अत एवोक्तं केनचिद् विदुषा-

अप्राप्तेः प्रापणं चापि प्राप्तेर्वारणमेव वा।

---

[62] म.१.१.१

[63] काशिका ४/२/७४

[64] काशिका ३/१/१२३

[65] सि.कौ.,तत्त्व.,सूत्रां.३८१७,पा.३/१/११४

अधिकार्थविवक्षा च त्रयमेतन्निपातनम्॥[66]

कदाचिद् विकल्पार्थेऽपि निपातनं भवति। अत एवोक्तं काशिकायाम्- '*विकल्पार्थं निपातनम्*'[67] इति। अस्य संक्षिप्तविवरणमुपरिष्टात् प्रस्तूयते-

पाणिनेरनुसारेण अतिपूर्वकात् शीङ्धातोर्ल्युटि 'अतिशयनम्' इति रूपेण भाव्यम्, परञ्च ***अतिशायने तमबिष्ठनौ*** (५.३.५५) इति सूत्रे तेन स्वयमेव 'अतिशयनम्' इति शब्दस्थाने'अतिशायनम्' इति शब्दः प्रयुक्तः। अत एवात्र 'अतिशायनम्' इति शब्दो निपातनाद् दीर्घत्वेन साध्यते। अत्र प्रमाणं भाष्यकारादीनामिदं वचनमेव- '*देश्याः सूत्रनिबन्धाः क्रियन्ते, अतिशयनमतिशायनम्,प्रकर्षः, निपातनाद् दीर्घः*'[68]इति। अत्र केनापि सूत्रेणाप्राप्तौ दीर्घो निपातनाद् विधीयते।

निपातनं शब्दनियामकमर्थनियामकञ्चोभयमेव भवति। 'अवद्यम्' इति पदम् ***अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु*** इति सूत्रेण निपातितं भवति। अत्र ***वदः सुपि क्यप् च*** (३.१.१०६) इति सूत्रेण यत्-क्यपोरुभयोरेव प्राप्तयोर्निपातनात् यदेव भवति, सोऽपि गर्ह्यायामेव। तदुक्तं दीक्षितेन-'*वदेर्नञ्युपपदे: वदः सुपीति यत्-क्यपोः प्राप्तयोर्यदेव, सोऽपि गर्ह्यायामेवेत्युभयार्थं निपातनम्*'[69] इति।

यत्र प्रत्ययानुसारेण निपातितशब्दार्थो न घटते, तत्र निपातनबलेन तदर्थाभ्युपगमो भवति। यथा- अध्यारूढशब्दात् ***अधिकम्*** (५.२.७३) इति सूत्रेण निपातनात् कानि उत्तरपदलोपे च 'अधिकम्' इति शब्दो निष्पद्यते। अध्यारूढशब्दः कर्तुः कर्मणो वा वाचकः। अतस्तत्स्थाने निपातितोऽधिकशब्दोऽपि तदर्थक एव। स चार्थः 'अधिको द्रोणः खार्याम्, अधिका खारी द्रोणेन' इत्यादि- प्रयोगेषु परिलक्ष्यते। अयमर्थावगमोऽपि विषयभेदे भवति न तु समानार्थे। यदि पुनरधिशब्दात् ससाधनक्रियावचनात् कन्-निपात्यते, तदा कर्तृकर्मणोरन्यतरस्यैवाभिधानं प्राप्नोति। अध्यारूढशब्दस्तूभयार्थ इति तस्यैवेदमङ्गीकृतसाधनभेदं निपातनमुचितम्। तदुक्तं कैयटेन- *लौकिक प्रयोगे अधिकशब्देन विषयभेदेन कर्तृकर्मणोरभिधानदर्शनादनङ्गीकृतसाधनभेदमध्यारूढस्येदं*

---

66 डा.रामशंकरभट्टाचार्य,पा.व्या.अनु.,पृ.१०३

67 काशि.,७/२/२७

68 म.,एवं काशि.,५.३.५५

69 सि.कौ.,सूत्रां.३७९७

*निपातनं, स चोभयार्थ इति न कश्चिद् दोषावसर:*[70]इति। तदेवमत्र निपातनबलेनार्थद्वयस्यावगमो भवति- कर्तु: कर्मणश्च '*व्युत्पादनमात्रमिदम्, शुद्धरूढ एवायमिति बोध्यम्*'[71] इति वासुदेवदीक्षितवचनम् 'अधिकम्' इति शब्दस्य शुद्धरूढतां दर्शयति।

निपातनविधे: प्रयोजनम्

निपातनाद् विभिन्नकार्याणां सम्पादनं भवति। तदुक्तं प्रदीपे- '*अनेकप्रयोजनसम्पत्तिर्निपातनाद् भवति*'[72] इति। निपातनात् शब्दनिष्पत्तौ सूत्रीयशब्देषु च लाघवं जायते। 'समाने अहनि' इत्यर्थे ***सद्य: परुत्.*** इति सूत्रेण निपातनात् समानस्य सभावो द्यश्च प्रत्ययो भवति।[73] निपातनाभावे तु *समानस्य सभावो द्यश्चाहनि* इति सूत्रनिर्देश आवश्यक:। निपातनादल्पप्रयत्नेनाप्यधिकार्थलाभो भवतीति 'अधिकम्' इति शब्दनिपातने दर्शितमेव।

विधिनिपातनयोर्भेद:

विधिसूत्रेषु प्रकृतिप्रत्ययादीनां निर्देशो भवति, निपातनेषु च सिद्धशब्दानाम्। तदुक्तं प्रदीपे- '*विधिनिपातनयोश्चायं श्रूयतेऽवयवाश्चानुमीयन्ते तन्निपातनम्*'[74]इति। यद्यपि निपातितशब्दा अपि प्रकृतिप्रत्ययात्मका भवन्ति, तथापि न ज्ञायते तत्र कियानंश: प्रकृते: कियांश्च प्रत्ययस्य। अत एवोक्तं भाष्ये-'*इमे विंशत्यादय: सप्रकृतिका: सप्रत्ययाश्च निपात्यन्ते, तत्र न ज्ञायते, का प्रकृति:, क: प्रत्यय:, क: प्रत्ययार्थ इति। तत्र वक्तव्यमियं प्रकृतिरियं प्रत्ययोऽयं प्रत्ययार्थ इति*'[75]इति। अत एव विंशतिशब्दस्य प्रकृतिप्रत्ययविषये सन्देहेऽपि वैय्याकरणा: द्वौ दशतौ परिमाणमस्येत्यर्थे निपातनाद् द्वयोर्दशतोर्विन्भावं स्वार्थे शतिच्-प्रत्ययं च विधाय तस्यान्वाख्यानं प्रदर्शयन्ति।

भाषावैज्ञानिकता

---

70 म.,प्र.५/२/७३

71 सि.कौ.,बाल.सूत्रां.१८७२.पा.५/२.७३

72 म.,प्र.६/२/२

73 सि.कौ.,सूत्रां२६७३

74 म.,प्र.५/१/५९

75 म.,५/१/५१

पाणिनीयव्याकरणे या भाषावैज्ञानिकता दृश्यते तत्र प्राक्पाणिनीयग्रन्थानां महत्त्वपूर्णं योगदानम्। अत एवात्र तद्योगदानपूर्वकमेव पाणिनीयव्याकरणस्य भाषावैज्ञानिकता प्रस्तूयते।

जगति भाषाविश्लेषणं सर्वप्रथमं संस्कृतभाषायामेव जातम्। अत्रानेकवैदिकमन्त्रेषु शब्दव्युत्पत्तिर्लभ्यते। अत्र शब्दस्य प्रकृतेस्तदर्थस्य च सकारणं निर्देशो लभ्यते। '*यज्ञेन यज्ञमयजन्त देवा:*'[76],*धान्यमसि धिनुहि देवान्*[77], '*येन देवा: पवित्रेणात्मानं पुनते सदा,*'[78] '*तीर्थैस्तरन्ति*'[79] इति मन्त्रेषु क्रमशो 'यज्ञ-धान्य-पवित्र-तीर्थ' इति शब्दानां व्युत्पत्तय: प्रदर्शिता: सन्ति। आभिर्व्युत्पत्तिभिरिदं ज्ञायते यद् यजनकर्म यज्ञ:, धिवनकर्म धान्यम्, पवनसाधनं पवित्रम्, तरणसाधनं च तीर्थमित्युच्यते। पूजनार्थकयज्-धातोर्यज्ञ:, प्रीणनार्थक'धिवि'धातोर्धान्यम्, पवनार्थकपूञ्धातो: पवित्रम्, तरणार्थकस्तॄधातोस्तीर्थं निष्पद्यते। '*उदानिषुर्महीरिति तस्मादुदकमुच्यते*'[80] इत्यत्र प्रदर्शिता उदकशब्दव्युत्पत्तिर्भाषावैज्ञानिकी।

सर्वप्रथममिन्द्रेण पदं प्रकृतिप्रत्यययोर्विभक्तमिति तैत्तिरीयसंहितया ज्ञायते।[81]

संहितानामनन्तरं ब्राह्मण-ग्रन्थेषु पदार्थबोधाय प्रयासो दृश्यते। अत्र संहिताग्रन्थानामपेक्षया व्युत्पत्तीनां बाहुल्यं दृश्यते। तत्रापि शतपथं ताण्ड्यं च निर्वचननिधिरूपे। ताण्ड्यब्राह्मणमाज्यशब्दव्युत्पत्तिमाख्यानपूर्वकं प्रदर्शयति- '*यदाजिमायन् तदाज्यानामाज्यत्वम्*'[82] इति।

शाकल्यकृत: पदपाठो भाषावैज्ञानिकाध्ययनस्याधारभूमि:। अत्र संहितापाठ: पदपाठे विभक्तोऽस्ति। अत्र स्वराणां, सन्धे:, समासविच्छेदस्य च नियमानां निर्धारणं जातम्।

भाषाविश्लेषणे प्रातिशाख्यानां विशिष्टं स्थानम्। अत्र प्रतिशाखं वर्णोच्चारणसम्बन्धिनियमानामध्ययनं जातम्। अत्र संस्कृतध्वनीनां वर्गीकरणं प्राञ्जलरूपेण जातं पदानि च 'नाम-आख्यात-उपसर्ग-निपात' इति चतुर्षु भागेषु विभक्तानि।

---

76 ऋ.सं.१/१६४/५०

77 यजु.१/२०

78 साम.,२/६५२

79 अथर्व.,१८/४/७

80 अथर्व.,३/१३/४

81 तै.सं.,६/४/७/३

82 ता.ब्रा.७/२/१

प्रातिशाख्यानामनन्तरं निघण्टुनाम्नी रचनोपलभ्यते। रचनेयं रूपविज्ञानस्य प्रथमा कृति:। इमामेव कृतिमाश्रित्य यास्केन निरुक्तं विरचितम्। रचनेयमर्थविज्ञानस्य सर्वोत्तमा कृति:। अत्र निघण्टो: प्रत्येकं शब्दस्य व्युत्पत्तेरर्थस्य चाध्ययनं जातम्।

तदेवं पाणिने: पूर्वमपि भाषाविश्लेषणं जातं, तथापि पाणिनिरेव विश्वस्य सर्वोत्तमभाषावैज्ञानिक:। अत्र प्रमाणं भाषाविज्ञानक्षेत्रे कृतं तत्कार्यमेव। अस्य सर्वोत्तमा कृतिरष्टाध्यायी। रचनेयं ध्वनि-पद-वाक्य-अर्थविज्ञानानां चरमसीमानमञ्चति। अत्र प्रत्याहारसूत्रस्थ:स्वर-व्यञ्जनक्रमो वैज्ञानिक:। अत्र ध्वनीनां वर्गीकरणं स्थानानुरोधेन प्रयत्नानुरोधेन च जातम्। अत्र सन्धिनियमानां व्याजेन ध्वन्यात्मकं विश्लेषणमुपलभ्यते। कार्यमिदं ध्वनिविज्ञानदृष्ट्या महत्त्वपूर्णम्।

कृतिरियं पदविज्ञानमर्थविज्ञानं च विस्तरेण प्रस्तौति। अत्र यथा पदं प्रकृतिप्रत्यययोर्विभक्तं तथैवात्र प्रकृत्यर्थोऽपि दर्शित: प्रत्ययार्थोऽपि च। अत्र वैदिकलौकिकसंस्कृतयोरपि तुलनात्मकं विश्लेषणमुपलभ्यते।

अत्रत्यं कारकप्रकरणं वाक्यविज्ञानस्य श्रेष्ठतमं निदर्शनम्। अत्र वाक्यरचनासम्बन्धिनियमानां वर्णनं जातम्। कारकप्रकरणानुसारं वाक्ये विभक्तिनिर्देश: शब्दव्यापारानुसारं जातम्। कारकप्रकरणानुसारं वाक्ये विभक्तिनिर्देश: शब्दव्यापारानुसारं भवति। यदा वाक्ये कर्तु: प्राधान्यं भवति, तदा कर्तरि प्रथमा विभक्तिर्भवति, यदा कर्मण: प्राधान्यं भवति, तदा कर्तरि तृतीया कर्मणि च प्रथमा। 'बालक: पुस्तकं पठति, बालकेन पुस्तकं पठ्यते' इति वाक्ययोरयमेव भेद:।

भाषाविज्ञानक्षेत्रे यत्कार्यं योरोपदेशे १९ तम्यां शताब्द्यां जातं तत्कार्यं पाणिनिना ई.पू. ५००-६०० पञ्चम्यां षष्ठ्यां च शताब्द्यां सम्पादितम्। अत एव भूयांसो वैज्ञानिकसिद्धान्ता: संस्कृतभाषां पाणिनीयव्याकरणं चाश्रित्यैव निर्धारिता अभवन्।

लोकप्रामाण्यम्

पाणिनीयव्याकरणानुसारं शब्दोऽर्थश्च नित्यौ,अनयोश्च ज्ञानं लोकाधीनम्। अत्र प्रमाणं ***सिद्धे शब्दार्थसम्बन्धे*** इति कात्यायनीयम् वार्त्तिकम्। भाष्यकारोऽपि शब्दार्थौ नित्याविति मत्वा तयोर्ज्ञानं लोकत एव दर्शयति। अत एवोक्तं तेन भाष्ये- *कथं पुनर्ज्ञायते सिद्ध: शब्दोऽर्थ: सम्बन्धश्चेति? लोकत:। यल्लोकेऽर्थमर्थमुपादाय शब्दान् प्रयुञ्जते। नैषां निर्वृत्तौ यत्नं कुर्वन्ति*[83] इति। काशिकावृत्तिरपि भाष्योक्तमतं समर्थयते- '*अन्य इति शास्त्रापेक्ष्या*

[83] म.,पस्पशा.पृ.३२

*लोको व्यपदिश्यते, शब्दौरर्थाभिधानं स्वाभाविकं, न पारिभाषिकमशक्यत्वात्। लोकत एवार्थावगते:'*[84] इति।

तदेवं शब्दज्ञानमर्थज्ञानं च सर्वमेव लोकाधीनम्। शास्त्रं तु केवलं साधुशब्दबोधकं धर्मनियामकं च। तदुक्तं महाभाष्ये-

'*लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियम:'*[85] इति। भर्तृहरिरपि भाष्यवचनं द्रढयति- '*साधुत्वज्ञानविषया सैषा व्याकरणस्मृति:'*[86] इति। 'लक्ष्यपरतन्त्रत्वाल्लक्षणस्य'[87] इति कैय्यटवचनमपि भाष्यार्थं ब्रूते।

प्रकृतिप्रत्ययविभागकल्पनम्

व्याकरणं प्रकृतिप्रत्ययात्मकं प्रकृत्यर्थप्रत्ययार्थात्मकं च भवति। व्याकरणभेदात् क्वचित् प्रकृतिप्रत्यययो: प्रकृत्यर्थप्रत्ययार्थयोश्च भेदोऽपि जायते। अतोऽत्र तद्विवेचनपुरस्सरमेव पाणिनीयं प्रकृतिप्रत्ययविभागकल्पनं प्रस्तूयते।

प्रकृतिप्रत्ययविभागस्याधार: काल्पनिकता च

अनन्तो हि शब्दराशि:। प्रतिपदपाठेन तज्ज्ञानं सर्वथा न सम्भवति।'*बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम'* इति महाभाष्योक्त: प्राचीनसंवाद एवात्र प्रमाणम्। अनन्तशब्दराशिज्ञानाय सर्वोत्तमो लघूपायो व्याकरणम्। अत्रोत्सर्गापवादरूपं लक्षणमाश्रीयते, पदं च प्रकृतिप्रत्यययोर्विभज्यते। किञ्चात्र प्रकृतिप्रत्ययाभ्यां सह तदर्थोऽपि निरूप्यते। तदुक्तं महाभाष्ये-'*लघ्वर्थं चाध्येयं व्याकरणम्, कथं तर्हीमे शब्दा: प्रतिपत्तव्या:? किञ्चित् सामान्यविशेषवल्लक्षणं प्रवर्त्यम्, येनाल्पेन यत्नेन महतो महत: शब्दौघान् प्रतिपद्येरन्'* इति। प्रकृतिप्रत्ययविभागपूर्वकेण शब्दान्वाख्यानेन शब्दार्थबोधे लाघवं जायते। अत्र प्रमाणं नागेशभट्टस्येदं वचनम्- '*तत्र प्रतिवाक्यं संकेतग्रहासम्भवात्, तदन्वाख्यानस्य लघूपायेनाशक्यत्वाच्च, कल्पनया पदानि विभज्य, पदे प्रकृतिप्रत्ययविभागकल्पनेन* कल्पिताभ्यामन्वयव्यतिरेकाभ्यां *तत्तदर्थविभागं*

[84] काशि.,१/२/५६

[85] म.,पस्पशा.पृ.३३

[86] वा.,१/१४२

[87] म.,प्र.५/१/८०

*शास्त्रमात्रविषयं परिकल्पयन्ति स्माचार्याः*[88] इति। कुमारिलभट्टोऽपि लक्षणपूर्वकेण प्रकृतिप्रत्यय-विभागेन शब्दार्थज्ञाने लाघवं दर्शयति। अत एवोक्तं तेन तन्त्रवार्तिके-

प्रकृतिप्रत्ययानन्त्याद् यावन्त: पदराशय:।
लक्षणेनानुगम्यते कस्तानध्येतुमर्हति॥[89]

अयं प्रकृतिप्रत्ययविभागस्तदर्थविभागश्च सर्व एव कल्पित: शास्त्रगम्यश्च। अत्र प्रमाणं पूर्वोक्तं नागेशवचनमेव।

प्रकृतिप्रत्ययविभागकल्पने वैयाकरणानां स्वातन्त्र्यम्

प्रकृतिप्रत्ययविभागस्य तदर्थविभागस्य च काल्पनिकत्वात् क्वचिद् व्याकरणभेदात् प्रक्रियाभेदोऽपि भवति। आचार्या: स्वशास्त्रानुरूपं प्रकृतिप्रत्यय-स्वरूपकल्पने तदर्थकल्पने च स्वतन्त्रा भवन्ति। तदुक्तं वाक्यपदीये-

उपादायापि ये हेयास्तानुपायान् प्रचक्षते।
उपायानां च नियमो नावश्यमवतिष्ठते॥[90]

कौण्डभट्टोऽप्यस्मिन् विषये वाक्यपदीयवचनं समर्थयते। तदुक्तं वैयाकरणभूषणसारे- '*उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिता:'* इति। अस्यान्वाख्यानस्य काल्पनिकत्वेऽपि साधुशब्दज्ञानाय तस्योपयोगिता वर्त्तत एव। अत एवोक्तं भर्तृहरिणा-

उपाया: शिक्षमाणानां बालानामुपलालना:।
असत्ये वर्त्मनि स्थित्वा तत: सत्यं समीहते॥[91]

शब्दानामन्वाख्याने द्विविधो भेदो भवितुमर्हति- प्रकृतिप्रत्ययस्वरूपविषयक: प्रकृत्यर्थप्रत्ययार्थविषयकश्च। अस्य संक्षिप्तपरिचय उपरिष्टात् प्रस्तूयते-

प्रकृतिप्रत्ययस्वरूपविषयको भेद:

क्वचिद् व्याकरणभेदात् प्रकृतिप्रत्यययो: स्वरूपे भेदोऽपि दृश्यते। यथा-'अस्ति,स्त:,सन्ति' इत्यादितिङन्तप्रयोगाणां साधने पाणिनीयव्याकरणमापिशलिव्याकरणं च भिन्नसरणिमेवानुसरत:। तत्र पाणिनीया 'अस्' धातोरेतान् प्रायोगान् साधयन्ति,

---

[88] प.ल.मं.,शक्तिनिरूपणे

[89] तं.वा.,(आनन्दाश्रमसंस्क.)पृ.२७९

[90] वा.,२/३८

[91] वा.,२/२४०

आपिशलीयाश्च 'स' धातो:।[92] एक एव रोमशब्द: षड्धातुभ्यो निष्पादयितुं शक्यत इति केषाञ्चिन्मतम्। तदुक्तमुणादिवृतौ-

रुहे रुचेश्च रौतेश्च रुदिरुध्योरुषेरपि।
षण्णामेव च धातूनां रोमशब्दं निपातयेत्॥[93]

पाणिनीयव्याकरणस्य तिङन्तप्रक्रिया लादेशरूपा सारस्वतव्याकरणस्य च तिबादिरूपा। अत्र तिबादिप्रत्ययानामेव लडादिसंज्ञा क्रियते।[94] दुर्गाचार्योऽपि निरुक्तव्याक्यायामुक्तप्रकारकं वैषम्यं दर्शयति।[95]

पाणिनीय यच्छब्दात् वतुप्-प्रत्ययविधानेन 'यावत्' इति प्रयोगं साधयन्ति, पूर्वाचार्यास्तु डावतुप्रत्ययेन। तदुक्तं प्रदीपे-'*पूर्वाचार्यास्तु डावतुं विदधिरे*'[96] इति।

प्रकृतिप्रत्यययोरयं स्वरूपभेद: क्वचिद् वैचित्र्यमपि लभते। पाणिनीयैर्यस्य शब्दस्य प्रकृति: प्रातिपदिकरूपेण दर्शिता प्रत्ययश्च तद्धितरूपेण, कैश्चित् पूर्वाचार्यैस्तस्यैव शब्दस्य प्रकृतिर्धातुरूपेण दर्शिता प्रत्ययश्च कृदूपेण। पाणिनीया अन्तिकशब्दात्ताद्धितमिष्ठन्-प्रत्ययं प्रकृतेश्च नेदादेशं विधाय नेदिष्ठशब्दं साधयन्ति,पूर्वाचार्यास्तु नेद्-धातो: कृत्संज्ञकमिष्ठन्प्रत्ययं विधाय नेदिष्ठशब्दं निष्पादयन्ति। तदुक्तं क्षीरतरङ्गिण्याम्-'*काल्पनिके हि प्रकृतिप्रत्ययविभागे द्राघिमादय: कस्मिंश्चिद् व्याकरणे धातोरेव साधिता:। एवं नेदिष्ठादयोऽपि नेदित्यादे:*'।[97]

प्रकृत्यर्थप्रत्ययार्थविषयको भेद:

क्वचिद् व्याकरणभेदात् प्रकृत्यर्थे प्रत्ययार्थे च भेदोऽपि जायते। कस्यचिन्मतेन संख्या प्रातिपदिकार्थो भवति, कर्मादयश्च प्रत्ययार्था:। केषाञ्चिन्मतेन संख्या प्रत्ययार्थो भवति, कर्मादयश्च प्रातिपदिकार्था:। केषाञ्चिद् वैयाकरणानां मतेन संख्यार्थ: कर्माद्यर्थाश्च प्रातिपदिकार्था एव। तदुक्तं वाक्यपदीयस्य हरिटीकायाम्-

---

[92] न्या.१/३/२२- 'अस्तिं सकारमातिष्ठते' इति सकारमात्रमस्तिं धातुमापिशलिराचार्य: प्रतिजानीते। तथाहि- न तस्य पाणिनेरेव 'असभुवि इति गणपाठ:, किं तर्हि? स भुवि' इति स पठति।

[93] उ.वृ.,पृ.१८४,पा.व्या.अनु.नाम्नि ग्रन्थ उद्धृतम्।

[94] भ्वाअ.प्र.

[95] निरु.,दुर्ग.१/१३

[96] म.,प्र.५/२/३९

[97] क्षीर.,१/८०

‘*केषाञ्चित् संख्या प्रत्ययेनाभिधीयते कर्मादय: प्रातिपदिकेन। अपरेषां कर्मादय: प्रत्ययेन संख्या तु प्रातिपदिकेन। अपरेषामुभयं प्रातिपदिकेन। क्रियासाधनकालादयोऽपि कैश्चित् कथंचिदभिधीयत्वेन प्रविभक्ता:*[98]इति।

पाणिनीयव्याकरणे प्रकृतिप्रत्ययकल्पनम्-

पाणिनीयव्याकरणे प्रत्ययात् पूर्वं प्रयुज्यमान: पदांश: प्रकृतिशब्दवाच्यो भवति। प्रकृते: परश्च प्रयुज्यमान: पदांश: प्रत्ययशब्दवाच्य:। ***प्रकृते:, परश्च*** इति सूत्रद्वयमेवात्र प्रमाणम्। प्रकृतिर्द्विदा भवति- नामविभक्तिराख्यातविभक्तिश्च। तत्र नामविभक्ते: कारकं संख्या चेत्यर्थ: प्रतीयते, आख्यातविभक्तेश्च काल:,पुरुष: संख्या चेत्यर्थ:। पाणिनिर्लाघवेन सौकर्येण वा शास्त्रप्रवृत्तये सुव्यक्तमल्पाक्षरं बहुप्रयुक्तं ध्वनिं ध्वनिसमूहं वा प्रायेण प्रकृतित्वेन परिकल्पयति। अत एव तेन अभूत्, भूति:, भूतम् इत्यत्र बहुप्रयुक्त: स्वल्पाक्षरश्च ‘भू’ इति ध्वनि: प्रकृतित्वेन कल्पित:, भवति, भवितव्यम् इत्यत्राल्पप्रयुक्ता बह्वक्षरा ‘भव्’ इति प्रकृतिश्च गुणादिना प्रदर्शिता। प्रत्ययकल्पनेऽपि तेनेयमेव सरणिरनुसृता।

**पालिभाषा तस्याः व्याकरणं च –**

पालिभाषायाः उत्पत्तिं स्वरूपं देशकालादिमधिकृत्य मतसन्ततिरस्ति काचिदतिविस्तीर्णा। किन्तु तत्रेदं निश्चितमस्ति यदियं भाषा बुद्धवचनानां भाषा अस्ति, तेन सम्बन्धेन चास्याः नाम पालिरित्यभवत्। संस्कृतमिव पालिभाषा अपि धर्मोपदेशस्य साहित्यसर्जनस्य च भाषा आसीत्। संस्कृतेन सह अस्याः सम्बन्धः पुत्र्या वा भगिन्याः वेत्यत्रास्ति मतवैभिन्यम्। किन्तु एकस्मिन् कालखण्डे इयं भाषा साहित्ये, समाजे च व्यापकं स्थानमभजत। भाषावैज्ञानिकाः एनां भाषां प्रथमप्राकृतम्, मागधीप्राकृतमित्यपि वदन्ति। इयं भाषा संस्कृतेन सह पर्याप्तं साम्यं भजते। अस्या विकासे त्रयः मुख्यचरणाः स्वीक्रियन्ते। कालदृष्ट्या अस्या व्याप्तिः प्रायः क्रैस्तपूर्वात्पञ्चमशतकात् क्रैस्तस्य दशमशतकं यावत्सार्धसहस्रवर्षात्मिका अस्ति।

व्याकरणदृष्ट्या इयं भाषा वैदिकभाषा इव स्वच्छन्दा विभिन्नरूपात्मिका अस्ति। अत्र वैदिकभाषापेक्षया संस्कृतभाषापेक्षया च पर्याप्तं सरलीकरणं दृश्यते। अस्य सरलीकरणस्य उपस्थितिः अस्या भाषायाः उच्चारणादिषु अनुभूयते। संस्कृतभाषायां यादृशानि ऐन्द्र-

[98] वा.,हरि.१/२६

चान्द्र-पाणिनीय-सारस्वतादीनि व्याकरणानि काले-काले अस्तित्वमागतानि तथैव पालिभाषायामपि कच्चायन-मोग्गल्लान-सद्दनीतिप्रभृतीनि सर्वाङ्गपूर्णव्याकरणानि रचितानि। ब्रह्मदेशीयो विद्वान् आशीष केतुः पालिभाषायाः षड् व्याकरणपरम्पराः उल्लेखयति-

१. कच्चायनव्याकरणम्
२. बोधिसत्त्ववाकरणम्
३. सब्बगुणाकरव्याकरणम्
४. मोग्गल्लानव्याकरणम्
५. सद्दनीतिव्याकरणम्
६. सद्दसङ्गहव्याकरणम्

तत्र आसां षण्णां द्वे परम्परे सब्बगुणाकरव्याकरणम् सब्बगुणाकरव्याकरणञ्च कालक्रमेण लोपं जग्मतुः।

कच्चायनव्याकरणम्- इदं व्याकरणं पालिव्याकरणेषु सर्वप्राचीनेषु अन्यतमं मन्यते। अस्य च कर्ता भगवतः बुद्धस्य शिष्यः महाकच्चायनः स्वीक्रियते। अस्य रचना प्रामुख्येण कातन्त्रसमानशैल्या कृता। एकेषामाचार्याणां मतेन बहूनां विदूषां हस्तेनैवास्य परिणतिः शक्याभवत्। अथापि एतदुत्तरवर्तिभिः वैय्याकरणैः अस्याधारेण स्वीयानि शास्त्राणि लिखितानि। तत्र बालावतारः पदरत्नसिद्धिश्च प्रमुखौ स्तः।

मोग्गल्लानव्याकरणाम्- अस्य रचना क्रैस्तस्य चतुर्दशे शतके सिंहलदेशे बभूव। अस्य कर्त्ता मोग्गल्लानमहास्थविरः तदा सङ्घराज आसीत्। असावनुराधापुरस्थे यूपारामविहारे वासं चकार। तत्रैवास्य व्याकरणस्य रचना अभवत्। मोग्गल्लानस्य गणना पाणिनिचान्द्रकात्यायनादिषु महावैय्याकरणेषु क्रियते।

पालिभाषायाः व्याकरणेषु सुतरां व्यवस्थितं मोग्गल्लानव्याकरणमन्यान्यतिशेते। उत्तरवर्तिनः पालिवैय्याकरणाः एनमेव प्रमाणं मत्त्वा स्वीयानि व्याकरणानि प्रणिन्यिरे एतद्व्याकरणमनुसृत्य पालिव्याकरणस्य अनेके ग्रन्था: विरचिताः। यथा – पियदस्सीमहास्थविरकृतं पदसाधनम्, संघराजश्रीशारिपुत्रकृतः पदावतारः, संघराज-संघरक्षितमहास्थविरकृता सुसद्दसिद्धिः, सम्बन्धचिन्ता, सारत्थविलासिनी च,

संघराजवनरत्नमहारत्नकृता प्रयोगसिद्धिः, धर्मकीर्तिप्रणीतः बालावतारः, संघराजश्रीराहुलकृतौ बुद्धिप्पसादनी टीका, पञ्जिकाप्रदीपश्चेत्यादयः।

सद्दनीतिव्याकरणम्- इदं व्याकरणं अन्यपालिव्याकरणेषु विशालतममस्ति। इदं त्रिषु भागेषु विरचितमस्ति। पदमाला-धातुमाला-सुत्तमाला च। अष्टाविंशतिः परिच्छेदानां च अत्र समावेशः भवति। अस्य कर्त्ता ब्रह्मदेशीयो विद्वान् अग्गवंसः आसीत्। अस्य कालः क्रैस्तस्य द्वादशं शतकं स्वीक्रियते।

सद्दसंगहव्याकरणम्- इदं व्याकरणं यू-फ़ो-ह्लैङ् इति ब्रह्मदेशीयेन विदुषा सम्पादितम्। अस्य रचनायां सिद्धान्तकौमुद्याः पद्धति अनुसृता अस्ति।

## पालिव्याकरणपरम्परा

फ्रेन्कनाना विद्वान् R.O. Franke १९०२ मध्ये पालिभाषायाः व्याकरणानां इतिहासस्य प्रारूपं लिलेख। तत्र मुखमत्तदीपनी, कच्चायननिद्देसो, मोग्गल्लानपञ्चिकादीनां व्याकरणग्रन्थानां परित्यागः आसीत्। तस्य कार्यं मुख्यतः कच्चायनसूत्राणि, कच्चायन-वुत्तिः, रूपसिद्धिः, मोग्गल्लानसूत्राणि, मोग्गल्लानवृत्तिः, सद्दनीतिः, इत्येतेषु आश्रितमासीत्। तस्य सीमित ग्रन्थेषु आश्रयेण तस्य कानिचन निष्कर्षाणि कालेन वैधाः न अभवन्। १९२८-३० इत्यवधौ पालि व्याकरणस्य केचन महत्वपूर्ण ग्रन्थानां प्रकाशनमभवत्। स्मिथवर्यः (H. Smith) स्वपरिश्रमेण त्रिषु भागेषु 'A critical edition of Aggvamsas Saddniti' इति ग्रन्थस्य प्रकाशनमकरोत्। १९४९-१९६६ इत्यवधौ स्मिथवर्यः सुत्तेषु प्रयुक्तानां धातूनां तत्रस्थप्रक्रियाविधीनां च सूचीनां खण्डद्वयं प्रचकाश। इदं हि महत्वपूर्णं सग्रहकार्यमभवत् पालिव्याकरणस्य क्षेत्रे। इदं पूर्णतां नागच्छत्। १९८९ सामान्याब्दे पिण्ड इत्याख्यविद्वान् (O H Pind) पालिभाषायाः वर्णोच्चारणमधिकृत्य लेखाः प्रकाशिताः। अनेन पालिविषयकं भाषिकाध्ययनं त्वरामभजत। खर्सनामा विद्वान् (E Kahrs) 1992 सामान्याब्दे सद्दनीतेः कारकप्प-भागे Exploring the Saddniti इति शीर्षकेण निबन्धग्रन्थः (monograph) ग्रथितः।

पालिभाषायाः भाषिकाध्ययनस्य प्रारम्भः अट्ठकथानां प्रणयनकाले प्रारब्धः। बुद्दघोस-धम्मपाल-बुद्धदत्तैः अट्ठकथासु यथावसरं भाषिकतत्त्वानां चर्चा कृता अस्ति[99]। तत्र तैः पदानां व्याकरणं[100] व्युत्पत्तिः[101] आदयः व्याख्याताः सन्ति। इमानि व्याख्यानानि पाणिनेः व्याकरणेन प्रभाविताः सन्तीति भाति। पदानां व्याकरणे एभिः पालिभाषायाः संस्कृतेन (सक्कटभाषा) सह समानानि पाणिनिना वर्णितानि भाषिकतत्वानि अन्वेषितानि। अट्ठकथाकाराणाम् एतत् कार्यम् इदम् इङ्गयति यत् बुद्धघोषात् पूर्वं केनापि पालिभाषायाः व्याकरणेन अवश्यं भाव्यम् इति फ्रेन्कप्रभृतयः अध्येतारः विश्वसन्ति। इदं हि आश्चर्यकारकं तथ्यम् अस्ति यत् अट्ठकथाकाराः कमपि पूर्ववर्तिनं व्याकरणं नोल्लिखन्ति। अट्ठकथाकाराणां भाषाव्याकरणनियमानि विकासक्रमेण मोग्गलान-अग्गवंसादिभिः वैय्याकरणैः सूत्रेषु ग्रथितानि। अट्ठकथासु धातुलकाराणां विवेचनेन वाक्यार्थावबोधस्य मूलतत्त्वानां अन्वेषणं कृतमस्ति। यथा 'अत्थि नाम[102], कथं हि नाम[103], यत्र हि नाम[104] इत्यादौ। मोग्गलानः[105] अग्गवंसश्च[106] इमां चर्चां स्वशास्त्रेषु यथावसरं समाविष्टवन्तौ। बुद्धघोसः विसुद्धिमग्गव्याख्याने उक्ता पंक्तिः विसुद्धिमग्गे-'स्वाक्खातो भगवता धम्मो सन्दिट्ठितो अकालिको एहिपस्सको पनयिको पच्चत्तं वेदितब्बो विञ्ञूही ति' मोग्गलन[107]-अग्गवंसाभ्यां[108] व्याकरणेऽपि प्रस्तुता। तत्र तादृशाः अपि

[99] १/१ इति समन्तभद्दस्स महा-अग्गपण्डितस्स सन्तिके गहितुपज्झेन तंसिस्सस्स समन्तभद्दस्स अग्गपण्डितस्स भागिनेय्य पटि-लद्धतंनानधेय्येन सुसम्पदायेन करणसम्पत्तिजनित-निर्वज्जवचनेन अरिमद्दनपुरवासिना अग्गवंससाचार्येन कतं सद्दनीप्पकरणम् निट्ठितम्।

[100] २/१ सुत्त पिटके २०९, १३-२१०,१(पपञ्चसूदनी=Ps 3/327,14), मनोरथपूरणी (MP) 3/298, 18-299,3. परमत्थजोतिका सुत्तनिपात अट्ठकथा (Sp) 288, 12-15. तथा सम्मोहविनोदिनी (Sv) 425, 26 ff, परमत्थजोतिका सुत्तनिपात अट्ठकथा (Ps) 3/327,16, सम्मोहविनोदिनी (Sv) 569, 15ff, सरत्थप्पकासिनी (Spk) 1/209.45

[101] ३/१ बुद्धघोसः विसुद्धिमग्गे इन्द्रियशब्दस्य भगवाशब्दस्य च व्युत्पत्तिं करोति। पृ. ४९१-४९२. संयुत्तनिकाय अट्ठकथायां चापि भाग १ पृ. १०७ च. (पाणिनिः अपि ५/२/९३, ६/३/१०९)

[102] ४/१ सुत्तपिटके २०९, १३-२१०, १ (पपञ्चसूदनी=Ps 3/297, 14ff) मनोरथपूरणी (MP) 3/298, 18-299. 3

[103] ५/१ सुत्तपिटके २८८, १२-१५

[104] ६/१ सम्मोहविनोदिनी Sv 425, 26ff, पपञ्चसूदनी Ps 3/327, 16. सम्मोहविनोदिनी Sv 569, 15ff, सरत्थप्पकासिनी Spk 1/209,45

[105] ७/१, मोग्ग. ६/३ नामे गरहाविंहयेसु (The future occurs), अत्र मोग्गल्लानः नामशब्दं बुद्धघोसाद् भिन्नतया व्याख्याति। मोग्गल्लानपञ्चिका नामशब्दं अर्थप्रत्यायकस्य (particle) अर्थे वदति। अग्गवंसः च मोग्गल्लानं दूषयन् बोद्धघोसं प्रमाणं स्वीकरोति। तन्मतेन नाम्नः प्रभावः क्रियाणाम् अर्थनिर्धारणे न भवति।

[106] ८/१, सद्द ८९३ कथङ्हिनामयोगेनातीतेनागतस्सेव पयोगे। अर्थात् कदाचित् भूतकालिकप्रत्ययाः भविष्यदर्थम् प्रत्यायन्ति।

[107] मोग्ग ४/२९ तथा अस्य वुत्तिः

[108] सद्द. ७६४

सन्दर्भाः सन्ति ये समावेष्टुं शक्या आसन् किन्तु पालिवैय्याकरणैः न समाविष्टा।[109] अनेन इदं इदं वक्तुं शक्यते यत् पालिभाषायाः भाषिकतत्त्वानामध्ययनस्य आरम्भः अट्ठकथासु उपलभ्यते।

अस्य द्वितीयं चरणं पालिवैयाकरणैः आरभते। तत्र कच्चायनस्य व्याकरणं प्रथमम्। अस्य कालः ४-५ सामान्यशतकम्। उत्तरवर्तिनः वैय्याकरणाः अस्य सूत्रेषु वृत्तौ च समाहितं व्याकरणं समर्धयितुं प्रायतन्त। एते वैय्याकरणाः त्रिपिटकात् उदाहरणानां सङ्कलनेन इदं व्याकरणं प्रावर्धयन्त। तत्र महासन्धिप्पकरण-चूळसन्धिप्रभृतयः ग्रन्थाः प्रमुखाः। एषाम् उद्धरणानि क्वचित् एव उपलभ्यन्ते यथा वज्रबुद्धेः मुखमत्तदीपिन्यां, बुद्धपियस्य रूपसिद्धौ मोग्गलानव्याकरणे, मोग्गलानपञ्चिकायां, सद्दनीतौ च। एषां ग्रन्थेषु तदनुयायिभिः न्याख्यानानि लिखितानि। तत्र पतञ्जलिः मञ्जूषायां कारिकाग्रन्थं भर्तृहरेः अनुकरणेन लिलेख। तत्र च असौ सद्दनीतेः रूपसिद्धेश्च कारकव्याख्यानमपि प्रतिपादयामास।

अयं क्रमः समान्यद्वादशशतकस्य उत्तरार्धं यावत् मग्गलानव्याकरणस्य, अग्गवंसस्य सद्दनीतेः प्रणयनपर्यन्तं चरमं गतः। तस्मात् उत्तरं भाष्यग्रन्थानां टीकाग्रन्थानां च प्रणयनं अस्मिन्नेव ग्रन्थत्रये आधारितमभवत्। कच्चायान-निद्देसो त्रयोदशशतकस्य ग्रन्थः, अस्मिन् पालिभाषायाः व्याकरणप्रवृत्तीनां विवरणमुपलभ्यते। तत्र २४ व्याकरणग्रन्थानाम् उल्लेखोऽस्ति[110]। उल्लिखितव्याकरणग्रन्थेषु प्रसिद्धव्याकरणानाम् मुखम्मत्तदीपिनी-रूपसिद्धिः-सद्दनीति -मोग्गलानव्याकरणप्रभृतीनां ग्रन्थानाम् उल्लेखः अस्ति। तत्रैव च चूळवजिरकृतं अट्ठकथाव्याख्यानं गुणसागरकृतं च मुखमत्तसारः वर्णितौ। अर्वाचीनतमे १७ सामान्यशतकीये पालिभाषायाः व्याकरणे वाचकोपदेसे ६१ पालिव्याकरणानां सूचिः परिशिष्टत्वेन विवृता अस्ति।

सहस्राधिकवर्षेभ्यो विकासमानायाः अस्याः परम्परायाः कानिचन वैशिष्ट्याणि इत्थं सन्ति। इमा पूर्णतया स्वतन्त्रा परम्परा पृथक् धातुपाठगणपाठण्वादिवृत्तिसहितैः परिशिष्टैः समं विद्यमाना अस्ति।

---

[109] देवकर अध्याय १, पृ. २

[110] ९/१ अक्खरपदमञ्जूषा, अक्खरसमूह, अट्ठकथा-अत्थदीपनी, अत्थोजोतक, अत्थविनिच्छयवण्णना, अत्थव्याख्यान, अत्थवण्णना, कच्चायननिस्सयप्पकरण, कारिका टीकाव्याख्या, थेरपोत्थक, (महा-) निरुत्ति, निरुत्तिजोतक, निरुत्तिजोतकवण्णना, निरुत्तिबीजाख्यान, न्यासटीका, न्यासपदीपटीका, न्यासप्पदीपप्पकरण, बालावतार, बीजाख्या, बीजाख्यान, भस्सकारी, मुखमत्तसार, तथा सङ्गहकार

पालिव्याकरणेषु यद्यपि संस्कृतव्याकरणानां उपायाः (technique), संज्ञाकरणम्, व्याकरणविधयः (grammatical concepts), पदविभागश्च (विवरणपद्धतिश्च) स्वीकृताः सन्ति। किन्तु तेषां लक्ष्यरूपेण त्रिपिटकम्, तदुत्तरसाहित्यञ्च अवर्तत तत्रस्थशब्दानां साधुत्वप्रतिपादनहेतुकं शास्त्रं तैः विरचितम्। प्रचलितभाषायाः व्याकरणस्य प्रवृत्तिरपि तेषु अवलोक्यते।

एभिः वैय्याकरणैः प्राकृतव्याकरणैरिव संस्कृतभाषायाः पालिभाषायाः उत्पत्तिः न प्रतिपादिता, अपितु पालिभाषां स्वतन्त्रभाषारूपेण प्रतिपादयितुं व्याकर्तुं च तेषां प्रवृत्तिः। किन्तु ते एतत्प्रतिपादने अपेक्षितं साफल्यं नाभजन्त। तेषां व्याकरणसंज्ञाः नामानि च संस्कृतव्याकरणानां प्रतिच्छायाभूतानि सन्ति, यथा निग्गहो, पग्गहो इत्यादीनि। इदं च प्रसिद्धमस्ति यदेतानि निग्रहो, प्रग्रहो इत्यादीनां विकारभूतानि सन्ति।

पालिव्याकरणानां लक्ष्यम्-

प्राचीनभारतीयविद्यासु व्याकरणस्य स्थानम् अतीव आदृतमवर्तत। वेदाङ्गत्वेन अस्य स्थानं कल्पितम् आसीत्। बौद्धपरम्परायामपि व्याकरणस्य तादृशः एव आदरः आसीत्। धम्मपदे एतत् पठ्यते-

वीततण्हो अनादानो निरुतिपदकोविदो।
अक्खरानं सन्निपातं जञ्ञा पुब्बापराणि च।
सा वे अन्तिमसरीरो महापञ्ञो ति वुच्चति[111]॥

पालिवैय्याकरणैः व्याकरणस्य हेतुः मोक्षविधायकानां बुद्धवचनानां यथार्थबोधः इति स्वीक्रियते[112]। उत्तरकाले धम्मसेनापतिः स्वकारिकासु व्याकरणाध्ययनस्य लक्ष्यं विवृणोति-

'सद्दानुसासनस्स किं पयोजनं ति चे वदे'। 'रक्खोहागमलहूपायासन्देहत्थमेव च'।

स च पतञ्जलिना सह साम्यं भजते- 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्'[113]।

पालिभाषां विहारेषु शिक्षयितुं पाठ्यपुस्तकानां आवश्यकतायाः पूर्तये व्याकरणग्रन्थानाम् रचना अभवत्। पालीव्याकरणानामुद्देश्याः एवं वक्तुं शक्यन्ते-

- कच्चायनव्याकरणस्य वुत्तेश्च रचना अट्ठकथानां रचनापराम्परां नानुसरति[114]।

[111] धम्मपदम् २४/१९

[112] ११/१ सेट्ठं तिलोकमहितम् अभिवन्दियग्गम् बुद्धञ्च  धम्ममममलं गणमुत्तमञ्च। सत्थुस्स तस्स वचनात्थवरं सुबोद्धौम् वक्खामि सुत्तहितमेत्थ सुसन्धिकप्पम्।। कच्चायनव्याकरणे मङ्गलाचरणम्। पदमालायां च आरम्भकारिकासु ७-१३

[113] महाभाष्यम् १/१

- इदं भाषायाः तत्वानां व्यापकम् आलोचनं प्रस्तौति।
- अत्र सन्धिविधानानि लिखितभाषायाः कृते उपयुक्तानि सन्ति।

मोग्गल्लानव्याकरणम्

अस्य नाम 'मागधं सद्दलक्षणम्' इत्यपि अस्ति। इदं पालिभाषायाः कुशलतया ग्रथितं सुव्यवस्थितं च व्याकरणम् अस्ति। सर्वाङ्गसम्पूर्णता अपि अस्य वैशिष्ट्यम् अस्ति। सूत्रापाठेन (सुत्तपाठेन) सह धातुपाठः, गणपाठः, ण्वादिपाठश्च एनं स्वतन्त्रव्याकरणत्वेन स्थापयन्ति। अस्मिन् शास्त्रकर्त्रा मोग्गलानवृत्तिः (मोग्गलानवुत्ति) मोग्गलानपञ्चिका चेति स्वोपज्ञं वृत्तिद्वयम् अपि प्रणीतम्। वुत्तविदम् पठ्यते- 'व्होपन्ते निद्देसा त्वादिसम्बन्धियेव तस्सेव निस्सितत्ता निस्सयकरणम्पि सुत्तकाराचिन्नम्'[115]। अत्र सुत्तकारवुत्तिकारयोः अभेदः अस्ति ना वा इति संशयः उदेति। इदं व्याकरणं सिंहलवासिना स्थविरेण अनुराधपुरस्थे थूपारामविहारे राज्ञः पराक्रमबाहोः (११५३-११८६) शासने ग्रथितम्। नोर्मन् इति विद्वान् K R Norman (1983:165), असौ G.P. Malalasekhara (1928:186) अस्य सन्दर्भेण वदति- ग्रन्थस्य पुष्पिकया ज्ञायते यत् ग्रन्थस्य प्रणयनं ११६५ अब्दसमये जातं स्यात् इति। अस्मिन् व्याकरणे षट् काण्डाः (कण्डा) सन्ति। तत्र ८१० सूत्राणि वृत्ति(वुत्ति)सहितानि प्रकरणशः व्यवस्थितानि सन्ति।

यद्यपि मोग्गल्लानस्य व्याकरणं कच्चायनस्य व्याकरणाद् शैलीभेदेन भिन्नम् अस्ति। किन्तु कच्चायनस्य व्याकरणम् अस्य प्रणयनादुत्तरमपि अध्ययनक्षेत्रे व्यराजत। मोग्गलानव्याकरणस्य विपुला सामग्री कच्चायनात् तस्यपरम्परायाश्च स्वीकृता अस्ति। मोग्गलानवुत्तौ (२/५२) चुल्लनिरुत्तेः सन्दर्भः उपलभ्यते। तथा च २/४६, ३/१९ सूत्रवत्तौ (सुत्तवुत्तौ) निरुत्तिपिटकम् इत्यस्यापि उल्लेखः अस्ति। अट्ठकथानामपि सन्दर्भान् मोग्गल्लानः स्वशास्त्रे बहूत्र उल्लेखयति[116]। अस्य व्याकरणं चान्द्रव्याकरणात् चान्द्रवृत्तेः कातन्त्रस्य च व्याख्याभ्यां देवनन्दी- दुर्गसिंहटीका इत्येताभ्यां भृशं प्रभावितमस्ति। संज्ञाप्रकरणे अयं प्रभावः स्फुटं लक्ष्यते।

---

[114] १३/१ द्र. कच्चा. २०, इत्यत्र प्रयुक्तम् एकमिदाहम् पदे अग्गवंसस्य सद्द. ५० अत्र ननु च भो अम्बट्ठसुत्तसंवण्णातम्..... टिप्पणी

[115] मोग्गलानवुत्ति ६/३८

[116] मोग्गलानव्याकरणम् ६/३

मोग्गल्लानः स्वशास्त्रारम्भे कारिकया अस्य शास्त्रस्य विषयक्षेत्रं स्पष्टयति यत् इदं व्याकरणं मागधभाषायाः व्याकरणम् अस्ति[117]। अत्र अयं निष्कर्षः लेखितुं शक्यः यत् बुद्धस्य भाषा मागधशब्देन सम्बोधनस्य परम्परा पुरा प्राचलत्। पिण्डवर्यः (O. H. Pind) वदति यत् श्रीराहुलः 'पदसन्धानटीका' इति ग्रन्थे निरुत्तिवण्णनां (Nir-vann) जिनः धम्मोपदेशं मागधभाषायामेव कृतवान् इति। अग्गववंसः स्वग्रन्थे लिखति- 'मागधभासा .... मागधभासत्तम् पनपत्त्वा चन्दराभि ति विसुं तिट्ठति'[118]।

यथा हि उक्तं मोग्गल्लानस्य व्याकरणम् अन्येभ्यः व्याकरणेभ्यः व्यवस्थिततरम् अस्ति। अस्य सम्पूर्णशास्त्रं व्यवस्थया लिखितं अथ प्रत्यध्यायमपि प्रकरणानां क्रमः व्यवस्थया कृतः। विभक्तिप्रतिपादनप्रसंगे मोग्गल्लानः पाणिनिरिव चन्द्रगोमिवच्च सूत्राणि वक्ति न तु कच्चायनवत् कातन्त्रवच्च विवरणात्मकवाक्यरूपम्। अनेकेषु अवसरेषु मोग्गलानः कच्चायनस्य सूत्रद्वये द्वयाधिके वापि कृतान् नियमान् एकत्र एकस्मिन्नेव सूत्रे पठति। यथा- 'यवा सरे'[119] इति सूत्रेण कच्चायनस्य 'वोमोदुदन्तानम्'[120] 'यण्णो यन्ना वा'[121] इति सूत्रद्वयविहितं कार्यं एकैनैव साधितम्। अनेन अस्य शास्त्रं लघुत्वगुणयुक्तमभवत्। प्रतिपादने स्पष्टतां वर्धयितुं असौ सामान्यतः पारिभाषिकसंज्ञानाम् उपयोगं न करोति काञ्चन अपवादान् विहाय- सर, व्यञ्जन, रस्स, दीघ इत्यादीन् विहाय। व्याकरणस्य मौलिकतां प्रभावं[122] च वर्धयितुं मोग्गलानः कलापूर्णानि उपायानि (technical devices) उपयुनक्ति, यथा- अनुवृत्तिः इत्संज्ञाः (indicatory letters) इत्यादीनि। पाणिनिवत् चन्द्रगोमिवच्च असौ परिभाषाणामपि प्रयोगं करोति।

मोग्गलानव्याकरणं सूचनानां प्रयोगे (handling) अन्ये द्वे व्याकरणे अतिशेते। अस्य पालिसम्बद्धाः केचन नियमाः अव्याप्तिदूषिताः अपि सन्ति। सद्दनीत्या परित्यक्ताः संस्कृतप्रवृत्तयः (Sanskritism) अनेकाः युक्तयः मोग्गल्लानः प्रयुनक्ति यथा अनुवृत्तिः, इतकरणम्, इत्यादयः अथ च असौ पाणिनिकच्चायनयोः अनेकाः परिभाषाः अपि यथावत् स्वीकरोति। सद्द. ४०,४५। कच्चायनस्य अनुकरणेन मोग्गल्लानः अनेकाः प्राकृतयुक्तयः

---

117 १./१. मोग्ग. ४/९५, ४/११७, ४/१३५-४/१३८

118 सद्द. ५३२

119 मोग्ग. १/३०

120 कच्चा. १८

121 कच्चा २१

122 2./1. पा. सू. ५/३/१ प्राग्दिशो विभक्तिः, कातन्त्रे २/६/२४ विभक्तिसंज्ञा विज्ञेया वक्ष्यन्तेऽतः परं तु ये। अद्व्यादेः सर्वनामास्ते बहोश्चैव पराः स्मृताः॥

(Prakritisms) उपयुनक्ति- घेप्पति[123], चोद्दस[124] कानिचित् रूपाणि च नवानि आविष्कृतानि- अग्गिनि[125]

कच्चायनशास्त्रे मोग्गल्लानेन आनीतानि परिवर्तनानि-

- सर्वमपि शास्त्रगतं संज्ञाकरणं मोग्गल्लानेन प्रथमाध्याये कृतम्।
- मोग्गल्लानः कारकाणां व्याख्यानं न करोति। कारप्रकरणं (कारकप्रकरणम्) च विभक्तिप्रकरणे सम्मेल्य तत् नामरूपप्रकरणे स्थापयति।
- कम्मप्पवचनीयाः गतिसंज्ञकाश्च कच्चायनेन समासविधाने उपदिष्टाः सन्ति मोग्गल्लानश्च तान् स्वातत्र्येण वक्ति। कम्मप्पवचनीयाः मोग्गल्लानेन वाक्यनियमेषु विवृताः सन्ति। गतिसंज्ञकाश्च गतिसमासे उक्ताः।
- स्त्रीप्रत्ययाः, तत्सम्बन्धानि कार्याणि समासाश्च समासविधाने उक्तानि।

| काण्डम् (कण्डो) | सूत्रसंख्या | प्रकरणम् | सूत्राणि |
|---|---|---|---|
| प्रथमम् (पठमो) | ५८ | मङ्गलाचरणम् | ० |
| | | संज्ञाकरणम् (वर्णमाला)(वण्णमाला) | १-१२ |
| | | परिभाषाः | १३-२५ |
| | | सन्धिप्रकरणम्- | २६-५३ |
| | | १. स्वरसन्धिः | २६-३३ |
| | | २. व्यञ्जनसन्धिः | अनियन्त्रित |
| | | ३. निग्रहीत(निग्गहीत)सन्धिः | ३८-४४ |
| | | ४. आगमाः (augments) | ४५-४६ |
| | | ५. विपर्ययः (विपल्लासो) (metathesis) | ५०-५१ |
| | | ६. शब्दानां द्वित्वम्(reduplication) | ५४-५७ |
| | | ७. बहुलकाधिकारः | ५८ |

[123] मोग्ग. ५/१७८
[124] मोग्ग ३/१००
[125] २/१४९

| | | | |
|---|---|---|---|
| द्वितीयम् (दुतीयो) | २४३ | नामविभक्तिप्रत्ययाः (nominal case endings) | १ |
| | | पदविधयः (syntax) | 2-42 |
| | | सुप्प्रत्ययाः | ४३-२४३ |
| तुतीयो (समासकण्डो) | ११० | समासनियमाः | १-१९ |
| | | समासानां लिङ्गवचनानि | २०-२२ |
| | | सामासिकप्रत्ययाः | २३-२५ |
| | | स्त्रीप्रत्ययाः | २६-३९ |
| | | समासान्ताः | ४०-५३ |
| | | सामासिकप्रत्ययाः | ५४-११० |
| | | पुंवद्भावश्च (पुंभाव) | ६७-६९ |
| चतुर्थम् (चतुत्थो) (णादिकण्डो) | १४२ | णिजाद्यर्थकाः प्रत्ययाः Statement of various secondary affixes | १-१२३ |
| | | णिजाद्यर्थकप्रत्ययेषु पदविधयः Morphology of secondary derivativatives | १२४-१४२ |
| पञ्चमम् (पञ्चमो) (खादिकण्डो) | १७९ | खादिप्रत्ययाः | १-१३ |
| | | क्रियार्थाः (क्रियात्था) | १४ |
| | | विकरणाः | १५-२६ |
| | | नामधातवः (gerundives) | २७-३२ |
| | | अन्यप्रत्ययाः | ३३-६८ |
| | | धातुषु द्वित्त्वं प्रत्ययाश्च | ६९-८१ |
| | | प्रत्ययेषु पदविधयः Morphology of primary derivatives- | ८२-१७९ |
| | | १. प्रातिपदिकेषु (stems) | ८२-१३९, |

| | | | |
|---|---|---|---|
| | | विकाराः | १७३-१७९ |
| | | २. प्रत्ययेषु विकाराः | १४०-१७२ |
| (षष्ठो) छट्ठो (त्यादिकण्डो) | ७८ | निपातित (finite) क्रियाप्रत्ययाः | १-१३ |
| | | उत्तम-मध्यम-प्रथमपुरुषाः | १४ |
| | | क्रिया-प्रक्रिया | १५-७८ |
| | | | |

मोग्गलानव्याकरणम्

अनुराधपुरस्य यूपारामविहारस्य भदन्तः मोग्गलानः प्रथमपराक्रमबाहोः समये श्रीलकायाः संघराड् बभूव। असौ पालिव्याकरणस्य लक्षणशास्त्रं प्रणिनाय। तच्च तस्यैव विदुषो नाम्ना मोग्गलानव्याकरणमिति प्रसिध्यते। अस्य मुख्यः भागः सूत्रभागोस्ति। स च कण्डेषु (काण्डेषु) विभक्तोऽस्ति। परिशिष्टाणि च गणपाठण्वादिपाठप्रभृतीनि सन्ति। एभिरेव सर्वाङ्गं मोग्गलानव्याकरणं पूर्णतां याति। अस्य व्याकरणे संस्कृतवैय्याकरणानां तत्रापि विशेषेण आचार्यपाणिनेः गंभीरः प्रभावः दृश्यते।

अत्र व्याकरणे प्राधान्येन आदेशागमाभ्यां प्रत्ययविधानं क्रियते। आदेशश्च कदाचिद् एकाल् भवति कदाचिच्चानेकाल्। एकाल् आदेशः विहितशब्दस्य अन्त्याल्स्थाने भवति न सर्वस्य शब्दस्य। अनेकाल् च सम्पूर्णशब्दस्य स्थाने भवति। तत्र अपवादरूपेण विपरीतमपि दृश्यते यत् अनेकाल् आदेशः अन्त्याल्स्थाने भवति एकाल् च सर्वस्य शब्दस्य। इमे अपवादाः अनुबन्धैः प्रस्तूयन्ते। पाणिनिना अनेकाल् आदेशाः अन्त्यवर्णस्थाने स्युरिति निर्देष्टुं ङित् इत्यनुबन्धकरणं चिह्नितम्[126]। इत्थमेव च मोग्गलानोऽपि अनुकरोपि। एकाल् आदेशः चानेकाल् शब्दस्य स्थाने कर्तुं शकारबन्धः पाणिनीयशास्त्रे प्रयुज्यते[127]। किन्तु मोग्गलानः टकारानुबन्धं तत्र करोति।

आगमानां प्रायः त्रीणि स्थानानि भवन्ति। आदिरन्तः अन्त्यस्वरात्पूर्वं च। अन्त्यालां सम्भवाः आगमाः उभावाचार्यौ पाणिनिमोग्गलानौ ककारेणानुबध्नुतः[128]।

[126] ङिच्च। पा.सू. १/१/५२

[127] अनेकाल्शित्सर्वस्य। पा. सू. १/१/५३

[128] आद्यन्तौ टकितौ

अन्त्यस्वरात्पूर्वम् आगमं निर्देष्टुमपि उभावेव मकारमित्कुरुतः[129]। शब्दस्यादौ आगमं वक्तुं पाणिनिः टकारमित्करोति मोग्गलानस्तु मकारम्।

सूत्रकरणे विशेषणेन विशेषणान्तशब्दस्य निर्देशः क्रियते[130]। आनन्तर्ये वाच्ये पञ्चम्याः विभक्त्याः[131], षष्ठ्याश्च प्रयोगः स्थानिनः वाच्यं क्रियते। सप्तमी विभक्तिरानन्तर्ये वाच्ये प्रयुज्यते[132]। इमानि प्रयोगाणि उभयाचार्ययोः शास्त्रयोस्समानानि।

शास्त्रस्य रचनाक्रमेऽपि समानानि कानिचित् उभशास्त्रयोः सन्ति। तत्र प्रमाणाध्याये (प्रमाणकाण्डे च) उभाभ्यामपि आदेशागमविभक्तिसम्बन्धिनियमाः अन्ये च विशेषनियमाः कृताः। संक्षेपकरणार्थं पूर्वाचार्यैः प्रयुक्ताः युक्तयः आभ्यां स्वीकृताः।

पालिभाषायाः व्याकरणेषु रचनायाः अवलोकितेन पौर्वापार्यम् ऐतिह्यं नानुमातुं शक्यते इति तेषां रचनाशैल्याः अन्यं वैशिष्ट्यम् भवति। इदं वैशिष्ट्यं अनुसन्धातॄणां काठिन्यमेव जनयति। अस्य केचन अपवादाः उपलभ्यन्ते। ते च शास्त्रकाराणां अवधानकृता न सन्ति।

प्रथमकाण्डे न द्वे वा इतिसूत्रं पठ्यते[133] तत् पालिभाषायां न्यूनतयैव परिपाल्यते। संस्कृतभाषायाम् एकत्र स्वरद्वयं पौर्वार्येण शब्देषु प्रायः नोपलभ्यते। प्रगृह्याः प्लुतस्वराश्च स्वरेभ्य पूर्वं भवन्ति अथवा पूर्वस्थ व्यञ्जनलोपकारणेन शिष्टाः स्वराभासाः। पालिभाषायां अन्यत्र वा प्राकृतेषु स्वरेषु सहस्थितिः भवितुमर्हति अथवा प्रकृतिभावेन ते सहैवोपतिष्ठन्ति। वैदिकभाषायामपि इदं दृश्यते। पालिभाषायामपि गद्यपद्यभेदेन पृथक् स्थितिः भवति। गद्येषु स्वरविषये असन्धिः पद्येषु सन्धिः प्राचुर्येण दृश्यते। छन्दोबद्धतायाः स्वरेषु सन्धीनाञ्च सम्बन्धः तेषां गुरुलघुतायाः संस्कृतभाषायाः विधानेष्वपि द्रष्टुं शक्यते। पालि-प्राकृतयोः वैदिकसंस्कृते च एतन्नियमेऽपि शैथिल्यं भवति।

प्रश्लेषक्षैप्राभिनिहितसन्धीनां विधानं पालिवैय्याकरणैरपि विधीयते किन्तु अस्यापि पालनं पालिभाषायां न्यूनमेव क्रियते। संस्कृते एव एतादृक्सन्धयः आधिक्येन भवन्ति। तथैव यण् सन्धेः अयादिसन्धेरपि विधानं[134] मोग्गलानः स्वशास्त्रे करोति। संयुक्तवर्णानां

---

129 मिदचोऽन्त्यात्परः। पा.सू. १/१/६०

130 अणुदित्सवर्णस्यचाप्रत्ययः पा.सू. १/१/७२

131 तस्मादित्युत्तरस्य

132 तस्मैन्निति निर्दिष्टे पूर्वस्य

133 १/२८

134 १/३०-३२

विषयेऽपि[135] अस्य शास्त्रे सूत्राणि कृतानि। अनुस्वारसन्धावपि[136] अत्र विधानान्युपलभ्यन्ते।

द्वितीयकाण्डे मोग्गलानाचार्यः नामरूपाणां साधुत्वं प्रतिपाद्यते। अत्र विषये २०१ (४३-२४३) सूत्राणि प्रणीतानि। इमानि सूत्राण्येव आधुनिककाले पालिभाषायां नामरूपाणां साधुत्वसाधनानि सन्ति। नैकाः नामरूपसंग्रहाः अपि एतदाधारेण प्रचलिताः सन्ति। तत्र २०१ सूत्रेषु ४२ प्रारम्भिकसूत्राणां विषयः पाणिनीयसूत्रेभ्यः एव स्वीकृतः अस्ति। तानि इत्थं सन्ति-

| मोग्गलानसुत्तम् | पाणिनीयसूत्रम् |
|---|---|
| २/२ | २/३/२ |
| २/३ | २/३/५ |
| २/४ | १/४/५२ |
| २/५-८ | १/४/५२-५३ तत्र वार्तिकानि च |
| २/९ | २/३/४, तथा २/३/२ इत्यत्र वार्तिकम् |
| २/१०-१२ | १/४/१०-९१ |
| २/१३ | १/४/८५ |
| २/१४ | १/४/८६ |
| २/१५ | १/४/८७ |
| २/१६ | २/३/९ |
| २/१७ | २/३/९ |
| २/१८ | २/३/१८ |
| २/१९ | २/३/१९ |
| २/२० | २/३/२०,२१ |
| २/२१ | २/३/२३ |
| २/२२ | २/३/२४ |
| २/२३ | २/३/२५ |
| २/२४ | २/३/२६ |
| २/२५ | २/३/२७ |
| २/२६ | २/३/१३ |
| २/२७ | १/४/४४ इत्यत्र वार्तिकम् |

[135] १/५३,३४, ३५, ३६, ४८-५१
[136] १/३८-४५

| | |
|---|---|
| २/२८ | १/४/२४, २/३/२८ |
| २/२९ | १/४/८८ |
| २/३० | १/४/९२ |
| २/३१ | २/३/२९ |
| २/३२ | २/३/३२ |
| २/३३ | २/३/३२ |
| २/३४ | २/३/३६ |
| २/३५ | २/३/३५ इत्यत्र वार्तिकम् |
| २/३६ | २/३/३७ |
| २/३७ | २/३/३८ |
| २/३८ | २/३/४१ |
| २/३९ | २/३४६ |
| २/४० | ३/३/४७ |
| २/४१ | २/३/५ |
| ४/४२ | ३/२/७२ |

यानि च विषयप्रतिपादने आवश्यकसूत्राणि सूत्रेषु न गृहीतानि तानि वृत्तौ समाविष्टाणि सन्ति। इदं तत्थ्यं २/२७-२८ सूत्रयोर्वृतावधिकतरं स्फुटीभवति। अत्र सूत्रयोः प्रायः द्वादशपाणिनीय सूत्राणां नैकेषां च वार्तिकाणां ग्रहणं कृतं विद्यते। एवं सत्यपि तत्र पालिभाषायां मूलस्वरूपं तस्या आक्षुण्णता चादृते वर्त्ततः। अस्याप्येकमुदाहृणं इत्थं सम्भवति- संस्कृते उपसर्गाणांप्रयोगः प्रायः कर्मप्रवचनीयत्वेन क्रियते। अनेन च धातुषु मूर्धन्य विकाराः न भवन्ति। यथा सु इत्युपसर्जने कर्मप्रवचनीये सति सुषिक्तं इति प्रयुज्यते। सु उपसर्जने च कर्मप्रवचने असति सु सिक्तम् इतिवद् भवति। तत्र अर्थभेदोऽपि भवति प्रयोगभेदेन। प्रथमप्रयोगस्तु प्रशंसार्थकः सष्ठु सेचनं कृतमित्यर्त्थे सु सिक्तं भवता इतिवद् भवति। द्वतीयश्च व्यङ्ग्ये प्रयुज्यते सुष्ठु न सिञ्चितमित्यर्थकः सुषिक्तं भवता इति। पालिभाषायां षकारस्य अभावेन एतत्प्रकारकाः सूक्ष्मप्रयोगाः न भवन्ति। अस्य अयमपि प्रभावोऽस्ति यदत्र संस्कृतस्य परि अनु उप अधि एते कर्मप्रवचनीयाः गृह्यन्ते प्रति च पति इतिरुपेण गृह्यते। सु इत्ययं च परित्यक्तमस्ति।

विभक्तिनां विभक्त्यर्थस्य च प्रतिपादने कृते तेषां प्रयोगेण शब्दरूपनिर्माणमपि अत्र व्याकरणे प्रदर्शितमस्ति। तदनु तृतीयकाण्डे समासविधानस्य शास्त्रमाचार्येण प्रत्यपादि। चतुर्थ्यर्थे षष्ठ्याः प्रयोगः प्राचीनभाषायाः काचित् प्रवृत्तिः। पालिभाषायामस्यापि

भेदलोपेन नियमनं कृतं विद्यते। द्विवचनस्यापि लोप इदमेव पथमनुसरति। द्विवचनप्रयोगस्य न्यूनतया व्याकरणेऽपि तत्कृते तिस्रः एव प्रत्यया विहिताः औ भ्याम् ओस् इति। प्रयोगश्च स्वाभाविकयुग्मान् विहाय गौण एव। इयं प्रवृत्तिः पालिभाषायां द्विवचनलोपे कारणीभवति। मोग्गलानव्याकरणे समासेषु द्वन्द्वादयः पारिभाषिकशब्दाः परित्यक्ताः सन्ति। तृतीयकाण्डे आदौ द्वाविंशतिसूत्रेषु पाणिनीयक्रमेणैव समासव्याख्यानं कृतमस्ति -

अव्ययीभावः २-९ सूत्रपर्यन्तम्

- तत्पुरुषः १० सूत्रे
- कर्मधारयः ११ सूत्रे
- नञ्समासः १२-१६ सूत्रपर्यन्तम्
- बहुव्रीहिः १७-१८ सूत्रपर्यन्तम्
- द्वन्द्वः १९ सूत्रे
- समाहारद्वन्द्वः २० सूत्रे
- द्विगुः २१सूत्रे
- एकवचनान्ततत्पुरुषः २२ सूत्रे

चतुर्थकाण्डे पदेषु समासम्भवविकाराः परिगणिताः। तत्रैव (२६-३९ सूत्रेषु) च स्त्रीप्रत्ययाणां नी इनीप्रभृतीनामप्युल्लेखोऽस्ति। अनेन हि भिक्खुनी यक्खिनीत्यादयः शब्दाः साध्यन्ते।

पञ्चमे षष्ठे च काण्डे तद्धितानां कृदन्तानां च विधानं क्रियते। अत्र कृदन्तेषु विकरणविधानमपि सम्पद्यते यो हि मुख्यतः तिङ्गन्तविषयोस्ति। इदं च शास्त्रं वैज्ञानिकव्युत्पत्तिमूलकं न सत् व्यवहारमूलकमिति तु अत्र ज्ञातुं शक्यते।

अन्तिमे उपान्त्यकाण्डे च मुख्यतया क्रियाविषयः प्रतिपादितः अस्ति। अत्र लकारव्यवस्था विकरणव्यवस्था च संस्कृतव्याकरणानुकारिण्येव। धातूनां प्रायः यथावत् स्वीकृतावपि तेषु गणव्यवस्था परिवर्तिता अस्ति। तनादिजुहोत्यादिगणयोः परित्यागः क्रियते। अस् दा इमौ द्वावपि धातू भ्वादिगणे पठ्यन्ते। भा (ज्ञा), की (क्री) एतौ च ज्यादि क्यादि इति पृथक्

गणद्वयविशेषकल्पनेन तत्र पठ्यन्ते। भेदानां कल्पनायां मुख्यकारणं दन्त्यमूर्धन्यभेदः मूलः अस्ति। मूलरूपेण दन्त्यानां मूर्धन्यपाठः इमानि परिवर्तनानि उत्पादयति।
लकारव्यवस्था च इत्थं स्वीकृता अस्ति-

क) कालभेदाः-

१. वर्त्तमानकालः (=लट्) ६/१ सूत्रे

२. भूतकाल (=लुङ्) ६/४ सूत्रे

३. परोक्ष (=लिट्) ६/६ सूत्रे

४. भविष्यत् (=लृट्) ६/२ सूत्रे

ख) भूतकालस्याङ्गभूताः-

५. अनद्यतनः (=लङ्) ६/५ सूत्रे

ग) वर्त्तमानकालस्याङ्गभूताः-

६. हेतुफलम् (=विधिर्लिङ्) ६/८ सूत्रे

७. प्रश्न-प्रार्थनाविधिः (=लोट्) ६/९,१० सूत्रयोः

घ) भविष्यत्कालस्याङ्गभूताः- (लृङ्विकारः)

८. अतिपत्तिः (=लृङ्) ६/७ सूत्रे

आशीर्लिङ्लुट्लकारौ नोपलभ्येते पालिव्याकरणे न च लकारेषु द्विवचनं क्वचिद्भवति।

तृतीयोऽध्यायः

# संस्कृतव्याकरणे कारकाणां विभक्तीनां च स्वरूपम्

- पाणिनीयव्याकरणे कारकाणां विभक्तीनां च प्रतिपादनम्।
- उत्तरवर्तिवैयाकरणैः विहितं कारकव्याख्यानम्।

कर्तृकारकव्याख्यानम् –

स्वतन्त्रः कर्ता इति सूत्रकारेण पाणिनिना कर्तृकारकं व्याख्यातम् । अत्र सूत्रस्थं स्वातन्त्र्यमेव कर्तृलक्षणत्वेन अनुवर्तिभिः वैय्याकरणैः चर्चितं वर्तते । कात्यायनः स्वतन्त्रस्य कर्तृसंज्ञायां हेतुमत्युपाख्यानं कर्तव्यम्[137],[138] इति वार्तिकेन हेतुमतः अपि कर्तृत्वं स्वतन्त्रकर्तृत्वेन वक्ति । पतञ्जलिस्तु इदं वार्तिकं न समर्थयति यतः तन्मतेन हेतुमति अपि कर्तरि तस्य क्रियां कर्तुं न कर्तुं वा सामर्थ्यं भवत्येव अतः स स्वयमपि स्वतन्त्रः सन् कर्तृत्वमाप्नोति ।

स्वातन्त्र्यं व्याख्यानम् पतञ्जलिः स्वातन्त्र्यस्य तन्त्रमात्रं संकीर्णमर्थं निराकुर्वन् स्वप्राधान्यं स्वातन्त्र्यं स्वीकरोति ।[139] तत्र च कर्मणि निकीर्षा अनिकीर्षा वा उभेप्यन्तर्भवतः । भर्तृहरिप्रभृतयः व्याख्यातारोऽपि इदं समर्थयन्ति ।

प्रयोजककर्तारमधिकृत्य पाणिनिः तत्प्रयोजको हेतुश्च स्वतन्त्रं सूत्रं सूत्रयति । तन्मतेन प्रयोजककर्ता कर्तृकारकस्य अन्यः भेदः । पतञ्जलिः अपि उभयविधयो कत्रोः स्वातन्त्र्यं पृथक्त्वेन स्वीकरोति । एवं त्रयाणां मुनीनां नियमेषु मुख्यक्रियायाः व्यवहारस्य आश्रयः कर्ता स्वीक्रियते ।

पतञ्जलिना भाष्ये प्रस्तुतस्य व्याख्यानस्य विशदने कैय्यटः "नानुकुर्वतीति चेत् स्वतन्त्रः' 'कुर्वन् स्वतन्त्रो अकुर्वन् न' इति स्वातन्त्र्यस्य स्पष्टीकरणं व्यदधात् । अस्य विवेचनेन भाष्यकारस्य मतम् अधिकतरं सुग्राह्यं भवतीति । अनेन च "काष्ठानि पचति" "स्थाली पचति" इत्यादावपि शाब्दबोधः सुकरः भवति ।[140]

---

137 पा.सू. १/४/५४

138 "      " तत्र वार्तिकम् (म.भा.) पृ. २७८

139 स्वप्रधान इति गम्यते

140 पा.सू. १/४/५५

भर्तृहरिः पाणिनीयां कर्तृकारकपरिभाषां यथायथं स्वीकृत्य पुनः स्वातन्त्र्यं निर्धारयन्नाह यत् कर्ता स्वीयं सामर्थ्यम् अन्यस्रोतोभ्य: स्वातन्त्र्येण अर्जयती । अनेन अन्यकारकाः न्यग्भवन्ति । ते च कर्तुः निर्देशस्य आधीनाः सन्तः स्वातन्त्र्येण आत्मानं कर्तारं न परिवर्तयितुं शक्नुवन्ति, कर्तरि तत् सामर्थ्यं विद्यते । हेलाराजः पदमञ्जर्याम् इदं युक्तियुदं विशदयति ।

कर्त्रतिरिक्तानां कारकाणां कर्तृकारकत्वेन प्रयोगविषये भर्तृहरिः विवक्षायाः परिवर्तनं कारणत्वेन निर्धारयति ।[141] तन्मतेन क्वचित् कर्मणि (क्रियायां) किञ्चिदेकं वस्तु कारकत्रये निर्धारयितुं शक्यते ।[142] असौ च कर्मणां उत्पत्तिविषयकानां दार्शनिकमतभेदानामपि कारकाणां निर्धारणप्रसंगे भूमिकां निरूपयति ।[143] इममपि प्रसंग हेलाराजः कर्तृकारकनिर्धारणे चचर्यति ।[144]

वृत्तिकारोऽपि स्वतन्त्रः कर्ता इत्यत्र प्रत्याख्यानम् अकृत्वा कर्तुः स्वतन्त्र्यरूपं लक्षणं विचारयन् क्रियायां प्रधानभूतं कारकं कर्तारं वक्ति । तत्र हि अगुणभूतः इत्यपि अन्यद्विशेषणम् असौ प्रयुनक्ति ।[145] जिनेन्द्रबुद्धिः प्रधानभूतम् अगुणभूतम् च देवदत्तः पचति स्थाली पचति इति उदाहरणद्वयेन स्पष्टयति ।[146] असौ वदति देवदत्तः आस्ते, शेते देवदत्तः इत्यादिषु देवदत्तस्य प्राधान्यम् अन्यकारकाणामभावे न सिध्येत परन्तु अगुणभूतत्वं तु अस्त्येव ।[147] वक्तु प्रयोगे क्रियानिष्पत्तौ यस्य इच्छा अभिव्यज्यते स स्वतन्त्रः भवतीति वृतिकारः स्वातन्त्र्यं निरूपयति ।

प्रयोजक कर्तारमप्यसौ द्विधा विभनक्ति प्राथमिकद्वितीयकत्वेन । भिक्षा वासयति इत्यत्र द्वितीयकः प्रयोजककर्ता भवेदिति ।[148]

हरदत्तः काशिकावृत्तिव्याख्याता स्वतन्त्रः कर्ता इति व्याख्याने स्वतन्त्रः इति पदस्य अर्थत्रयं निरूपयति तत्र च तृतीयमेव प्रधानरूपमर्थं प्रकृतसूत्रे स्वीकरोति ।[149][150] भर्तृहरेः

---

141 म.भा. पृ. २७९

142 वाक्य. सा. १०३

143 बुद्ध्यावस्थाभिर्भेदे च परिकल्पते कर्मात्र करणत्वञ्च कर्तृतञ्चोपजायते । वाक्य. सा

144 वाक्य. सा. १०५-१०८

145 वाक्य. पृ. ३१४-३१६

146 इति प्रधानभूत उच्यते अगुणभूतो यः क्रियासिद्ध स्वातन्त्र्येण विवक्ष्यते तत् कारकं कर्तृसंज्ञं भवति । काशिका, ५८३

147 काशिका पृ. ५८४

148 एवं मन्यते-प्रधानेनागुणभाव उपलक्ष्यते गुणभावो यत्र नास्ति स कर्तेति । कारकान्तर विवक्षायाम् अगुणभावोस्तस्येति । काशिका, पृ. ५८४

149 तत्रैव, पृ. ५८४

150 तत्रैव, पृ. ५८५

कारिकाणामपि समर्थनं अनेन प्रदर्शितम् । वृत्तिकारस्य अगुणभूतरूपं स्वातन्त्र्यम् अपि हरदत्तः स्वीकरोति ।[151] कैय्यटोक्तं कर्तुः क्रियाश्रयत्वमसौ सोद्धरणं समर्थयति ।[152] द्वितीय- कर्तुरपि स्वातन्त्र्यरूपमहाभाष्यकारमते अस्य स्वीकारः अस्ति ।[153]

भाषावृत्तिकारः विप्रेण पच्यते, क्रिया जायते, ओदनः सिध्यति इत्येतेषां व्याख्यानेन कर्तुः, हेतुमत्कर्तुश्च पाणिन्युक्तस्वरूपं निरूपयति ।[154] पुरुषोत्तम मतं वृत्तिकारमेवानुसरति ।[155] सृष्टिधरः भाषावृत्यर्थव्यावृत्तौ पुरुषोक्तं कर्तृनिरूपणं विषदयति ।[156] रामचन्द्रः प्रयोगरत्नमालायां पूर्वाचार्याणां मतं स्वीकरोति स्वतर्कैश्च पुष्णाति ।[157] तत्र व्याख्याकार: विठ्ठलाचार्यः वृत्तिकारदिशा स्वातन्त्र्यमगुणभूतत्वेन स्पष्टतया व्याकरोति ।[158] शब्दकौस्तुभे भट्टोजिदीक्षितः कर्तृत्वं नाम प्रधानक्रियाश्रयत्वानि व्याख्याति 'भर्तृहरेः समर्थनमपि तत्र प्रदर्शयति 'धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते' ।[159]

कौण्डभट्टः वैय्याकरणभूषणसारे भट्टोजिदीक्षितम् अत्र प्रसंगे समर्थयति विवृणोति च । पुनरपि अधिकं विशदयन् कौण्डभट्टः कर्तृकारकं तत्सम्बद्धां तृतीयाविभक्तिं चर्चयति तत्रासौ क्रियाश्रयं कर्तारं निर्णयति । यथा वक्ता क्रिया समूहादेकां क्रियां चित्वा प्राधान्येन वदति । तस्या एव क्रियायाः आश्रयः कर्तृत्वेन उक्तः भवति ।[160] अर्थात् तृतीयाविभक्त्या कर्तृत्वेन प्रधानक्रियायाः आश्रयः उच्यते इति ।[161]

कौण्डभट्टः 'कारकचक्रप्रयोक्तृत्वं कर्तृत्वम्' 'कृत्याश्रयत्वं कर्तृत्वम्' इति व्युत्पत्तिद्वयमपि निराकरोति स्वव्याख्याने ।

कैय्यटः भाष्यकारस्य मतं कर्तुः अन्यकारकाणां प्राधान्यं समर्थयति । काष्ठानि पचन्ति, स्थाली पचति इत्यत्र विशेषचर्चया असौ क्रियापदप्रतिपादितव्यापारस्य आश्रयत्वेन कर्तुः प्राधान्यं निरूपयति ।

---

151 स्वं तन्त्रम् अस्य—स्वं धनं तन्त्रम् साधारणम् अस्य..स्वात्मा तन्त्रम् प्रधानमस्य इति । तत्रैव, पृ. ५८३

152 तत्रैव, पृ. ५८४

153 तत्रैव, पृ. ५८४

154 तत्रैव, पृ. ५८३

155 अगुणभावः अचेतनेषु चेतनेष्वपि संभवति । तत्रैव, पृ. ५८४

156 अन्ये तु अगुणभूत धातूपात्तव्यापारः कर्तेत्यर्थः । तत्रैव, पृ. ५८४

157 तत्रैव, पृ. ५८४

158 क्रियासिद्धौ अगुणत्वेन विवक्षितो यः स कर्ता स्यात्, विप्रेण पच्यते । क्रिया जायते, ओदनः सिध्यति । भाषा. पृ. ४७

159 क्रियासिद्धौ अगुणभावेन विवक्षितो योऽर्थोः...सः कर्तृसंज्ञाः, तत्रैव, पृ. ४०४

160 स्वातन्त्र्यं नाम इतरकारकयोज्यत्वे सति सकलकारकाप्रयोक्तृत्वम्, तत्रैव, पृ. ४०४

161 यदीयो व्यापारो धातुनोच्यते स कर्ता, तत्रैव, पृ. ४०४

कौण्डभट्टः इमे परिभाषे अव्याप्तिदोषदूषिते समीक्षते । यथा 'दण्डः करोति' इत्यत्र । यतः दण्डे भ्रमणगतिः न भवति न च वाक्ये अन्यकारकैः सह अस्य सम्बन्धः अपि उक्तः भवति कर्मण: सम्पादनार्थम् । कर्म च अनेन स्वयमेव सम्पादितं भवति ।[162]

अयं वैय्याकरणं एकं उपनिषदः सन्दर्भमुपस्थापयति –'एतमितः प्रेत्यासंभवितास्मि' अत्र हि जीवात्मा कर्तृत्वेन सहैव च कर्मत्वेन उक्तः अस्ति । वैय्याकरणमतेन च एकं कारकम् एकस्मिन्नैव वाक्ये द्विधा प्रयोक्तुं वैय्याकरणाः नानुमोदन्ते । किन्तु वाक्यस्य साधुत्वमत्र सिद्धमेवास्ति ।[163] कौण्डभट्टमतेन त्रिविधं कर्तृत्वम् –

- शुद्धः
- प्रयोजकः
- कर्म कर्ता चेति ।

तत्र अन्तिमौ द्वौ अन्यकर्तृसम्बद्धौ भवतः ।[164] इदमपि विधानं पूर्वाचार्याणां सम्मतमेव । लघुमञ्जूषाकारः नागेशः 'कर्तृत्वञ्च कर्तृप्रत्ययसमभिव्याहारे धात्वर्थनिष्ठविशेष्यता निरूपित प्रकारतानाश्रयत्वे सति तद्धात्वर्थाश्रये वर्तते ।[165] इदं च लक्षणं 'तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वे सति तद्धात्वर्थाश्रये वर्तते' इति अन्यलक्षणानुसारी । नागेशः स्वतन्त्रः कर्ता इति पाणिनीयं सूत्रम् इत्थं व्याचष्टे। बृहच्छब्देन्दुशेखरे असौ तृतीयाविभक्तिसम्बन्धप्रत्यययार्थस्य व्याख्यानेनापि कर्तृत्वं विशदयति ।[166] नागेशः नैय्यायिकमतं निरसयति यत्र कर्ता कृतेः अधिकरणं भवति स च वैयाकरणस्वीकृतं क्रियोक्त व्यापाराश्रयमेष कर्तारं व्याचष्टे। नागेशानुसारं कर्तुः व्यापारस्य च मध्ये अच्छेदकसम्बन्धः भवति ।

नैय्यायिकाः सजीवमेव क्रियाधिकरणं कर्तृत्वेन गृह्णन्ति निर्जीववस्तु गौणतयैव कर्तृत्वमर्हति । भवानन्दसिद्धान्तवागीशादय: मुख्यतया इदं मतं पुरस्कुर्वन्ति ।[167] नागेशमते तृतीया विभक्त्याः प्रत्ययार्थेन इदं न ज्ञातं भवति यत् नैय्यायिकाः प्रतिपादयन्ति । अतः तेषां मतं स्वयमेव निरस्यते ।[168]

[162] सर्वार्थागुणीभावः स्वातन्त्र्य, तत्रैव, पृ. ४०४

[163] धातूपात्तव्यापाराश्रयत्वं स्वातन्त्र्यं...धातुनोक्तक्रियाकारके कर्तृतेष्यते, शब्दकौस्तुभः, भाग २, पृ. १३९

[164] वैय्याकरणभूषणसारः, पृ. १६७

[165] तत्रैव, पृ. १६७

[166] एवञ्च आश्रयमात्रं तृतीयार्थः, तत्रैव, पृ. १६९

[167] तत्रैव, पृ. १६७

[168] जीवस्यैव युक्तम्, तत्रैव, पृ. १६८

पाणिनीयेतरव्याकरणेषु कर्तृकारकनिरूपणम् –

कलापव्याकरणम्- 'यः करोति सः कर्ता' इतिरूपेण शर्ववर्मा कर्तृकारकस्य परिभाषां करोति ।[169] इदं व्याख्यानं व्युत्पत्तिमूलकम् अस्ति । अथ च एतल्लक्षणनुसारं प्रयोजककर्ता शुद्धकर्तुः भिन्नतया उपतिष्ठति अथवा अस्य लक्षणस्य व्याप्तिः प्रयोजककर्तारं न व्याप्नोति।[170]

तत्र व्याख्याकारः दुर्गसिंह उदाहरणद्वयेन शर्ववर्मणः परिभाषां स्पष्टयति – 'चैत्रेण हन्यते' 'चैत्रेण कृतम्' इत्यत्र चैत्रस्य कर्तृत्वं स्फुटं भवति । द्वितीयोदाहरणेन चेदं स्फुटतरं भवति यत् करोति इत्यस्य व्याप्तिः भूतकालिकक्रियामपि व्याप्नोति ।[171]

पञ्जीव्याख्याकारः त्रिलोचनः अपि दुर्गं समर्थयति स्वव्याख्यायाम् ।[172] अस्यैव व्याकरणस्य व्याख्याकारः सुषेणाचार्यः स्वव्याख्याने पाणिनिकृतं कर्तृलक्षणं मीमांसमानः स्वपूर्वैः व्याख्यातृभिः कृतानि कर्तृलक्षणानि निराकरोति । स्वातत्र्यं समीक्षमाणोऽसौ प्रेरितक्रियायाः कर्तरि इदं लक्षणं नोपपद्यते इति तस्य तर्कः । यथा 'राज्ञा आज्ञापितः पुरुषः क्रियां करोति' इत्यत्र । अत्र प्रयोजकः राजा अस्ति कार्यं च पुरुषः निवर्तयति । तस्य इदमपि मतमस्ति यत् पूर्वाचार्याणां लक्षणे स्वीकृते तु एतादृक्प्रसंगेषु प्रेरक/प्रयोजक एव कर्ता भवति नान्यः इति । शुद्धकर्तरि तु इदं लक्षणमुपपद्यते यथा देवदत्तो भवति ।

पुनरग्रे व्याख्यायमानः सुषेणाचार्यः वदति यत् स्वतन्त्रे कर्तरि तु क्रियमाणक्रियायाः ज्ञानं भवति तस्मिन् क्रियाया: निवर्तनं प्रति इच्छा भवति अथ च आन्तरिकक्रिया अपि भवति (प्रयत्नरूपा) । अनेन इदं लक्षणं सजीवमात्रे एव युज्यते, निर्जीवपुनर्न प्रसज्येत । यथा 'रथो गच्छति' इत्यादौ । क्रियाश्रयत्वं कारकत्वमिति समीक्षमाणः असौ वदति यत् क्रियायां तु व्यापारफले उभेऽपि अन्तर्भवतः, कर्तरि च व्यापारः एव आश्रितः भवति न हि फलम् । फलस्य आश्रयः कर्म भवति । अतः इदं लक्षणम् अस्वीकार्यम् । 'ओदनः पचति' इत्यस्यापि साधुत्वम् अनेन भवति । घटो नष्टः इत्यादौ अपि इदं लक्षणं न प्रवर्तेत । यतः अत्र क्रियायां वर्तमानस्य व्यापारस्याश्रयः घटः नास्ति--- ।

सुषेणः व्यापारविशेषस्याश्रयभूतत्वं येन अन्ये व्यापाराः प्रवर्तन्ते तस्य कर्तृत्वं नाङ्गीकरोति । यथा 'देवदत्तो भवति' इत्यत्र कर्ता अन्यकारकरहितः एकलः एव अस्ति

---

169 तत्रैव, पृ. १७१

170 तत्रैव, पृ. १६६-१६९

171 तत्रैव, पृ. १६७

172 कर्तृत्वञ्च कर्तृसंज्ञाबोधि-कर्तृशक्तिमत्वम्, लघुमञ्जूषा, पृ. १३४२

वाक्ये । तत्र वैय्याकरणैः कर्तृसम्बद्धं स्वातन्त्र्यं क्रियायां व्यापाराश्रयत्वम् अस्ति । येन अन्यकारकाणां व्यापारः नो हन्यते । सुषेणः एतन्मतं न स्वीकरोति । असौ दुर्गसिंहस्यैव मतं समर्थयति यत् क्रियायां प्रधानव्यापाराश्रयः एव कर्ता भवति । वैय्याकरणसम्प्रदाये सामान्येन इदं मतं स्वीक्रियते ।[173]

चान्द्रव्याकरणे तृतीयाविभक्त्याः सन्दर्भेण कर्तृकारकस्य प्रतिपादनं करोति चन्द्रगोमी आचार्यः । यथा 'चैत्रेण कृतम्' इत्यत्र तृतीयाविभक्तिः अनुक्तकर्तुः प्रत्यायनं करोति । अनुक्तकर्ता क्रियापदे प्रयुक्तप्रत्ययसम्बन्धेन ज्ञातः भवति । अत्र तु तृतीयाविभक्त्या एव कर्तुरभिज्ञानम् । अयं प्रयोजककर्तुः प्रयोज्यकर्तुरपि संक्षिप्तचर्चां करोति । तत्र च मूलसिद्धान्ताः त्रिमुनिव्याकरणानुसारिण एव ।

क्रमदीश्वराचार्यः स्वसंक्षिप्तसारे सूत्रद्वयं 'स्वतन्त्रः कर्ता' तत्प्रयोजको हेतुश्चेति सम्मेल्य एकं सूत्रं करोति- 'क्रियामुख्यप्रयोजकौ कर्ता' ।[174] तत्र स्वतन्त्ररूपं लक्षणं क्रियामुख्य इति शब्देन प्रतिपादिम् । प्रयोजके कर्तरि अपि अनेन स्वतन्त्रं व्याख्यानं न व्यधायि। व्याख्याकारजुमरनन्दी क्रियामुख्यस्याभिप्रायम् अन्येभ्य: कारकेभ्य: प्रधानः इति वदति । अस्य मतेन कर्ता अन्यकारकाणां प्रधानः भवति स च अपेक्षितक्रियायाः पूर्तये अन्यकारकाणां प्रवर्तनाय सामर्थ्यवान् भवति ।[175] अन्यः व्याख्याता गोपिचन्द्रः जुमरनन्दिनः तर्कान् एव विशिष्य व्याचष्टे। तन्मतेन केषुचित् प्रसङ्गेषु अन्यकारकाणां प्रवर्तनस्य अपेक्षा न भवति। यथा – आस्ते विप्रः इत्यादिषु । जुमरनन्दी कर्तरीतरकारकाणां प्रवर्तनाय द्विविधसामर्थ्यं धारयति । तदायो जनार्हः इत्यादि स्पष्टीकरणेन कर्तुरर्हता निर्धारत्यासौ ।[176]

जैनेन्द्रः स्वीये जैनेन्द्रव्याकरणे स्वतन्त्रः कर्ता इति पाणिनीयं सूत्रमेव स्वीकरोति कर्तृकारकप्रतिपादने ।[177] प्रयोजककर्तृप्रातिपादने च किञ्चित्परिवर्तनेन स्वीयं सूत्रं करोति = तद्योजको हेतुश्च ।[178] तत्र तस्य अभिप्रायो भिन्नताविशेषः नास्ति ।

तत्र व्याख्याकारः अभयनन्दी पाणिनीयपरम्परामाश्रित्यैव स्वीयं व्याख्यानं प्रस्तौति । स्वतन्त्रं च आत्मात्मप्रधानम् इति स्वीकरोति । प्रयोजककर्तृप्रतिपादने तु पतञ्जलिमतं

---

173 तत्रैव, पृ. १३४२

174 तादृशव्यापाराश्रयता-समानाधिकरण-कर्तृताशक्तिमान् अर्थ इति तत्त्वम्, बृहच्छब्देन्दुशेखरे, पृ. ८६९

175 लघुमञ्जूषा, पृ. १३४२

176 लारकचक्रम्, पृ. १४

177 यत्तु..रथेन गम्यते इत्यादावचेतने असम्भवाच्च विभक्तौ लक्षणानौत्यस्य प्राग् निवेदितत्वात् । लघुमञ्जूषा, पृ. १३४४

178 कालाप, सू. २२०

प्रयोजितकर्तुः स्वातन्त्र्यं (समर्थयति)[179] अथापि निर्जीवेऽपि कर्तृत्वं वस्तु विवक्षाधीनं स्वीकरोति[180] महाभाष्यसम्मतम् । प्रयोजककर्तरि अभयनन्दी जिनेन्द्रबुद्धेः मतं विशदीकुर्वन् तत्र द्वैविध्यम् उपस्थापयति प्राथमिकद्वितीयकतया । द्वितीयकप्रयोजक यथा – भिक्षा वासयति ।[181]

शब्दानुशासने हेमचन्द्रः पाणिनीयं सूत्रं स्वतन्त्रः कर्तेति यथावत् स्वीकरोति ।[182] पूर्वव्याख्यानमेव उरीकुर्वन् स्वातन्त्र्यं प्राधान्यत्वेन प्रतिपादयति ।[183] प्राधान्ये च कारणं वक्तुः विवक्षां निर्दिशति ।[184] कर्तृविषयकं ऊहापोहे अनेकैः उदाहरणैः असौ स्वमतं विवृणोति । यथा देवदत्तः पचतीत्यत्र पचतिक्रियापदमेव कर्तारमपि इङ्गयति । इदं उक्तकर्त्रुदाहरणं विधाय अनुक्तकर्तारम् उदाहरति – जिनदत्तेन कृतम् तृतीया विभक्त्या ।

निर्जीवकर्तार: – स्थाली पचति इति विविच्य अभौतिकमपि तत्र निदर्शयति, यथा- चोरस्य रूजति रोगः । प्रयोजककर्तृप्रतिपादनं करोति यथा – देवदत्तेन पाचयति चैत्रः ।[185]

स्वातन्त्र्यविवेचने भर्तृहरिमतमप्युलिख्य तत्र समर्थनं प्रकटयति हेमचन्द्रः ।[186]

बोपदेवः मुग्धबोधे कर्तृकारकनिर्देशाय ‘घ’ संज्ञां इति एकाक्षर संज्ञां करोति । अस्य व्याख्या वैय्याकरणेन न कृता ।[187]

व्याख्याकारः दुर्गादासः ‘घ’ विवरणे कलापकारं शर्ववर्मणमनुसरति । नैय्यायिकसम्मतं कर्तुः सजीवभूतत्वमपि अनेन तर्कितम् (क्रियायाः धारणाय) ।[188]

तत्रापि व्याख्याकारः रामतर्कवागीशः कर्तृव्यपदेशाय ‘घ’ संज्ञया विवरणं करोति । व्युत्पत्तिलभ्यञ्चार्थं स्वीकरोति । कर्तृशब्दस्यार्थनिरूपणे पाणिनेः वृत्तिकारस्यापि मतं

---

[179] कारयति यः स हेतुश्च । तत्रैव, पृ. २२१

[180] तत्रैव, पृ. २१६

[181] तत्रैव, पृ. २१७

[182] तथा च पाणिनीः धातुवाच्यव्यापार इत्युक्तम्, तत्रैव, पृ. २१७

[183] चान्द्र, पृ. १७४

[184] संक्षिप्त सार, सू. १, पृ. ९४

[185] कारकेषु यो मुख्यास्तदायोजनार्हः स कर्तृसंज्ञो भवति, तत्रैव, पृ. ९५

[186] तत्रैव, पृ. ९५

[187] जैनेन्द्र व्या. १/२/१२४

[188] तत्रैव, पृ. १/२/१२५

प्रस्तौति । अस्यानुसारं क्रियाश्रय एव कर्ता भवति । अधिकरणकारकाद् भेदं प्रतिपादनाय असौ कर्तारं क्रियायाः साक्षात् अधिकरणम् इति प्रकारेण निर्धारयति ।[189]

सारस्वतव्याकरणेऽपि पाणिनीयं सूत्रं साक्षादेव प्रतिपादितम् अस्ति । स्वतन्त्रः कर्ता इति । कर्तृकारकञ्च क्रियापदप्रतिपादितस्य प्रधानव्यापारस्याश्रयः वर्तते ।[190] व्याख्याकारः चन्द्रकीर्तिः अस्य विस्तरं वदति समर्थयति च ।[191] अन्यः टीकाकारः रामाश्रमः कर्तृकारकव्याख्याने मौनः दृश्यते ।

संक्षिप्तसारे व्याकरणे सुपद्मः स्वतन्त्रः कर्ता, तत्प्रयोजको हेतुश्चेति सूत्रद्वयं सम्मेल्य स्वतन्त्रतत्प्रयोजकौ कर्ता; इति सूत्रयति ।

अस्य व्याकरणस्य टीकाकारः विष्णुमित्रः उक्तसूत्रे वैदुष्यपूर्वा व्याख्यानं प्रास्तौत् । स्वतन्त्र इत्यस्य तात्पर्यं वदन्नाह यत् अन्यकारकाणां क्रियानिष्पत्तये प्रवर्तने सामर्थ्यं स्वातन्त्र्यमिति । तच्च मुख्यतया विवक्षाधीनमेव वक्तुः । अस्य मतेन तत्कर्तृकारकं भवति यत् क्रियानिष्पतौ जायमानव्यापाराणां प्रधानव्यापारस्य आश्रयः भवति । प्रयोजककर्तुरपि युक्तियुक्तं विवरणमनेन कृतम् ।[192]

हरिनामामृतव्याकरणस्य प्रवक्ता जीवगोस्वामी पाणिनीयस्य व्याख्यानस्य अनुकरणेन कर्तृकारकं व्याख्याति – स्वतन्त्रतत्प्रयोजककर्तृ[193] इतिसूत्रेण । तत्र कर्तृशब्दः कारकशब्दस्य विशेषणीभूतः अस्यानुसारम् । कर्तुः भेदद्वयः उक्तम् अनुक्तञ्च असौ प्रतिपादयति । प्रयोजककर्तुरपि विस्तृतं व्याख्यानमनेन व्यधायि ।[194]

प्रयोगरत्नमालाकारः पुरुषोत्तमविद्यावागीशः पाणिनीयमेव सूत्रं स्वशास्त्रे उपदिश्य तद्व्याख्यानेन कर्तृकारकं प्रतिपादयति ।[195,196] वक्ता कदाचित् मुख्येतरान् व्यापारान् उक्त्वा द्वितीयकवस्तुषु कर्तृत्वम् आरोपयति इत्यसौ उदाहरणैः साधयति । यथा 'असिच्छिनत्ति' ।[197] भिक्षा वासयति विप्रम् इत्यादिषु ।

---

189 स्वतन्त्र आत्मप्रधानः...अनिच्छायाम् अकरणात्, तत्रैव, पृ. १०२

190 इह स्थाली पचति इति स्वातन्त्र्यं विवक्ष्यते । तत्रैव, पृ. १०२

191 तत्रैव, पृ. १०३

192 शब्दानुशासनम्, २/१/२

193 तत्रैव, पृ. ६८

194 तत्रैव, पृ. ६८

195 तत् करणादीन् प्रयुक्ते...न तैः प्रयुज्यते । तत्रैव, पृ. ६८

196 साधनहेतु विशेषभेदकं कर्ता, मुग्ध, कारक, सू. ९

197 यः करोति स कर्ता इति शर्ववर्मा कृत्याश्रयः कर्तेति, तार्किकाः, तत्रैव, पृ. ५७

## पाणिनीयव्याकरणे कर्मकारकविवेचनम्

कर्तुरीप्सिततमं कर्म इति पाणिनि: कर्मकारकं व्याचष्टे। एतेन च सूत्रेण न सर्वं कर्मकारकं व्याख्यातं भवतीति पुनरपि सूत्रद्वयं प्रणीतम्- तथायुक्तं चानीप्सितम्, अकथितञ्च इति। पतञ्जलि: पदकृत्येन सूत्राणामेषाम् औचित्यं ज्ञापयति। पाणिन्युक्ते प्रकृते मुख्यसूत्रे तत्र तमब्ग्रहणस्य अभिप्रायं प्रकाशयति असौ। तदनुसारं तमप: अभावे तु कर्मकारकं (लक्षणं) क्वचित् अपादाने व्यभिचरेत् वारणार्थानामीप्सित: इत्यनेन। तत्र प्रसङ्गे ईप्सितमपादानम् ईप्सिततमञ्च कर्म भवति। यथा-अग्नेर्माणवकं वारयति इत्यत्र माणवक: ईप्सिततम:। तथैव च पयसा ओदनं भुङ्क्ते इत्यत्र कर्तुरीप्सिततमम् ओदनस्य भोजनं न हि पय:पानं पयस: आस्वादनं वा। अत: तमप्प्रत्ययेन ओदनरूपकर्मण: साधुत्वं भवति।

समानमेव अन्यदपि उदाहरणं तत्र प्रस्तूयते- माषेषु अश्वं बध्नाति। अत्रापि ईप्सितयो: द्वयो: अधिकतरम् ईप्सितं यद् भवति तदेव कर्मसंज्ञं भवति।

पतञ्जलि: अन्येनापि प्रसङ्गोद्धरणे सूत्रोक्तकर्मण: व्याप्तिं विशदयति-'ये त्वेते राजकर्मिणो मनुष्यास्तेषां कश्चित्कंचिदाह-"कटं कुर्विति। स आह-"नाहं कटं करिष्यामि, घटो मयाऽऽहृत:' इति तस्य क्रियामात्रमीप्सितम्" यद्यपि तस्य क्रियामात्रमीप्सितं, यस्त्वसौ प्रेषयति तस्योभयमीप्सितम्भवति'। अत्र वाक्योक्तकर्तृभेदेन कर्मणि अपि भिन्नता प्राप्ता भवति।[198]

तथायुक्तं चानीप्सितमिति च अन्यप्रयोगाणां केषाञ्चन साधुत्वप्रतिपादनाय प्रतिपादितं लक्षणम्। यथा विषं भुङ्क्ते। अस्य चोदाहरणस्य कदाचित् ईप्सितत्वं संभाव्य[199] पुन: अन्यप्रयोगान् उदाजहार ग्रामान्तरम् अयं गच्छन् चोरान् पश्यति, अहिं लङ्घयति, कण्टकञ्च मृद्नाति।[200]

---

198 ये त्वेते राजकर्मिणो मनुष्यास्तेषां.........तस्योभयम् ईप्सितम्। तत्रैव, पृ.२६२

199 विषं भक्षयति मैतदस्ति................विषभक्षणमेव ज्यायो मन्यते, तत्रैव, पृ.२६३

200 तत्रैव, पृ.२६३

अनीप्सितार्थान्वयाय पुनरपि स्पष्टयति यदयं प्रसज्य प्रतिषेध: न सन् पर्युदास: इति- 'ग्रामान्तरमयं गच्छन् वृक्षमूलान्युपसर्पति, कुड्यमूलान्युपसर्पतीति। अत्रापि सिद्धम्। कथम्? अनीप्सितमिति नायं प्रसज्यप्रतिषेध:, ईप्सितं नेति। किं तर्हि? पर्युदासोऽयं- यदन्यदीप्सितात्तदनीप्सितमिति।[201],[202]

अकथितञ्च इति सूत्रेण पाणिनि: केषाञ्चन अन्येषां प्रयोगाणां साधुत्वं प्रतिपादयति। मुख्यत: द्विकर्मकधातूनां प्रयोगे सति एतादृशं कर्मत्वं प्रयुक्तं भवति। एतद्विधं कर्म त्रिविधं भवति-अपादानादिकारकस्थाने प्रयुक्तम्, कर्तृस्थानप्रयुक्तम्, तृतीयञ्च उभयो: स्थाने सामान्येन प्रयुक्तम्। अनेन च प्रधानगौणकर्मणो: अपि भेद: स्फुट: भवति।

गां दोग्धि पय: इत्युदाहरणे पय: दोग्धु: ईप्सितं कर्म वर्तते। गोशब्दश्च गो: पयस: अपायकारणात् अपादानकारकमपि अस्ति। किन्तु दोहनरूपक्रियोक्तव्यापारस्य गो: शरीरं प्रति कृतत्वात् वक्तु: विवक्षा गो: कर्मकारकरूपेण प्रयोगे अस्ति इत्यत: अपादाने वाच्ये उक्तं गोरूपं कर्म गौणं कर्म भवति। ईप्सितं च पयोरूपं प्रधानं कर्म।

अस्य सूत्रस्य प्रयोगान् स्वयमेव पतञ्जलि: द्विकर्मकधातूनां दुहियाचिरूधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ। ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविना।[203]

अन्यान्यपि कानिचिदुदाहरणान्येतत्प्रतिपादयितुं पतञ्जलि: प्रस्तौति- गाम् अन्वरूणद्धि व्रजम् ,पुत्रं धर्मं ब्रूते इत्यादौ प्रथमोदाहरणे व्रजम् अधिकरणमस्ति गो: अवरोधस्य किन्तु वक्तु: विवक्षया इदं कर्मत्वेन प्रयुज्यते तथैव द्वितीयोदाहरणे पुत्र: सम्प्रदानम् अस्ति तच्च वक्तु: विवक्षया कर्मत्वेन उच्यते।[204] उभेऽपि गौणे कर्मणी इति तु स्पष्टमेव। एतादृशाण्येव

---

201 तत्रैव, पृ.२६३

202 अनीप्सितम् इति नायं प्रसज्यप्रतिषेध:, किं तर्हि? पर्युदासोऽयम्। यद् अन्यद् ईप्सितात् तद् अनीप्सितम् इति। तत्रैव, पृ.२६३

203 दुह्याचिरूधि..........अकीर्तितमाचरितं कविना॥ तत्रैव, २६४.

204 दुहि-गां दोग्धि पय:, नैतद् अस्ति। कथिताऽत्र पूर्वापादानसंज्ञा......पुत्रं ब्रूते धर्मम्.........कथिताऽत्र पूर्वा सम्प्रदानसंज्ञा, तत्रैव, पृ.२६५-२६६

अन्यान्यपि उदाहरणानि अस्मिन् क्रमे उक्तानि भाष्यकृता-माणवकं पन्थानं पृच्छति, पौरवं गां भिक्षते, वृक्षम् अवचिनोति फलानि, पुत्रम् अनुशास्ति धर्मम् इत्यादिषु सर्वत्र अकथितञ्च इति सूत्रं प्रवर्तते।[205] अत्रापि गौणकर्माणि अन्यकारकस्थाने प्रयुक्तत्वात्।[206] गौणकर्मणि विशिष्टां कल्मसंज्ञामपि निर्दिशति पतञ्जलि:।[207]

अनेन प्रकारेण पतञ्जले: कर्मकारकव्याख्यानस्य मुख्यतत्वानि प्राप्तुं शक्यन्ते। यथा तमप्प्रत्ययस्यौचित्यम् अपादानादीनां अन्यविभक्तीनां कर्मकारकात् भेददर्शनाय इति। अनीप्सितकर्मणि च पर्युदासप्रतिषेधेन स्पष्टीकरणम्। अकथितकर्मणि च संभावितप्रयोगाणां गणनया तस्य च गौणकर्मरूपेण औचित्यप्रतिपादनम्।[208]

कैय्यट: तादर्थ्यात् ताच्छाब्द्यं भविष्यतीति[209] विवरणपुरस्सरं भाष्योक्तमतानां पोषणे प्रवर्तते। तत्र विवरणे पच्धात्वर्थरूपेण व्यापारद्वयं प्रामुख्येण निरूपयन् तण्डुलौदनयो: स्थितिं पाककर्मगतां प्रदर्शयति। औदनगतविक्लितिरूपफले च ईप्साम् ईप्सितकर्म साधयति।[210] भर्तृहरि: कर्मकारकं दार्शनिकदृष्ट्या व्याख्यायन् ईप्सितं त्रिधा विभनक्ति निवर्त्यप्राप्यविकार्यत्वेन। पाणिनीयं कर्मकारकविवरणमपि चतुर्धा विभज्य वक्ति असौ-१. ईप्सितं कर्म, २.अनीप्सितं कर्म, ३. कारकान्तरात् कर्मत्वं प्राप्ता: प्रयोगा:।[211]

वाक्यपदीये त्रिविधकर्मण: प्रतिपादने वैशेषिकाणाम् आरम्भवादस्य सांख्यानां च सत्कार्यवादस्य च सङ्गते: साधनमुद्दिष्टम्।[212] निवर्त्यकर्मण: उत्पत्तौ आरम्भवादिन: क्रियाया: पूर्वमविद्यमानस्य कर्मण: कर्त्रा अनुष्ठितव्यापारेण सर्वथा नूतनाम् उत्पत्तिं

---

205 न प्रश्नाद् एवापायो जायते..........भिक्षित: सन् यदि ददाति ततोऽपायेन युज्यते, तत्रैव, पृ.२६६

206 दुह्याचि...........ब्रुविशासिगुणेन च यत्सचते..........। तत्रैव, पृ.२६४, गुण: साधनं प्रधानकर्म........तेनान्यत्, सचते सम्बध्येत इत्यर्थ:, कैयट:, तत्रैव, पृ.२६६

207 कालभावाध्वगन्तव्य: कर्मसंज्ञाह्यकर्मणाम्, देशश्च, तत्रैव, पृ.२७०-२७१

208 विपरीतं तु यत्कर्म तत्कल्म कवयो विदु:.........असमाप्तं कर्मकल्म, पृ.२७१

209 तत्रैव, पृ.२६१

210 विकारविशेषप्रतिपादनाय गौणार्थपरिग्रह:। महाभाष्यम्, पृ.२६४

211 निर्वर्त्यञ्च विकार्यञ्च...............यच्चाप्यन्यपूर्वकम्॥, वाक्य. सा. ४५-४६

212 तत्रैव, सा.-४९

प्रतिपादयन्ति। सत्कार्यवादिन: क्रियाया: पूर्वं कारणे अव्यक्तरूपेण विद्यमानस्य कर्मण: कर्त्रा अनुष्ठितव्यापारेण अभिव्यक्तिमात्रं स्वीकुर्वन्ति। यथा-घटं करोतीत्यादौ।[213]

विकार्यकर्मण: उत्पत्तिं द्विविधां निर्दिशति भर्तृहरि:-

- कारणस्य विनाशेन कर्मण: उत्पत्ति:।
- कारणे परिवर्तनेन कर्मण: उत्पत्ति:।

इन्धनस्य विनाशेन भस्म उत्पद्यते तत् विकार्यकर्मण: प्रथमप्रकारकम् उदाहरणम्। अपरं च यथा हेम्न: गलने कृते स्वर्णाभूषणस्य निर्माणं विकार्यकर्मण: उदाहरणमस्ति।[214] इदं विशदयति भर्तृहरि: उदाहरणेन यथा घटं करोति इत्यत्र वाक्ये वक्ता घटोत्पत्तिरूपं फलं प्रामुख्येण वदति। तत् निर्वर्त्यं कर्म भवति। विकार्यकर्म च हेलाराज: उदाहरणेन वदति- मृदं घटं करोति। अत्र च वाक्ये कर्मण: उत्पत्तौ तस्य कारणं प्रामुख्येण उच्यते तद् विकार्यमिति।[215]

प्राप्यं कर्म पूर्वोक्तोभयविधकर्मभ्यां भिन्नम्। अस्य कर्मण: उत्पत्तौ कारणे न किमपि परिवर्तनम् अपेक्ष्यते।[216] यथा- 'आदित्यं पश्यति' इत्यत्र कर्तु: क्रियया आदित्यरूपकर्मणि न किमपि परिवर्तनम् उत्पाद्यन्ते। इदं हि प्राप्यं कर्म। प्राप्यकर्मणा सह कर्तु: व्यापारेण प्राय: सम्बन्धोऽपि न स्थापित: भवति।

भर्तृहरि: कर्मकारकस्य लक्षणं न करोति अपितु कर्मभेदप्रतिपादने तस्य रूचि: मुख्या। पाणिनि: त्रिविधकर्मणां प्रतिपादनं करोति। ईप्सितम्, अनीप्सितम्, अकथितञ्च। तत्र ईप्सितकर्मणि कात्यायन: भेदत्रयं निरूपयति- निर्वर्त्यं कर्म, विकार्यं कर्म, तृतीयं कर्म भेदं च नामोद्देशं विनैव प्रतिपादयति।[217] पतञ्जलि: इदं पूर्वोक्तं कर्मविभाजनं स्वीकरोति।

---

[213] यदसज्जायते सद्वा..........तन्निर्वर्त्यम्। तत्रैव, सा.४९

[214] प्रकृत्युच्छेदसम्भूतम्.......सुवर्णादिविकारवत्, शा.५०

[215] वाक्य. पृ.२६८.

[216] क्रियाकृत-विशेषणम्...........तत् प्राप्यम् इति कथ्यते, तत्रैव, सा.५१

[217] कर्मायणे, पा. ३/२/१

अनीप्सितमपि कर्म द्विप्रकारकं प्रतिपादयति। विकार्यकर्मणि अपि विभिन्ना: प्रकारा: तेन निरूपिता: वाक्यपदीये। कर्मकारके दार्शनिकपक्षोऽपि तेन समीक्षित:।

हेलाराज: भर्तृहरे: 'निर्वर्त्यञ्च विकार्यञ्चेत्यादिकारिकाया: टीकायां कर्मकारकविषयकं स्वीयं वैशद्यं प्रकाशयति।[218] भर्तृहरिप्रतिपादितस्य कर्मकारकस्य दार्शनिकविवरणे अपि हेलाराज: सम्यक् चर्चां करोति।[219] तदनुसारं ये केचन कर्मण: ज्ञानेन कर्मणि तात्विकपरिवर्तनं स्वीकुर्वन्ति तदयुक्तमिति।[220]

काशिकाकार: कर्तुरीप्सिततमं कर्म इति सूत्रं व्याख्याति-'कर्तु: क्रियया यद् आप्तुम् ईष्टतमं तत् कारकं कर्मसंज्ञं भवति।[221] इदं व्याख्यानं विशदयन्ती बालमनोरमाटीका आह- आप्ति: सम्बन्ध:, ईप्सितं च सम्बद्धुम् ईष्यमाणम्' इति। अर्थात् कर्त्रा क्रियया सम्बद्धुमिष्यमाणं कर्मकारकं भवति। काशिकाया: मतम् भाष्यकारविवरणात् स्वातन्त्र्येण उक्तम् अस्ति। भाष्यकारस्तु ईप्सितशब्दं रूढार्थग्रहणेन व्याचष्टे। उत्तरवर्तिभि: वैय्याकरणै: वृत्तिकारमतमेव आदृतम्। सूत्रे तमप्प्रत्ययमपि असौ भाष्यानुकरणेन व्याचष्टे। उदाहरणेनैकेन स्पष्टयति च- पयसा ओदनं भुङ्क्ते।[222] माषेष्वश्वं बध्नाति इत्यनेन च उदाहरणेन स्वीयं व्याख्यानं समर्थयति। उक्तवाक्ये अश्वस्य सम्बद्धमाषै: योक्तुमिष्टं न तु बद्धुर्माषैस्सह इति। अत: अश्व: कर्म भवति।[223]

वृत्तिकार: अत्र कर्मसंज्ञाविधायकसूत्रे कर्मपदस्य पाठमपि प्रश्नेन युङ्क्ते यदत्र अधिशीङ्स्थासां कर्म इति सूत्रात् कर्मपदम् अननुवर्त्य कथं पुनरपि प्रकृतसूत्रेण पाठ इति। पुन: समाधत्ते यत् पूर्वोक्तसूत्रे कर्मपदम् आधार इति तत्सूत्रं पूर्वस्यामनुवृत्तौ पठितम्

---

[218] तत्रैव, पृ.२६८

[219] तत्रैव, पृ.२६८-२७०

[220] दर्शनादिक्रियाकृतविशेषन्तभो विकार: सर्वत्र विद्यते...............न क्रियाकृतो विकार: कश्चित्, पृ.२७०-२७१

[221] काशिका. पृ.५६४

[222] तमब्ग्रहणं किम्? पयसौदनं भुंक्ते, तत्रैव, ५६५.

[223] माषेष्वश्वं बध्नाति। कर्मण: ईप्सिता: माषा: न कर्तु:, तत्रैव, पृ.५६५.

आधारपदेन सहैवानुवर्तेत तेन च अनीष्टप्रसङ्गापत्तिः। तत्प्रसङ्गपरिहाराय पुनः पाठ इति।[224]

भाष्यकारः अनीप्सितकर्मसंज्ञाभाष्ये तथायुक्तमिति पदं न व्याचख्यौ इदं वृत्तिकारेण विवेचितमस्ति। तदनुसारम् ईप्सितकर्मणि कर्मणा सह यादृशः सम्बन्धः स्थापितः भवति तादृशः एव सम्बन्ध अनीप्सितेऽपि कर्मणीति।[225] अनीप्सितपदम् अपि भाष्यकारानुकरणेन विशदयति। तदनुसारम् अनीप्सितम् द्विधा अवगन्तुं शक्यते। १.द्वेष्यम्, २.तदितरञ्च। अत्र अनीप्सितं नाम ईप्सितादन्यत् यत् तत् इति।[226]

द्वेष्यकर्मणः उदाहरणं दर्शयति-विषं भक्षयति, चोरान् पश्यति।[227] अन्यप्रकारस्य च उदाहरणम्- ग्रामं गच्छन् वृक्षमूलान्यपसर्पति[228] इति। इदं हि उक्तम् उदासीनं कर्म अस्ति।

अकथितञ्च[229] इति सूत्रव्याख्याने वृत्तिकारः पतञ्जलिम् अनुसरति। भाष्योक्तकारिकां 'दुह्याचिरूधी'[230]त्यादिकामुद्धरन् कञ्चित् प्रकाशविशेषं चिक्षेप।

जिनेन्द्रबुद्धिः कर्मकारकविवरणे वृत्तिकारमतं पोषयन् तत्र कर्तुरीप्सिततमं कर्म इति सूत्रे ईप्सितपदस्य अर्थं विवृणोति। तदनुसारम् ईप्सितपदस्य रूढोऽर्थः अभिप्रेतः इति भवति। स चात्र न युज्यते। यदि कर्तुरभिप्रेततमं कर्म इतिवत् सूत्रार्थः क्रियते चेत् कर्तुः क्रिया ईप्सिततमम् एषु शब्देषु युक्तिसम्मतः सम्बन्धः न स्थापयितुं शक्यते। अतः वृत्तिकारोक्तं व्युत्पत्तिलभ्यम् अर्थमेव असौ समर्थयति।[231] स्वयमपि ईप्सितपदार्थं विशदयति।[232] तत्रैकम् उदाहरणं प्रस्तौति जिनेन्द्रबुद्धिः- नदी कूलं कर्षति। उक्तवाक्ये नदी निर्जीवपदार्थः

---

224 कर्मेत्यनुवर्तमाने पुनः कर्मग्रहणम् आधारनिवृत्यर्थम्……….सर्वं सिद्धं भवति, तत्रैव, पृ.५६६

225 तेन प्रकरणे कर्तुरीप्सिततम………..अनीप्सितं युक्तं भवति, तस्य कर्मसंज्ञा विद्यते, तत्रैव, पृ.५६८

226 तत्रैव, पृ.५६८

227 तत्रैव, पृ.५६८

228 तत्रैव, पृ.५६८

229 केनाकथितम्? अपादानादिविशेषकथाभिः, तत्रैव, ५६९

230 तत्रैव, पृ.५७०

231 ईप्सितशब्दोह्यस्तिरूढिशब्दः………तत्रेह क्रियाशब्दो गृह्यते नेतरः, न हि रूढिशब्दस्य क्रियायाः कर्तृशब्दसम्बन्धो उपपद्यते, तत्रैव, पृ.५६४-५६५

232 तत्रैव, पृ.५६३

कूलकर्षणे चास्या: अभिप्राय: अशक्य:। अनेन उदाहरणेन स इदमपि स्थापयति यत् व्याकरणं शब्दसाधुत्वबोधकं शास्त्रम्, किन्तु जागतिकपदार्था: न तथा साधुत्वनियमिता: भवन्ति। जागतिकपदार्थानुगुणं व्याकरणेन साधुत्वस्य साधयितव्यं भवत्यत: अत्र प्रसंगे व्युत्पत्तिलभ्योऽर्थ: साधीयान् इति।[233]

अकथितकर्मविवरणे असौ याच्भिक्षधात्वो: अर्थभेदं दर्शयन् वदति यत् याच्धातौ प्रार्थनाभाव: अस्ति, स हि भिक्षधातौ नास्ति।[234] पतञ्जलिपरिगणितद्विकर्मकधातुभ्य: अन्यदपि 'जि'धातुमपि जिनेन्द्रबुद्धि: अकथितञ्चेति प्रसंगे उपस्थापयति तत्रोदाहरति च- 'देवदत्तं शतं जयति'।[235]

हरदत्त: ईप्सितकर्मण: व्याख्याने ईप्सितकर्मविषये ईप्सितार्थं विवेचयति न्यासटीकानुसारम्।[236] उदाहरणे-माषेष्वश्वं बध्नातीत्यत्र बध्नाति क्रियापदोक्तत्वेन अश्वस्य कर्मत्वं साधयति।[237]

पुरुषोत्तमदेव: भाषावृत्तौ ईप्सितकर्मण: व्युत्पत्तिसंगतमर्थं स्वीकरोति।[238] तत्र च भेदान् निवर्त्यविकार्यरूपान् उदाहरणव्याख्यानेन निरूपयति- 1) संयोगं जनयति, २) तण्डुलानोदनं पचति, ३) वेदम् अधीते।[239] अनीप्सितकर्म व्याख्याने च अमुना भेदद्वयमपि यथापूर्वं प्रत्यपादि। अकथितकर्मविषये पूर्वोक्तधातूनां शास्, चि, रूध्, भिक्ष्, मुष् इत्येता: विहाय[240] शिष्टासु उदाहरणपुरस्सरं कर्मत्वं निर्दिष्टम्।[241]

---

233 अथ नदी तीरं कर्षयतीत्यादौ कथं कर्मसंज्ञा?........तद् बहिरङ्गत्वात् अन्तरङ्गकार्यं न शक्नोति निवर्तयितुम्, तत्रैव, पृ.५६६-५६७

234 भिक्षा याचनायाम्...........एवं तर्हि याचिरत्रानुनये वर्तते, तत्रैव, पृ.५७३

235 तत्रैव, पृ.५७६६

236 तत्रैव, पृ.५६४

237 कर्मणा इति अश्वस्य, स हि भक्षणक्रियया माषान् आसुम् इच्छति........माषाणां कर्मसंज्ञा न भवति, तत्रैव, पृ.५६४

238 कर्तु: क्रियया व्याप्तुम् इष्टतमं कर्म स्यात्।

239 तत्रैव, पृ.४५

240 तत्रैव, पृ.४५-४६

241 तत्रैव, पृ.४६

सृष्टिधर: भाषावृत्यर्थव्यावृतौ ईप्सितकर्मण: लक्षणं प्रदिशति कर्तुरीप्सिततमं कर्म इति व्याख्याने-'कर्तु: क्रियया व्याप्तुमिष्टं कर्म स्यात्'। तदनुसारं प्रकृतं संज्ञासूत्रं कारकाधिकारे पठितमस्ति तत्र च कारकशब्द: निमित्तार्थे व्युत्पाद्यते। निमित्तं च तत् क्रियासम्बद्धमिति। लक्षणोक्ते कर्तुरिति पदाभावे लक्षणं कर्मेतरानपि कारकान् अतिव्याप्नोति क्रियायां तेषां निमित्तभूतत्वात्। अधिकरणादीनामपि च कर्मत्वापत्ति: यथा- गृहेषु वसति, स्थाल्यां पचति इत्यादौ। तथैव हि लक्षणोक्तं व्याप्तुमिष्टमित्यपि नास्ति च कर्तरि अतिव्याप्ति:। यत: क्रियया उक्तयो: व्यापारफलयो: व्याप्ति: क्रमश: कर्तरि कर्मणि च भवति। लक्षणे व्याप्तुमितिपदम् "प्रकृतक्रियाश्रयं कर्तुमित्यर्थं बोधयति क्रियाया च क्रियाजन्यं फलमित्यभिप्राय:।[242]

सृष्टिधर: अचेतनकर्तुरपि कर्तृत्वं चिन्तयति अत्र प्रकरणे। यथा-'पुष्पम् आकर्षयति भ्रमरान्' गौणकर्तृत्वमसौ उरीकरोति नैयायिका: इव।[243] आभासीयवस्तुषु अपि प्रयुक्तं कर्मत्वं विवक्षाकारणत: साधुरिति प्रतिपादयति। यथा-शुक्तं रजतं मन्यते। धातूक्तफलाश्रयत्वे न सत्यपि कर्मत्वेन प्रयोग: विवक्षाकारणत: अत्र।[244]

अकथितकर्मण: प्रतिपादने भाष्योक्तकारिकाया उद्धरणेन सृष्टिधर: पुरुषोत्तमदेवस्य मतं समीक्षते। तत्र च अधिकां स्पष्टतां जनयति- चि, रूध्, भिक्ष्, शास् इति धातुप्रयोगप्रदर्शनेन।[245]

रामचन्द्र: प्रयोगरत्नमालायां पाणिन्युक्तकर्मलक्षणं भाष्यकारवृत्तिकारयो: विमर्शालोके व्याचष्टे।[246] नात्र किञ्चिन्मौलिकमनेन प्रत्यपादि। किन्तु अकथितकर्मविवरणे विष्णुस्रोतस्य

---

242 कारकाधिकारात् क्रियानिमित्तत्वम् आयाति तच्च श्रुतत्वात् कर्तु: क्रियानिमित्तं कर्म तर्हि गृहेषु विशतीत्यादौ..........क्रियया कर्ता यदेव व्याप्तुं प्रकृष्टक्रियाश्रयं कर्तुं यतते तदेव कर्म........। भाषावृत्यर्थव्यावृत्ति:, पृ.१०२

243 तत्रैव, पृ.१०२

244 कर्मेत्यनुवृतौ पुन: कर्मग्रहणं यत्र कथञ्चिद् व्याप्तुम् इष्टतमं यत्तदेव कर्मेति शुक्तिं रजतं मन्यते, भ्रान्त: चन्द्रम् अग्निं जानाति, विरही....विषयेऽपि कर्मत्व। तत्रैव, पृ.१०२

245 तत्रैव, पृ.१०२

246 प्र. कौ. पृ.३८३-३८७

उदाहरणेन कौशलविशेषं प्रदर्शितम्।[247] अथापि द्विकर्मकधातूनां परिगणने न केवलं पतञ्जलि-जिनेन्द्रबुद्धि-हरदत्तोधातूनाम् उल्लेख: कृत: अपितु मन्थ, गृह, पच्धातूनां तत्र समावेशेन षोडशधातव: परिगणिता:।[248]

विठट्लाचार्य: प्रयोगरत्नमालाटीकायां पूर्वाचार्याणां सिद्धान्तोल्लेखनपुरस्सरं कर्मकारकस्य सुबोधां स्थापनां प्रास्तौत्।[249]

भट्टोजिदीक्षित: शब्दकौस्तुभे कर्तुरीप्सिततमं कर्म इति सूत्रटीकायां कर्मकारकं स्पष्टयति यत् कर्तु: क्रियया ईप्सितफलस्य आश्रय: कर्म इति। तत्रासौ विशदयति यत् कर्ता क्रियागतव्यापारेण जायमानं फलमेव इच्छति किन्तु अस्य फलस्य अधिकरनं कर्म भवति। अत: तदीप्सितफलप्राप्तये कर्तुरीप्सिततमं कर्म भवतीति।[250]

कर्मण: अन्यदपि लक्षणद्वयं पूर्वाचार्यमतानुगामिनो व्याचष्टे असौ। अकथितकर्मविवरणे अयं द्वाविंशतीनां द्विकर्मकधातूनां परिगणनं करोति माधवीयधातुवृत्यादीनां सन्दर्भपुरस्सरम्।[251]

कौण्डभट्ट: वैय्याकरणभूषणसारे द्वितीयाविभक्तिप्रत्ययार्थविवरणप्रसंगे कर्मकारकलक्षणं क्रियाया: फलस्य आश्रयं कर्मत्वेन स्वीकरोति-'क्रियाजन्यफलाश्रयम्' इति। तच्च कर्तुरीप्सिततमम्'।[252] तद् हि कर्म सर्वकारकजनितक्रियाफलाश्रयं भवति।[253] एतेन उभयविधम् ईप्सितानीप्सितं कर्म फलाश्रयं भवति। अत्र विषये भेदविशेषो नोपपद्यते।[254] उदाहरणद्वयेन कर्मत्वं निदर्शयन्नसौ तर्कयति-'ओदनं पचति', 'घटं जानाति'

---

[247] यो दुदोह धर्म अन्नं ययाचे वसुधां वलिं.......तं हरिं भजे। तत्रैव, पृ.३८९-३९२

[248] दुह्याच्य्यर्थरूधिप्रच्छिब्रूशासुजिकर्मयुक्तिहृकृष्मन्थवहदण्डिग्रहमुष्पचकर्मभाक्, तत्रैव, ३८८

[249] कर्तु: क्रियेति ईप्सितशब्दोऽयम् अस्ति रूढोऽभिप्रेते (असत्) क्रियाशब्द: अपादानादिविशेषैरकथितं कारकं कर्मसंज्ञं स्याद् इत्युक्तम्। तत्रैव, पृ.३८३-३८७

[250] यद्व्यापाराद् असौ............तच्च धातुनोपात्तम् इति तद्विशिष्टत्वेन तच्च विषयोऽत्र संज्ञी, शब्दकौस्तुभे, पृ.१२८

[251] तत्रैव, पृ.३८३-३८७

[252] तत्र च क्रियाया फलस्य च धातुनैव लाभाद् अनन्यलभ्याश्रय एवार्थ: तत्वञ्चाखण्डशक्तिरूपम् फलस्य च धातुनैव लाभात् अनन्यलभ्याश्रय एवार्थ: तत्वञ्चाखण्डशक्तिरूपम् अवच्छेदकम्। तत्रैव, पृ.१४९

[253] तच्च कर्तुरीप्सिततमं, क्रियाजन्यफलाश्रय इत्यर्थ: क्रियाजन्यफलवत्त्वेन कर्मणा कर्तुरीप्सिततमत्वात्

[254] ईप्सितानीप्सितत्वयो: शाब्दबोधे भानाभावेन...........न वाच्यवाचकौ तत्प्रवेश:, तत्रैव, पृ.१४८-१४९

इत्यनयो: कर्मणो: फलाश्रयत्वमेव सामान्यम्। ओदने विक्लिति:, घटे च आवरणभंगरूपं सामान्यम्। ओदने विक्लिति:, घटे च आवरणभंगरूपं फलमुत्पद्यते तदेव तयो: कर्मत्वम्।[255]

अन्येनापि उदाहरणेन कर्मत्वं निरूपयन् कौण्डभट्ट: वदति- 'चैत्र: ग्रामं गच्छति' इति वाक्ये धातूक्तं संयोगरूपं फलं चैत्रे ग्रामे च उभयत्र दृश्यते किन्तु अयुक्तमिदं भाति यच्चैत्रश्चैत्रं गच्छति इति प्रयोग:। तथैव चैत्र: 'प्रयागात् काशीं' गच्छति' इत्यत्र कर्तु: गमनरूपक्रियाजनितं वियोगरूपं फलं प्रयोगे अपि उत्पन्नं भवति किन्तु वाक्ये क्रियापदोक्तव्यापारस्य संयोगरूपं फलं तु काश्यामेव अत: न प्रयागस्य कर्मत्वमिति।[256]

अत्र विषये नैय्यायिका: वैय्याकरणसम्प्रदायाभिमतं 'क्रियाजन्यफलाश्रय: कर्म:' इति लक्षणं निरसयन्त: यत् 'परसमवेतक्रियाजन्यधात्वर्थाविच्छेदकफलाश्रय:" इति लक्षणं प्रतिपादयन्ति तल्लक्षणं समीक्षमाण: कौण्डभट्ट: 'पाचयति कृष्णं गोप:', 'गमयति कृष्णं गोप:' इत्यादौ कर्मत्वमाक्षिपति नाङ्गीकरोति च।[257]

परसमवेतपदग्रहणम् अनावश्यकं वदन् प्रदर्शयति यत् 'तण्डुलम् पचति चैत्र' इति वाच्ये 'तण्डुलं पच्यते स्वयमेव' इति प्रयोगे अवकाशविप्रतिपत्ति: स्यात् इति। यत: ज्वलनरूप: व्यापार: काष्ठादौ आश्रित: भवति। इत्यत: उक्तग्रहणं नापेक्षितमिति।[258]

पुन: 'गमयति कृष्णं गोप:, पाचयति कृष्णं गोप:' इत्यत्र 'गतिबुद्धिप्रत्यवसानार्थसूत्रोक्तं कर्तृत्वमपि नैय्यायिकसिद्धान्तेन हीयत इति दूषणेन निराक्रियते कौण्डभट्टेन तेषां लक्षणम्।

---

255 ओदनं पचतीत्यत्र............ज्ञानाश्रयताया: नैयायिकानाम् इव सत्कार्यवादसिद्धान्ताद् वोपपद्येत, तत्रैव, पृ.१४८-९

256 ननु चैत्रो ग्रामं गच्छतीत्यत्र..........संव्याहृतधात्वर्थफलाश्रयत्वस्यैव क्रियाजन्य इत्यनेन विवक्ष्यमाणस्य उक्तप्रायत्वात्। तत्रैव, पृ.१४७-१४९

257 मन्मते तु कर्तृसंज्ञया बोधे न तदापत्तिरिति भवति, तत्रैव, प्.१४८

258 नैयायिकास्तदीयदोषावरणाय परसमवेतत्वम्...............शक्यत्वेति परत्वस्य परसमवेतत्वस्य च इष्टान्वयलाभायानेकश: कार्यकारणभावव्युपगमे गौरवान्तरत्वात् इति स्पष्टं भूषणे, तत्रैव, पृ.१४७-१४८

हरिवल्लभोऽपि वैय्याकरणभूषणसारसिद्धान्तितं व्युत्पत्तिलभ्यम् ईप्सितकर्मकारकार्थं स्वटीकायां समर्थयति। तदनुसारं कर्ता क्रियया उत्पन्नफलेन सह आत्मानं सम्बद्धुं यत् किञ्चित् प्रकर्षेण इच्छति तत् कर्म भवति।[259]

हरिवल्लभ: समाप्नोति इति क्रियापदमधिकृत्य समाधत्ते यत् उपसर्गेण सह प्रयुक्ते सति धात्वर्थेन सह ईप्सितकर्मण: उपपत्तौ न सत्यां उपसर्गसहितधातोरर्थग्रहणेन तत् समाहितं भवतीति।[260]

तथैव ईप्सितानीप्सितकर्मणो: भेदविशेषमगणयत: कौण्डभट्टस्यापि समर्थनं हरिवल्लभ: करोति। स उदाहरति- 'हरिं भजति'। इति वाक्ये नात्र किञ्चिदीप्सितत्वमिति। केवलं पूजाभाव एव।[261] कर्मविवरणे नागेशभट्टस्य उद्धरणै: कौण्डभट्टस्य मतं पोषयत्यसौ।[262]

नागेश: ईप्सितकर्म व्याकुर्वन् कर्तु: व्यापारस्य फलं कर्म इति वदति। यथा विक्लित्तिरूपफलेच्छया देवदत्त: पाकस्य व्यापारं करोति तेन इष्टं फलं ओदने विक्लितिरूपेण उत्पद्यते। स च धातूक्तफलाश्रय: कर्म भवति।[263] भट्टोजिदीक्षितमपि अत्र नागेश: समर्थयति यत् कर्त्रा ईप्सितफलस्य अधिकरूपं तच्च ईप्सिततमं सत् कर्मेति।[264] कर्मणि कारके कर्मरूपशक्तिं नागेश: प्रतिपादयति, सा द्वितीयाविभक्तिप्रत्ययेन द्योत्यते।[265] 'आत्मना आत्मा हन्ति'। इदं वाक्येऽपि साधुत्वं विवृण्वन् स स्पष्टयति यत् कर्तृत्वेन अत्र आत्मा उच्यते करणत्वेन च शरीरं द्योत्यते। नात्र दोष इति।[266] कर्तुरीप्सिततमं कर्म इति सूत्रे ईप्सितपदस्य पाठं समर्थयन् वदति यत् 'अग्नेर्माणवकं

---

259 अयं भाव:- सूत्रे ईप्सिततमशब्द:...............कर्मतालाभ इति, तत्रैव, पृ.१४७-१४८

260 न चेच्छाकर्मीभूतार्थधातोरेव.........सकर्मकत्वं बोध्यम्, तत्रैव, पृ.१४८

261 तत्रैव, पृ.१४९

262 एतेन कर्तृगतप्रकृतव्यापारायोजितद्व्यधिकरणप्रकृतधात्वर्थफलाश्रयत्वम् उक्तं भवति, तत्रैव, पृ.१४९

263 तत्र कर्मत्वं कर्तृगतप्रकृतधात्वर्थव्यापारयोज्यापरव्यधिकरणफलाश्रयत्वम् उक्तं भवति, तत्रैव, पृ.१४९

264 उद्देश्यत्वञ्च साक्षात्फलरूपे धात्वर्थे क्रियाया: फलेच्छापूर्वकेच्छाविषयत्वात् तण्डुलादीनाम् अपि तत्त्वम्। तत्रैव, पृ.१३०२

265 कर्मणि विहितद्वितीयाया: कर्मत्वशक्तिमान् अर्थ: शक्तिमत् एव द्वितीयार्थस्य भाष्यादिसन्मतत्वात्, तत्रैव, पृ.१३०५-६

266 गच्छतियोगे भाष्ये कृतम्, तत्रैव, १३०२

वारयति' इत्यत्र अग्नि: ईप्सिततम: नास्ति न हि वारयति इति क्रियापदोक्तफलस्य आश्रय: अत: तत्र कर्मत्वं नायाति।[267] अपितु माणवक: फलाश्रय: तच्च कर्म।

नागेश: नैय्यायिकानां 'परसमवेतक्रियाजन्य धात्वर्थनाश्रयत्वं कर्मत्वम् इति खण्डयति।[268] अनीप्सिताकथितकर्मणोरपि पारम्परिकमतं पोषयत्यसौ।[269]

## पाणिनीयेतरपरम्परासु कर्मकारकव्याख्यानम्

कलापव्याकरणे शर्ववर्मणा 'यत् क्रियते तत् कर्म'[270] इति लक्षणं लाघवेन निरूपितम् अस्य च महती व्याप्ति: अत्र शास्त्रे। तत्र वृत्तौ दुर्गसिंह: विशदयति यत् कर्त्रा अनुष्ठितं कर्मजातं कर्म भवतीति। वृत्तिकार: कर्मण: भेदोपभेदान् अपि गणयति।[271] वृत्तिटीकायां त्रिलोचन: दुर्गस्य कर्मविभाजनं समर्थयति समर्धयति च।[272] कालापीयं कर्मसूत्रं 'यत् क्रियते तत् कर्म' इत्येनं व्याचक्षाण: सुषेणाचार्य: स्वव्याख्याने यत् क्रियते इत्यनेन 'कर्त्रा यत् अभिसम्बद्ध्यते' इत्यर्थं गृह्णाति। तत्र च 'ग्रामं गच्छति देवदत्त' इति वाक्ये संयोगरूपफलस्य देवदत्ते आश्रितत्वात् कर्तरि अपि कर्मात्वाशंकां परिलक्ष्य स्वीयं नवं लक्षणं प्रस्तौति-"परसमवेतक्रियाजन्यफलभागित्वं कर्मत्वम्" इति। अनेन च क्रियायां फलाश्रयं व्यापाराश्रयात् भिन्नं प्रदर्श्य शंकाया: परिहारं करोति। किन्तु वैय्याकरणा: इदमपि लक्षणं निरसयन्ति। पुन: लक्षणं संशोधयति सुषेण:- 'तत्क्रियाश्रयत्वे सति तत्क्रियाजन्यजलभागित्वं कर्मत्वम्' इति। वैय्याकरणा: अपादाने अस्य अतिव्याप्तिम् आक्षिपन्ति- पर्वताद् अवरोहति इतिवत्। सुषेण: कर्तु: गमनक्रियाया: व्यापारेण उत्पन्नं यत् पर्वताधोभागाश्रितं यत् संयोगरूपं फलं तस्य आश्रय: पर्वत: नास्ति इत्यत: कर्म अपि नास्तीति स्वलक्षणमेव समर्थयति। धातूक्तव्यापारस्य फलनिर्धारणम् आवश्यकम् इति

---

[267] तत्रैव, पृ.१३०३

[268] तत्रैव, पृ.१३२१-१३३१

[269] तत्रैव, पृ.१३२१-१३३१

[270] कालाप, कारक, सू.२१९

[271] तत्रैव, पृ.२०५-२०६

[272] तत्रैव, पृ.२०८

तस्य तर्क:। अन्यैरपि उदाहरणै: स स्पष्टयति-भूमौ पर्णं पतति, नदी तीरे प्लवो वर्धते इत्यादिवाक्येषु धातूक्तव्यापाराणां फलनिर्धारणेन अधिकरणादीनां कारकाणां स्थाने कर्मत्वं नातिव्याप्नुयादिति।[273]

चान्द्रव्याकरणे चन्द्रगोमी कर्मकारकं क्रियाप्यसंज्ञया वदति। अर्थात् कर्ता क्रियया येन सह आत्मानं सम्बद्धुम् इच्छति तत् क्रियाप्यं कर्म वा भवतीति। अस्य वैय्याकरणस्य मतेन पाणिन्युक्ता: सर्वविधकर्मभेदा: क्रियाप्यसंज्ञया उपपत्तुं शक्या इति।[274]

संक्षिप्तसारे क्रमदीश्वर: कर्मलक्षणं सूत्रीचकार 'तत्समुद्दिष्टं कर्म' इति।[275] अत्र तच्छब्द: कर्तृवाचक:। जुमरनन्दी गोपिचन्द्रश्च स्पष्टयत: यत् समुद्दिष्टशब्द: ईप्सिततमसमानेऽर्थे एव प्रयुक्त: इति। जुमरनन्दी सूत्रटीकायां समुद्दिष्टशब्दं क्रियाया: फलाश्रयत्वेन निरूपयति।[276] यथा-देवदत्त: ग्रामं गच्छति इत्यत्र ग्राम: देवत्तानुष्ठितव्यापारस्य फलस्य आश्रय: अस्ति। फलञ्च देवदत्तग्रामयोर्मध्ये संयोग एव तस्य फलस्य आश्रय: ग्राम इति। तदेव च कर्म। जुमरनन्दी चतुर्विधं कर्म निरूपयति- प्राप्यं, निर्वत्यं, विकार्यम्, अनीप्सितञ्च। त्रीणि प्रथमानि तु भर्तृहरि: ईप्सितकर्माणि परिगणयति। किन्तु जुमरनन्दी ईप्सितानीप्सिते कर्मणी पृथग्विधे नाङ्गीकरोति।[277]

गोपिचन्द्रोऽपि जुमरनन्दिन: क्रियाया: जातस्य फलं कर्म मनुते जुमरनन्दिनं चात्र विषये समर्थयति। स उदाहरति-'देवदत्तो ग्रामं गच्छति', 'देवदत्त: ओदनं पचति'[278] इति वाक्यद्वयम्। असौ जुमरनन्दिन: कर्मविभाजनमपि भर्तृहरेस्तर्कै: तन्नामोल्लेखं विना पोषयति। अनीप्सितकर्म विशदयन्नुदाहरणं वदति-'पापं त्यजति' इति वाक्ये कर्ता पापात्

---

273 कर्तारम् अन्तरेन क्रिया न सम्भवति, फलस्य धातुवाच्येति विशेषणं देयम्। फलस्य तत्क्रियानाश्रयत्वे सति धात्वर्थावच्छेदकीभूतक्रियाजन्यफलभागित्वं कर्मत्वम्। तत्रैव, पृ.२०९

274 चान्द्र, पृ.१३८

275 संक्षिप्तसार:, कारक:, सू.२

276 तेन कर्त्रा सम्यक् क्रियाभागित्वाय कर्मसंज्ञं भवति। तत्रैव, पृ.९९६

277 तच्चतुर्धा विभज्यते प्राप्यम्, निर्वत्यम्, विकार्यम्, अनीप्सितञ्चेति। देवदत्तो ग्रामं गच्छति, कंसं घातयति, तत्रैव, पृ.९९६

278 देवदत्तो ओदनं पचतीत्यादौ पाकक्रियां भजता देवदत्तेन ग्राम: सम्यगुपदिष्ट इति।

घृणां करोति यत: तत् न इच्छति। प्राप्यकर्मणि विषये च स सूर्यं पश्यति इति प्रसिद्धमुदाहरणं प्रास्तौत्।[279]

जैनेन्द्र: ईप्सितानीप्सितं कर्म अधिकृत्य तयोरभेदेन एकमेव सूत्रं करोति- 'कर्त्राप्यम्'(कर्मेति)।[280] अकथितञ्चेति पाणिनीयं सूत्रं तथैव स्वीकरोति।[281] कर्त्राप्यमिति सूत्रव्याख्यानेऽपि आप्तुम् इष्टतमम् इति काशिकानुसारिणं विवरणं करोति। आप्यशब्देन चासौ आप्यतमम् इत्यर्थं स्व्यकरोत्।

अभयनन्दी अपि उक्तसूत्रव्याख्याने वृत्तिकारमनुसरति-"कर्त्रा क्रियया यद् आप्यं तत् कारकं कर्मसंज्ञं भवति।"[282] क्रियाशब्दं लक्षणे स्वीकुर्वत: तस्य स्पष्टीकरणमस्ति यत् कर्तृशब्दस्य आप्यस्य च मध्ये अयं स्वाभाविक: सम्बन्ध: इति।[283] पुन: विस्तरं विवृणोति यत् आप्यशब्देन आप्यतममेव निर्दिश्यते इति। काशिकानुसारमेवोदाहरति अत्रापि- पयसौदनं भुङ्क्ते।[284] लक्षणे कर्तृग्रहणे चिन्तनं प्रस्तुवन् अभयनन्दी शब्देनानेन कर्मण: कर्तृसम्बन्धं कारणत्वेन निर्दिशति। यथा- 'माषेष्वश्वं बध्नाति' अत्र माषाणां कर्तृसम्बन्धाभावे एव न कर्मत्वमिति स्पष्टयति।[285]

हेमचन्द्र: 'कर्तुर्व्याप्यं कर्म'[286] इति एकमेव कर्मकारकलक्षणं पठति शब्दानुशासने। जैनेन्द्रलक्षणेनास्य साम्यमस्ति। अत्र च 'वि' उपसर्गस्य आधिक्यम्। पाणिनेश्च तमप: स्थाने अनेन कार्यं साध्नोति। अयं वैय्याकरण: व्याख्यायां स्पष्टयति-'कर्त्रा क्रियया यद् विशेषेण आप्तुम् इष्यते तद् व्याप्यं तत् कारकं कर्मसंज्ञं भवति।[287] कर्मकारकं हेमचन्द्र उभयथा

---

[279] तत्रैव, पृ.९९६

[280] कर्तु: क्रियया व्याप्तिमात्रं यत्र प्रतीयते नानीप्सितिर्न च विकृतिस्तत्प्राप्यम्, यत्पुन: न प्राप्यं न निर्वर्त्यं न विकार्यं केवलम् अनीप्सितत्वेनेति कर्त्रा समुद्दिष्टं तद् अनीप्सितम्, यथा पापं त्यजति, आदित्यं पश्यति, अहिं लङ्घयति, तत्रैव, ९९६-७

[281] जैनेन्द्र, सू.१/२/११९

[282] तत्रैव, सू. १/२/१२०

[283] तत्रैव, पृ.९६

[284] कर्तृग्रहणाद् आप्यग्रहणसामर्थ्याद्वा क्रिया लभ्यते, तत्रैव, पृ.९७

[285] अथ सर्वाणि कारकाणि कर्त्राप्यन्त इति कर्मसंज्ञा प्राप्नेति, आप्यतमे सम्प्रत्यय: तेन करणादिषु न भवति, पयसा ओदनं भुङ्क्ते। तत्रैव, पृ.९७

[286] माषेष्वश्वं बध्नाति, अश्वेन कर्मणा कारकसंज्ञाऽभूत्। तत्रैव, पृ.९७

[287] शब्दानुशासनम्, २/२/२

विभनक्ति। प्रथमं तु भर्तृहरेः विभाजनमिव- निर्वर्त्यम्, विकार्यम्, प्राप्यम्। पुनस्त्रिधा- इष्टम् ,अनिष्टम्, अनुभयम् इति।[288] अन्यव्याकरणतन्त्रेषु अनिष्टकर्मणे द्वेष्यसंज्ञा, अनुभयकर्मणे च उदासीनसंज्ञा उपलभ्यते। अकथितकर्मप्रतिपादने धातुद्वयस्य आधिक्येन परिग्रहणमनेन उक्तम्- ग्रह्, पच् इत्येतयोः।[289]

मुग्धबोधे बोपदेवः कर्मसंज्ञायाः कृते 'धा' इति कृत्रिमसंज्ञां प्रयुनक्ति। 'धा'संज्ञया च कर्मकारकातिरिक्तानपि केषाञ्चित् तत्त्वानां ग्रहणम् अस्य शास्त्रे कृतं भवति।[290] 'धा'संज्ञायाः व्याख्यां प्रस्तुवन् दुर्गादासविद्यासागरः शर्ववर्मणा प्रतिपादितं लक्षणं स्वीकरोति-'यत् क्रियते तत् कर्म' इति। क्रमदीश्वरस्य तर्कान् स्थापयन् दुर्गादासः समतं पोषयति।[291] कर्मविभाजनं चानेन वाक्यपदीयसिद्धान्तितमेव उरीकृतम्।[292]

रामतर्कवागीशः कर्मकारकविवरणे कालापसिद्धान्तान् स्वीचकार-'यत् क्रियते तत् कर्म' इतिवत्। व्याचख्यौ च 'कर्तुः क्रियया यद् व्याप्यते तत् कर्म'।[293] एतल्लक्षणं यद्यपि दुर्गसिंहस्य मतं सङ्गच्छते तथापि वृत्तिकारकृते कर्तुरीप्सिततमं कर्म इति सूत्रस्य व्याख्याने आधृतम्। पुनर्विभजने कर्मणः वाक्यपदीयो विवरणानुषङ्गेन तद्वदेव विभाजितमनेन विदुषा।[294]

सारस्वतव्याकरणे यद्यपि पाणिनीयसूत्रस्वीकरणेनैव कर्मकारकव्याख्यानं प्रतिपादयति अनुभूतिस्वरूपाचार्यः।[295] किन्तु सः कर्मभेदविभाजने चतुरः कर्मभेदान् करोति-१) उत्पाद्यम्, २) आप्यम्, ३)संस्कार्यम्, ४) विकार्यञ्च।[296] तत्र उत्पाद्यशब्दः

---

[288] तत्रैव, पृ.६८

[289] तत्रैव, पृ.६८

[290] कर्मक्रियाविशेषणाभिनिष्ठधीसिनस्थसम्बुद्ध्युपवसदौधमद्वि, मुग्ध. कार. सू.-२

[291] यत् क्रियते साध्यते तत् कर्म। करोतेर्निखिलक्रियावादकत्वात् कर्तुर्व्यापारैर्यत् साध्यते तत्कर्मेत्याह। अत एव क्रियाव्याप्यं कर्मेति क्रमदीश्वरः:, तत्रैव, पृ.३८

[292] तत्रैव, पृ.३८-३९

[293] तत्रैव, पृ.३८

[294] तत्त्रिविधं निर्वर्त्यं, विकार्यं, प्राप्यञ्चेति, तत् अस्मन्मते निर्वर्त्यविकाराभिन्नम्, प्राप्यमितिलक्षणेन प्राप्यतरभूतम्। तत्रैव, पृ.३८

[295] सार. पृ.८९, पृ.९१

[296] तच्च कर्मकारकं चतुर्विधम् उत्पाद्यम्, आप्यं, संस्कार्यं विकार्यञ्चेति तत्रैव, पृ.८३

निर्वर्त्यस्थाने, आप्यशब्दश्च प्राप्यस्थाने प्रयुक्तौ स्त:। संस्कार्यकर्मण: उदाहरणरूपेण 'व्रीहिवान् वा प्रोक्षति' इति वाक्यमुपस्थापयति उत्पाद्यविकार्यकर्मभेदौ परित्यज्य। सामान्येन वैय्याकरणा: इदं वाक्यं विकार्यकर्मण: उदाहरणं मन्वते। यथा- वस्त्रं रञ्जयति देवदत्त:, अथवा रजको वस्त्रं रञ्जयति।[297]

चन्द्रकीर्ति: 'क्रियते यत् तत् कर्म' इति लक्षयति कर्मलक्षणम्।[298] तत्र टीकायां रामाश्रम: चन्द्रकीर्ते: मतं मौनेन समर्थयति।

सुपद्मव्याकरणे पद्मनाभ: 'क्रियाप्यं कर्म' इति सूत्रेण कर्मकारकं निरूपितम्। व्याख्यायां च असौ स्पष्टयति-'कर्तु: क्रियया यद् व्याप्यते तत् कारकं कर्मसंज्ञं भवति'। इदं लक्षणं पाणिनीय-ईप्सितकर्मलक्षणस्य समीपं वर्तते।[299] असौ कर्मविभाजने-ईप्सितम्, अनीप्सितम्, इतरत् इतिवत् त्रिविधकर्मभेदान् निरूपयति। अत्र तृतीयम् अन्यतन्त्रेषु उदासीनम् इति कथितम् अस्ति। पद्मनाभ: अस्य उदाहरणे दोग्धीति क्रियापदं वदन्नपि अकथितकर्मण: स्वीकारं न करोति।[300]

विष्णुमित्र: क्रियाव्याप्यम् इति पदं विशदयति यत् इदं कर्तुरिति पदेन सहैव अन्वितं भवतीति। 'माषेष्वश्वं बध्नाति' इत्युदाहरणेन चैतत् स्पष्टयति।[301] तत्र 'व्याप्यम्' इत्यपि अवश्यव्याप्यमिति प्रतिपादयति। उदाहरति च-'पयसौदनं भुङ्क्ते'। इत्यत्र पय: व्याप्यम्, ओदनञ्च अवश्यव्याप्यमिति।[302] पाणिनीयसिद्धान्तान्नात्र किञ्चिद्विशेष इति

---

[297] संस्कारो नाम प्राक्तनकर्मजो गुण: कश्चिद्गुणातिशयो वा गुणाधानं मलापकर्षो वा.........गुणातिशयसंस्कार्यं व्रीहीन् यवान् वा प्रोक्षति। प्रोक्षणेन कश्चिद् गुणातिशयो जन्यते।, गुणाधानमलापकर्षयोरुदाहरणम् यथा- वस्त्रं रञ्जयति देवदत्त:, रजको वस्त्रं क्षालयति। तत्रैव, पृ.८३

[298] सारस्वते चन्द्रकीर्ते: टीका पृ.१५२

[299] सुपद्म. पृ.६२

[300] तत्रैव, पृ.६२-६६

[301] अथ कर्तारम् अन्तरेण क्रियाया अप्रतीते: कर्ता इत्याह कर्तुरिति.....न कर्मत्वं, यथा माषेष्वश्वं बध्नाति, तत्रैव, पृ.६२

[302] यत्र नावश्यव्याप्यत्वं तत्रापि न.............अत्रास्य भक्ष्यो ओदनो, न तु पय:, तत्रैव, पृ.६२

भाति। पद्मनाभस्य कर्मभेदानपि समर्थयति अयं टीकाकार:। प्राप्यकर्मण: उदाहरणं दर्शयति-'कुञ्जं त्यजति खग:'। अस्य वाक्यार्थं कुञ्जत्यागम् प्राप्नोति इति।[303]

हरिनामामृते जीवगोस्वामी कर्मकारकं प्रतिपादयति- 'क्रिया यत्साधिका तत् कर्म'[304] इति। अत्र लक्षणे यद्यपि कर्तृपदं त्यक्त्वा क्रियापदमेव केन्द्रस्थाने स्वीकृतम्, किन्तु व्याख्यायाम् असौ वैयाकरण: क्रियापदं कर्तृवाचिनं वदति। एतादृशप्रयोगस्य औचित्यनिर्धारणाय एकं पाणिनीयं प्रयोगं निर्दिशति-साधकतमं करणम् इति।[305] भूय: अस्य लाभं वदति यत: क्रियाया: अचेतनत्वात् अत्र ईप्सितानीप्सितकर्मद्वयभेद: लुप्यते। यथा 'भ्रमात् विषं भक्ष्यति'।[306] अनेन लक्षणेन च लक्षिता पञ्चविधकर्मभेदान् प्रतिपादयति- उत्पाद्यम्, विकार्यम्, संस्कार्यम्, प्राप्यम्, त्याज्यञ्च।

प्रयोगरत्नमालायां रामचन्द्राचार्यः वैय्याकरणै: परम्परया मतमिव कर्म लक्षयति-'यत् कर्तु: क्रियया व्याप्यं तत् कर्म परिकीर्तितम्।[307] तच्च लक्षणं व्याचष्टे- 'परसमवेतक्रियाफलाश्रयत्वं कर्मत्वम्' इति।[308] कर्मविभाजनेऽपि अमुना वैय्याकरणपद्धतिम् आश्रित्य प्रतिपादनं कृतम्।[309] द्विकर्मकधातूनां परिगणने धातुद्वयं 'कृष' 'ग्रह' इति समाविश्य षोडषधातव: परिगणिता:।[310]

पाणिनीयव्याकरणे करणकारकव्याख्यानम्

पाणिनि: 'साधकतमं करणम्'[311] इति करणकारकं व्याचष्टे। तत्र पतञ्जलिः तमप्प्रत्ययस्य औचित्यं चिन्तयति । तन्मतेन अन्ययोः अधिकरणापादानयोः लक्षणे नोक्तं अयं प्रत्ययः

---

303 तत्रैव, पृ.६३

304 हरिनामामृतम्, सू.९६८

305 साधिकेति क्रियाया: स्वातन्त्र्यभावेऽपि..................साधकतमं करणम् इतिवत्, तत्रैव, पृ.३८५

306 तत्रैव, पृ.३८५

307 प्रयोगरत्नमाला, पृ.३९०

308 तत्रैव, पृ.३९०

309 तत्रैव, पृ.३९०

310 दुहियाचिरूधिप्रच्छिभ्रुवो..........द्विकर्मकमाहु:, तत्रैव, ३९५

311 पा.सू १/४/४१

पुनरत्र प्रयोगे केनचित् कारणेनावश्यं भाव्यम्।[312] लक्षणस्य अन्यकारकेषु अतिव्याप्तिवारणाय अयं प्रयोगः अन्यकारकाणामपि साधकत्वात् क्रियायाः। निर्धारणमत्र कारणमिति स्पष्टयति यथा हि संकाश्यकेभ्यो पाटलिपुत्रकाः अभिरूपतराः।[313]

कैय्यटोऽपि इदं प्रत्ययं संशयनिवारकं स्वीकरोति।[314] पतञ्जलेरानुगुण्येनासौ अपादानादिकारकाणां गौणत्वमपि प्रतिपादयति।[315] भर्तृहरिश्च वाक्यपदीये करणकारकं कारिकया परिभाषयति –

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्।
विवक्ष्यते यदा तत्र तत्तदा करणं स्मृतम्॥[316]

पूर्वाचार्यैर्यद्यपि पाणिनेर्लक्षणं समीक्षितम्। किन्तु तत्र व्याख्यानं न प्रस्तुतं भर्तृहरिः प्रथममेव करणकारकं व्याचख्यौ-क्रियायाः परिनिष्पत्तिर्यद् व्यापारवदनन्तरम् इत्यादिना। अत्र च विवक्षाम् असौ अन्यकारकव्यावर्तिनीं मनुते यथा 'स्थाल्या पच्यते' इतिवत्। अथापि न कदापि कर्ता करणं भवति इति।[317]

भर्तृहरेः विवक्षासिद्धान्तेन करणकारकं स्पष्टयन् हेलाराजः अन्यानि उदाहरणानि ददौ-बलेन लुनाति, आलोकेन पश्यति इत्यादिनी।[318] करणं किञ्चित् तत्त्वविशेषाधीनं न सत् विवक्षाधीनमिति प्रयोगपुस्सरं प्रदर्शयति 'अश्वेन पथदीपिकया याति'[319]। वाक्ये क्रियासाधकानि अन्यान्यपि कारकाणि करणानि भवन्ति इति।[320]
वृत्तिकारः करणत्वेन कारविशेषस्य वक्त्रचयनमिति स्वीकरोति अत्र प्रसंगे। यथा दात्रेण लुनाति, परशुनाच्छिनत्ति इत्यादौ।[321] भाष्यकारदिशा च तमप्प्रत्ययग्रहणमपि समीक्षते।[322]

---

[312] एवं तर्हि---कारकसंज्ञायां तरतमयोगो न भवति, महाभाष्यम्, पृ. २४९

[313] आप्यम् आचार्यः किन्नायः मन्यते---तेने हैव स्यात्---ग्रामाद् आगच्छति। संकाश्यकेभ्यः पाटलिपुत्रकाः अभिरूपतराः इतत्र न स्यात्। कारकसंज्ञाया तरतमयोगो न भवति इत्यत्रापि सिद्धं भवति। तथाधारम् आचार्यः—तेने हैव स्यात् तिलेषु तैलम्, दध्नि सर्पीति। गंगायां गावः, कूपे गर्गकुलम् इत्यत्र न स्यात्। कारकस्ज्ञायां तरतमयोगो न भवति- इत्यत्रापि सिद्धं भवति। तत्रैव, पृ. २५९

[314] तत्र तमश्रुतिरेतज्ज्ञानमपि प्रकृष्टप्रत्ययग्रहणम् अन्तरेण प्रकरणे सामर्थ्यप्रकर्षो नाश्रयते, तत्रैव, पृ. २५९

[315] तत्रैव पृ. १५९

[316] वाक्यपदीये,सा. ९०

[317] तत्रैव, सा. ९१,९२,९४

[318] तत्रैव पृ. ३०६

[319] तत्रैव पृ. ३०७

[320] तथा ह्यश्वो देशान्तरप्राप्तौ---आतिशयम्, तत्रैव पृ. ३०८

[321] क्रियासिद्धौ यत् प्रकृष्टोपकारकं विवक्षितं तत्---करणसंज्ञं भवति। दात्रेण लुनाति परशुना छिनत्ति। काशिका पृ. ५५७

जिनेन्द्रबुद्धिः साधकतमशब्दस्य वृत्तिकारकृतानुवादं प्रकृष्टोपकारकमित्येनं स्पष्टीकरोति । प्रकृष्टतां तत्र विशेषेण व्याचष्टे।[323] 'धनुषा विध्यति' 'धनुर्विध्यति' इति प्रयोगप्रदर्शनेन च करणकारके विवक्षायाः भूमिकां विवृणोति ।[324] तमप्प्रत्यय विषयेऽपि पूर्वाचार्यमतानुगामी अयम् ।[325] हरदत्तः करणकारके वृत्तिकारमतस्य प्रस्तावे वाक्यपदीयम् उद्धरति ।[326] तत्र च करणकारकस्य विवक्षाधीनत्वं प्रतिपादयति ।[327] तमब्ग्रहणे जिनेन्द्रबुद्धेः स्पष्टीकरणम् अस्यापि सम्मतम् ।

पुरुषोत्तमः भाषावृत्तौ वृत्तिकारव्याख्यायां पाणिनीयं 'साधकतमं करणम्' इति सूत्रं व्याचष्टे । तत्र 'परशुना वृक्षं छिनत्ति' परशुः वृक्षः छिनत्ति; इत्युदाहरणपुरस्सरं करणकारकस्य विवक्षाधीनतां वदति ।[328]

तत्र व्यावृत्तिकारः पुरुषोत्तमोऽपि तथैव सिद्धान्तयति करणकारकम् ।[329] व्यावृत्तटीकायां सृष्टिधरः भर्तृहरेः सन्दर्भेण करणकारकं निरूपयति ।[330] प्रयोगमालाकारश्च (रामचन्द्रः) यद्यपि पुरुषोत्तममनुकरोति अत्र प्रसंगे किन्तु विवक्षां तथा महत्त्वपूर्णां न मनुते ।[331] रामचन्द्रस्य टीकायां टीकमानः करणकारकविवरणे जिनेन्द्रबुद्धेः मतमुद्धरति तदपि च मतं वाक्यपदीयमूलं व्यवहरति ।[332] तमप् प्रत्ययेऽपि जिनेन्द्रबुद्धिस्तर्कै स्वमतं प्रतिपादयति।[333]

भट्टोजिदीक्षितः भर्तृहरिणा प्रतिपादितं करणकारकव्याख्यानं शब्दकौस्तुभे समर्थयति ।[334] तथैव च अस्मिन् प्रकरणे कौण्डभट्टः भर्तृहरेः कारिकां पाणिनीयलक्षणस्य व्याख्यानमेव

---

322 तमब्ग्रहणं किम्? गंगायां घोषः। तत्रैव पृ. ५५८

323 प्रकृष्टम् अत्यन्तम् उपकरकम्, अथवा प्रकर्षः प्रकृष्टम्। तत्रैव, पृ. ५५७-५५८

324 तत्रैव, पृ. ५५८

325 एतदनेन ज्ञाप्यत्वं---विना तमब्ग्रहणेन प्रकर्षेनाश्रीयते। तत्रैव, पृ. ५५९

326 तत्रैव, पृ. ५५७

327 तत्रैव, पृ. ५५७

328 तत्रैव, पृ. ५५८

329 क्रियासिद्धौ प्रकृष्टोपकारकं करणमुच्यते---विवक्षावशात्। परशुना छिनत्ति। भा.वृ., पृ. ४५

330 भाषावृत्यर्थव्यावृत्तिः पृ. १००

331 क्रियासिद्धौ प्रकृष्टोपकारकं करणं स्यात्, प्र. कौ. पृ ४७५

332 यत् क्रियासिद्धौ विषये प्रकृष्टम् अत्यर्थमुपकारकत्वं---करणत्वं तदा स्मृतम् इति। तत्रैव, पृ. ४७५
प्रकृष्टम् अत्यन्तमुपकारकं—साधकतमम्, जिनेन्द्रबुद्धि,का. पृ. ५५९

333 एतदनेन ज्ञाप्यते ---अमुख्यस्यास्याधारस्य गंगादेशस्याधिकरणसंज्ञा स्यात्, तत्रैव, पृ. ४०५-६
इह कारकाधिकारे—गंगादेशधारस्याधिकरण संज्ञा भवति, जिनेन्द्रबुद्धि, का. पृ. ५५९

334 सिद्धान्तकौमुदी पृ. १३९

मनुते ।[335] तन्मतेन तृतीयाविभक्तिः वाक्ये उक्तव्यापारस्य तदाश्रयस्य च बोधिका ।[336] वैय्याकरणभूषणसारस्य टीकायां हरिवल्लभः भर्तृहरेः कारिकोल्लेखपूर्वकं कौण्डभट्टमतं समीक्षते ।[337] तत्र च हेलाराजीयटीकासम्मते करणकारक विवरणे अस्य सम्मतिः ।[338] अस्य दृष्टिः नैय्यायिकप्रभावोपेता लक्ष्यते ।[339] परमलघूमञ्जूषाकारमतेन करणं तद् भवति यत् करणताशक्त्योपेतम् ।[340] हरिणोक्तं करणकारकविवरणमस्य सर्वथा सम्मतम्।[341] हेलाराजीयं व्याख्यानम् अनुगच्छति नागेशः अत्र प्रसंगे ।[342]

पाणिनीयेतरव्याकरणसम्प्रदायेषु करणकारकव्याख्यानम् –

शर्ववर्मा हि कालापे येन क्रियते तत् करणमिति करणकारकं लक्षयति । व्युत्पत्तिरस्य मुख्यः आधारः । तत्र टीकाकारः दुर्गसिंहः भर्तृहरेः वृत्तिकारस्य च विवरणानुगुणं व्याख्यानं प्रस्तौति ।[343] गोत्रेण गार्ग्य इत्यादिप्रयोगाणामपि साधुत्वमनेन प्रादर्शि ।[344] दुर्गसिंहस्य समर्थनं त्रिलोचनोऽपि करोति ।[345] सुषेणाचार्यः विवक्षाधारितमेव करणकारकं स्वीकरोति हरेरनुगमनेन, कर्तुः करणत्वेन प्रयोगोऽपि अस्य असम्मतः ।[346]

चन्द्रगोमी यद्यपि करणकलक्षणं नोक्तवान् किन्तु तृतीयाविभक्तिं करणकारके प्रतिपाद्य स्वीयां संकल्पनाम् उदाहरणैः व्यनक्ति- 'प्रकृत्याभिरूपकः' 'प्रायेण याज्ञिकः' इत्यादिना।[347]

संक्षिप्तसारस्य कर्ता पाणिनीयं करणलक्षणं परिवर्त्यक्रियासाधनं करणमिति लक्षयति ।[348] अस्य व्याख्याने जुमरनन्दी भर्तृहरेः मतं समर्थयति ।[349] अन्यः व्याख्याता गोपिचन्द्रः

---

[335] स चात्यवधानेन फलजनकव्यापारवत्वं—विवक्षा दृश्यते यतः इति । विवक्ष्यते इत्यनेन सकृद अनेकेषां तद् भवति—सूचयति । जि.बु.का. पृ. ५५९

[336] करणतृतीयायास्त्वाश्रयव्यापारौ वाच्यौ । तत्रैव, पृ. १७१-१७२

[337] प्रकर्षश्च कारणापेक्षो न—तेनाश्वेन दीपिकया व्रजति, इति प्रयोगोपपत्तिः, तत्रैव, पृ. १७२

[338] तत्र हरिसम्मतिमप्याह---विवक्षया इत्यनेन—दात्रानादरेण बलस्य तत्वविवक्षायां, बलेन लुनातीति प्रयोगः , तत्रैव, पृ. १७२-१७३

[339] तत्रैव, पृ. १७३

[340] करणत्वञ्च करणताशक्तिमत्वम् । लघुमञ्जूषा, पृ. १२५१

[341] तत्रैव, पृ. १२५१

[342] विवक्ष्यते इत्यनेन—अत एवाश्वेन पथदीपिकया व्रजतीति भवति, तत्रैव, पृ. १२५१-५२

[343] कलाप, सू. २१८

[344] तत्रैव, पृ. २०४

[345] गार्ग्यस्य भवने गोत्रं करणम्, तत्रैव, पृ. २०४

[346] तत्रैव, पृ. २०४

[347] तत्रैव, पृ. २०४-०५

[348] चान्द्र, पृ. १७४

लक्षणस्य साधनशब्दम् औचित्येन युनक्ति । पूर्ववर्तिनः जुमरनन्दिनः टीकामपि सादरं स्मरति ।[350] हरिणोक्तवाक्ये करणद्वयसंभवनाऽपि तस्य एव उदाहरणोल्लेखेन उरीकरोति।[351]

देवनन्दी करणकारकप्रतिपादनाय पाणिनीयमेव सूत्रं प्रयुनक्ति । तत्र टीकायाम् अभयनन्दी तमप्प्रत्ययार्थस्य तत्प्रयोगस्य च औचित्यचिन्तने वैयाकरणानां परम्परितं विवरणं पुरस्करोति ।[352]

हेमचन्द्रः अपि शब्दानुशासने पाणिनीयं करणकारकलक्षणं समाविश्य[353] तत्र भर्तृहरेः वृत्तिकारस्य सिद्धान्तान् सयुक्तिकं प्रस्तौति ।[354] तमब्ग्रहणेऽपि पूर्वाचार्याणामिव चर्चा कृता ।[355] वाक्ये करणानां बहुत्वमपि समर्थयति शब्दानुशासनकारः ।[356]

मुग्धबोधे बोपदेव: करणेऽर्थे ‘धा’ संज्ञां करोति । तद्वाच्यत्वेन साधन-हेतु-विशेषण-भेदकान् विवृणोति ।[357] टीकायां दुर्गादासविद्यावागीशः साधनत्वेन करणं निर्दिष्टवान् । अत्र विषये भर्तृहरेः लक्षणमपि टीकाकारः परोक्षनिर्देशेन स्व्यकरोत् ।[358] रामतर्कवागीशः स्वटीकायां दुर्गादासस्य साधनस्य करणत्वेन व्याख्यानं समर्थयति ।[359] भर्तृहरेः सन्दर्भेण साधकतमशब्देन करणमात्रस्य न भवतीत्यपि अयं टीकाकारः वदति ।[360]

सारस्वतव्याकरणे करणकारकस्य पाणिनीयमेव लक्षणं स्वीकृत्य वृत्तिकारस्यानुकरणेन तस्य व्याख्यानं प्रस्तुतम् अस्ति ।[361] टीकाकारः चन्द्रकीर्तिः लक्षणं समर्थयति किन्तु

---

[349] स.सा. का.सू. १६

[350] यद्व्यापारादनन्तरं—करण संज्ञं भवति, तत्रैव, पृ. १००६

[351] साध्यते अनेनेति करणे...एतदेव स्पष्टयितुम आहू यद्व्यापारादनन्त कर्त्रेत्याह, तत्रैव, पृ. १००६

[352] तत्रैव, पृ. १००६

[353] जैनेन्द्र, १/२/११३

[354] तत्रैव, पृ. ९४

[355] शब्दानुशासनम् २/२/२४

[356] क्रियासिद्धौ यत् प्रकृष्टोपकारकत्वेनाव्यवधानेन विवक्षितं...करणसंज्ञं भवति, तत्रैव, पृ. ७४

[357] तमब्ग्रहणम् अपादानादिसंज्ञाविधौ तरतमयोगो नास्ति...अधिकरणत्वञ्च भवति, तत्रैव, पृ. ७४

[358] अस्य च कारकान्तरापेक्षया प्रकर्षो...सूपेन सर्पिषा लवणेन पाणिनौदनं भुंक्ते, तत्रैव, पृ. ७४

[359] मुग्धबोध कारक, सू. ९

[360] साध्यते कर्म निष्पाद्यते अनेनेति..यद्वै विवक्षितं तेषु करणं तत् प्रकीर्तितम् इति, तत्रैव, पृ. ५७

[361] यद्व्यापारदनन्तरं कर्त्रा कर्म निष्पाद्यते तत् साधनं ..यदुक्तं क्रियायाः परिनिष्पत्तिः..स्मृतम् इति । तत्रैव, पृ. ५७-५८

करणव्याख्याने रूचिविशेषं न दर्शयति ।[362] तदनु रामाश्रमः तृतीयाविभक्तिसन्दर्भेन करणकारकं प्रतिपादयति ।[363]

सुपद्मव्याकरणे पद्मनाभदत्तः पाणिनीयेन सूत्रेणैव करणकारकं लक्षयति ।[364] टीकाकारश्च विष्णुमित्रः मुख्यतः वैय्याकरण परम्परायाः तर्कैस्तत्पोषयति ।[365] हरिनामामृतकारः जीवगोस्वामी 'कर्तुराधीनं प्रकृष्टं साहाय्यं करणम्' इति लक्षणेन प्रतिपादयति करणकारकम् । करणहेत्वोः भेदप्रदर्शनहेतुकस्तत्र कर्तुराधीनमि'ति पाठः ।[366] यतः हेत्वाधीनः कर्ता कर्त्राधीनं करणम् इति सिद्धान्तः।

भाषावृत्तौ पुरुषोत्तमः पाणिनीयं करणलक्षणं स्वीकरोति ।[367] तदनुसारं करणं क्रियया फलं जनयति तच्च फलाश्रयं न भवति ।[368] उदाहरणैः आन्तरिकं बाह्यमिति करणस्य भेदद्वयं निरूपयति असौ ।[369]

## पाणिनीयव्याकरणे सम्प्रदानकारकव्याख्यानम्

सम्प्रदानस्य मुख्यतया लक्षणं विधाय पाणिनि: केषाञ्चन अन्यप्रयोगाणामपि उल्लेखपुरस्सरं सम्प्रदानत्वं निर्दिशति। सामान्येन तु तेषां प्रयोगाणां संप्रदानसंज्ञा मुख्यसूत्रेणापि उपपद्यते पुन: विशेषविधानं विशेषार्थेषु स्यादिति समाधातुं शक्यते। पतञ्जले: सम्प्रदानसूत्रव्याख्यायां च स्वीकृतायाम् अग्रिमसूत्राणामाधिक्यं प्रतिभाति।

कात्यायनस्य अत्र प्रसङ्गे उक्तवार्तिकस्य "कर्मण: करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा" इत्यस्य उदाहरणे व्याख्यानं प्रस्तौति पतञ्जलि: 'पशुना रूद्रं यजते' अस्यार्थ: 'रुद्राय पशुं ददाति' अयं भवति इति।[370]

---

[362] अश्वेन पथा याति—त्रयाणामपि व्यापारवत्वात् साधनत्वम्, तत्रैव, पृ. ५८

[363] सार. सू. ४६० क्रियासिद्धौ प्रकृष्टोपकारकं करणं..ज्ञानं स्यात् । तत्रैव, पृ. ९०

[364] सार. चन्द्रकीर्तेः टीका पृ. १५४

[365] सार. रामश्रमटीका, पृ. ३०७

[366] सुपद्म ७२

[367] तत्रैव, पृ. ७२

[368] हरिनामामृतम् पृ. १०५१

[369] कर्तुराधीनमिति कृष्णप्रासादात् सुखं लभते, तत्रैव, पृ.४५६

[370] तत्रैव, पृ.२५७

कैय्यट: वृत्तिकारस्वीकृतं सम्प्रदानकारकस्य दानार्थमात्रकत्वं निराकरोति तस्य भाष्यकारस्याप्यस्वीकृते:। भाष्यकार: पाणिने: 'गत्यर्थकर्मणी द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि' इति सूत्रं परिगणितधातुविशेषाणां सम्प्रदानसम्बन्धकत्वात् निराकरोति तन्मतेन अयं सम्प्रदानव्यवहार: धातुमात्रेण सह सम्बध्येत। तत्र वार्तिकं 'क्रियाग्रहणम्' अपि तथैव अपास्तम्। कैयट: जिनेन्द्रबुद्धिना उक्तं दाधातोरर्थं स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनरूपं न स्वीकरोति। तत्र प्रसङ्गे महाभाष्योक्तोदाहरणेन कारणं ददाति 'खण्डिकोपाध्याय: तस्मै चपेटां ददाति', 'न शूद्राय मतिं दद्यात्' इत्यादिना।[371]

क्रुधद्रुहेर्ष्येत्यादिसूत्रे 'यं प्रति कोप:' इति वचनं समर्थयति कैय्यट:। अत्रोक्तधातुषु क्रोधस्य सत्वे एव सम्प्रदानप्रयोग: इति तस्य मतम्। ईर्ष्यधातुयोगे क्रोधाभावे 'भार्यामीर्ष्यति' इति प्रयोग:।[372] एषां धातूनामर्थविवरणेऽपि कैय्यट: कौशलं प्रदर्शयति।[373] अत्र द्विषधातो: गणना नास्ति इत्यत: न सम्प्रदानम्-'अस्मान् द्वेष्टि'। औषधं द्वेष्टि।

भर्तृहरि: सम्प्रदानकारकव्याख्याने व्युत्पत्तिलभ्यमर्थं स्वीकृत्य सम्प्रदानं त्यागाङ्गपदेन निर्दिशति।[374] तदनुसारं यस्मै त्याग: विधीयते तत् त्यागाङ्ग: भवति। सम्प्रदानपरिभाषायां च 'अनिराकरणात्' प्रेरणानुभूतिभ्याम्' इति शब्दप्रयोगेण अर्थं विवृणोति। पाणिन्युक्तलक्षणस्य गहनं व्याख्यानं विदधता अनेन भाष्यकारस्य इव कात्यायनस्य संशोधनं परित्यक्तम्।[375] सम्प्रदानस्य अन्यविधानानि अपि पाणिनिविहितानि असौ समर्थयति किन्तु रोचतेर्धातो: प्रयोगेऽस्य विप्रतिपत्ति:। तदनुसारम् अयं तु कर्मकारकं, हेतु: अथवा शैषिकत्वात् षष्ठीप्रसङ्ग: स्यादिति।[376]

---

371 कश्चिदन्वर्थसंज्ञाविज्ञानाद् ददातिविषय एव सम्प्रदानसंज्ञेत्यभुपगतम्। दानञ्च........खण्डिकोपाध्यायस्तस्मै चपेटां ददाति च। तत्रैव, पृ.२५७

372 कोपपूर्वाणां सर्वेषां ........तेनेह न भवति, भार्याम् ईर्ष्यति। परैर्दृश्यमानं न सहते......। तत्रैव, पृ.२५८

373 तत्रैव, पृ.२५८

374 अनिराकरणात् कर्तुस्तस्याङ्गं कर्मणेप्सितं प्रेरणानुमतिभ्यां वा लभते सम्प्रदानम्। वाक्यपदीयम्, सा. १२९.

375 भेदस्य च विवक्षायाम्.......न क्रियाग्रहणं कृतम्। तत्रैव, सा. १२९.

376 हेतुत्वे कर्मसंज्ञायां.......सम्प्रदानाख्यमुच्यते। तत्रैव, सा.१३०.

हेलाराज: भर्तृहरे: सम्प्रदानव्याख्यानं विवृण्वन् तत्कृतां कारिकां 'अनिराकरणात् कर्तुस्त्यागाङ्गं कर्मणेप्सितम्' प्रस्तूय लक्षणं व्युत्पत्त्याऽर्थप्रतिपादकं[377] स्वीकरोति। तदनुसारं सम्प्रदानं तदेव भवति यस्मै स्वामित्वं दीयते नान्यथेति। यथा-'रजकस्य वस्त्रं ददाति, 'घ्नत: पृष्ठं ददाति' इत्यत्र तु स्वाम्यं नार्पितम् अत: न सम्प्रदानम्।[378] तथैव 'खण्डिकोपाध्याय: तस्मै चपेटां ददाति', 'न शूद्राय मतिं दद्यात्' इत्यादौ स्वाम्यस्य त्याग: अन्यस्मै अर्पणं च भवति। कैय्यटविरुद्धतया अयमुपन्यासोऽस्ति।[379]

असौ सम्प्रदानकारकात् तादर्थ्यस्य भिन्नतामपि निरूपयति उभयो: चतुर्थीविभक्तिप्रयोगेण अयं भ्रम: सम्भवति। किन्तु हेलाराज: स्पष्टयति यत् सम्प्रदाने कर्ता क्रियया सम्प्रदानेन सह सम्बध्यते अथवा तथा कामयते किन्तु तादर्थ्ये तथा नो भवति इति अयं भेद:। यथा 'ब्राह्मणाय गौ:' अत्र गौ: ब्राह्मणार्थमस्ति इत्येव बुध्यते न कश्चित् सम्बन्ध:।[380] हरिणा प्रदत्तं सम्प्रदानकारकस्य लक्षणद्वयं हेलाराज: मिथ: पूरकं स्वीकरोति एकस्मिन् अनन्विते अपरस्य प्रवृत्तिरितिवत्।[381]

वाक्यपदीयस्य इव वृत्तिकारोऽपि सम्प्रदानस्य व्युत्पत्तिलभ्यम् अर्थं स्वीकरोति। 'कर्मणा यमभिप्रैति' अस्य अर्थग्रहणे असौ ददातिकर्मणा इति अर्थं गृह्णाति।[382] कर्मशब्दाच्च भाष्यकारकृतं क्रियाग्रहणं वृत्तिकार: न स्वीकरोति, अपितु अत्र प्रसङ्गे कात्यायनस्य मतं समर्थयति। 'पत्ये शेते', 'युद्धाय सन्नह्यते' इत्यादिप्रयोगसिद्धये वृत्तिकार: कात्यायनस्य

---

[377] अन्वर्थत्वात् सम्प्रदानशब्दस्य त्यागाङ्गम् इति लक्षणलाभ:। दानं स्वत्वनिवृत्य परस्वत्वापादनम्, तत्र चान्यं निमित्तम्.......। तत्रैव, ३३१.

[378] रजकस्य वस्त्रं ददाति, घ्नत: पृष्ठं ददातीत्यादौ तु ददात्यर्थो नास्ति। त्यागो हि सह तेन चाधानात्मकेन ममत्वविच्छेदस्याक्षेपात् परोपयोगाभिसन्धिना परस्वत्वापादनमपि स्वीकृतम्। अत्र च तद्भाव इति गौणोऽयं ददाते: प्रयोग:, तत्रैव, पृ.३३२.

[379] १. न शूद्राय मतिं दद्यात् इत्यत्रापि मतिसन्तानस्य प्रक्रमोऽस्त्येव परोपयोग:........अन्ये तु मतेर्दातृसम्बन्धावगमाद् गौण इत्याहु:। तत्रैव, पृ.३३२.

२, खण्डिकोपाध्यायस्तस्मै ...........दातु: स्वमात्रा सहाभिसन्धिरस्त्येव। यद्यपि प्रतिकूलरूपत्वेच्छापेतस्य तदानीम् उपयोगो नास्ति तथापि फलद्वारेणास्त्येव परोपयोगित्वम्। तत्रैव, पृ.३३३.

[380] ननु च दानस्य तदर्थत्वात्..........सम्प्रदानसंज्ञा न्याय:, तत्रैव,३३२.

[381] अन्वर्थत्वात् सम्प्रदानशब्दस्य लौकिक एव................द्विविधं सम्प्रदानं व्याख्यातम्, तत्रैव, पृ.३३५.

[382] अन्वर्थसंज्ञाविज्ञानाद् ददातिकर्मणेति विज्ञायते। काशिका, पृ.५४६.

वार्तिकमेव गतिं मनुते।[383] 'कर्मण: करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा' इदमपि वार्तिकमसौ 'पशुना रूद्रं यजते' इति उदाहरणविवरणेन बोधयति।[384]

जिनेन्द्रबुद्धि: सम्प्रदानकारके भाष्यकारवृत्तिकारयो: मतं समीक्षयन् व्युत्पत्तिलभ्यं लक्षणं ददाति-'सम्यक् प्रकर्षेण यस्मै दीयते तत् सम्प्रदानम्'।[385] वृत्तिकारेणोक्तं ददातिकर्मणा इत्यस्य स्पष्टीकरणेऽसौ स्पष्टयति-'ददातेर्धातो: कर्मद्वारा' अस्य इव। दानञ्चापि स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वाप्तिं प्रतिपादयति। एतादृशदाने प्रेरणात्रयं प्रतिपादयति जिनेन्द्रबुद्धि: ज्येष्ठदेवतादिभ्य: सम्मानेन दीयमानम्, याचकेभ्य: कारूण्येन दीयमानम्, याचकादिभ्य: दत्तं किन्तु तत्र मनोकामनाविशेषस्य काङ्क्षिता इति एतद्वत्। दानान्तरञ्च दत्तपदार्थस्य स्वामी देवता वा याचको भवतीति शेष:।[386]

'रजकस्य वस्त्रं ददाति', 'घ्नत: पृष्ठं ददाति' इत्यादौ तु न सम्यक् दानम् अतो न चात्र सम्प्रदानमिति।[387] कैय्यटकौण्डभट्टनागेशानां नात्र विषये सम्मति:, तद्यथा स्थानं वक्ष्यते।

जिनेन्द्रबुद्धि: सम्प्रदानसूत्रे पदजातस्य औचित्यं समीक्षते। 'अभि-प्र' इत्युपसर्गयो: भाष्यकारोक्तं कालकृतबन्धननिराकरणरूपमर्थम् असौ स्वीकरोति अपि अन्यदेव प्रतिपाद्यमनयोस्तन्मतेन।[388]

हरदत्त: सम्प्रदानकारके वृत्तिकारमतं भर्तृहरि-जिनेन्द्रबुद्धयो: विवरणानां प्रकाशे समीक्षते। पाणिनीयं सूत्रं च 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इति व्याचष्टे-'ददातिकर्मणा करणभूतेन कर्ता यम् अभिप्रैति' इति अस्य इव। भर्तृहरे: अनिराकरणादीत्यादि व्याख्यानसमानम् एव।[389] स्वसम्मतसूत्रार्थस्य समर्थने उहा इति –

---

[383] तत्रैव, पृ.५४०-५४९

[384] तत्रैव, पृ.५४९

[385] तत्रैव, पृ.५४६

[386] दानं हि नाम पूजानुग्रहकामाय स्वकीयद्रव्यपरित्याग: परस्वत्वापत्ति:। तत्रैव, पृ.५४६.

[387] तत्रैव, पृ.५४६

[388] कर्मणेति किमर्थम्?..........अभिप्रग्रहान्त। अस्ति ह्यत्राचार्यस्य कश्चिदधिको अर्थो अभिमत: यस्य वा भाषणायाधिकं शब्दान्यतरं प्रयुक्तम् इति गम्यते............। तत्रैव, पृ.५४६

[389] तत्रैव, पृ.५४५-५४६

'वृक्षाय जलं ददाति', 'देवेभ्य: सुमनसो अर्पयति', 'याजकाय भिक्षां ददाति' इतिवत् तत्र रजकस्य वस्त्रं ददाति' 'घ्नत: पृष्ठं ददाती'त्यनयो: प्रयोगयो: ददातिपदं ददातेर्धातो: प्रधानोऽर्थ: नास्ति अत: न सम्प्रदानम्।[390] 'खण्डिकोपाध्याय: शिष्याय चपेटां ददाति' 'न शूद्राय मतिं दद्यात्' इति वाक्ययो: कैय्यट: दाधातोरर्थ: स्वामित्वपरिवर्तनं न स्वीकरोति। किन्तु हरदत्त: तद्विरोधेन तत्र सम्यक् दानं व्याहरति।[391]

'अभि-प्र'-उपसर्गयो: अर्थविवरणे हरदत्त: पतञ्जलिं जिनेन्द्रबुद्धिं च अनुकरोति। तदनुसारमुपसर्गद्वयेनानेन अर्थद्वयस्य ग्रहणं भवति-१.कालकृतबन्धननिवृत्ति:, २.(सम्प्रदाने च) कर्तुरीप्सा इति।[392]

पुरुषोत्तम: सम्प्रदानटीकाप्रसङ्गे 'कर्मणायमभिप्रैति स सम्प्रदानम्' इति सूत्रे दानार्थकधातुयोगे सम्प्रदानं स्वीकरोति जिनेन्द्रबुद्धिना व्याख्यातमिव किन्तु समर्पणरूप:, 'दा'धात्वर्थ अस्य न सम्मत:। 'शत्रवे भयं ददाति', 'गुरवे धनं निर्यातयति रूष्ट:' इत्याद्युदाहरणसहितं स्वपक्षं प्रदर्शयत्यसौ।[393] अस्याशयोऽस्ति यत् जिनेन्द्रबुद्धे: मतानुसारं ददातेर्धातो: आदरसौजन्यादिकमेव ग्राह्यं किन्तु उदाहरणे तथा न दृश्यते। अपितु भयादिकं दीयमानं गम्यते। 'पट्टिकोपाध्याय: शिष्याय चपेटाम् अदात्' न हि एतादृशै: उदाहरणे जिनेन्द्रबुद्धे: मतं साध्यते इति निराकरोति भाषावृत्तिकार:। 'रजकाय वस्त्रं ददाति', 'घ्नत: पृष्ठं ददाति' इत्यादिवाक्येषु सम्प्रदानाभावात् षष्ठी इति तु यथावत् प्रतिपादयत्यसौ।[394] पतञ्जले: 'कर्मणा' पदेन क्रियाग्रहणमप्यस्य सम्मतम्।[395]

---

390 सम्यक् प्रदीयते यस्मै स सम्प्रदानम् इति अन्वर्थत्वात् संज्ञाया: ददातिकर्मणा यम् अभिप्रैति स सम्प्रदानम् इत्यर्थ:...........एवं रजकस्य वस्त्रं ददाति, घ्नत: पृष्ठं ददातीयत्र क अस्मान् न भवति?

391 तत्रैव, पृ.५४७

392 कर्मणेति किम्?..............अभिप्रग्रहणं कर्तव्यमेव, तत्रैव पृ.४५७.

393 भाषावृत्ति:, पृ.४३

394 कथं रजकस्य..........अविवक्षितत्वात्, तत्रैव, पृ.४३.

395 तत्क्रियया यद् अभिसम्बध्यते.............सूत्रेणैव। युद्धाय सन्नह्यते, पत्ये शेते, तत्रैव, पृ.४३

व्यावृत्तिकार: सम्प्रदाने दाधात्वर्थग्रहणे पुरूषोतविरूद्धं जिनेन्द्रबुद्धिमेव समर्थयति। किन्तु 'शत्रवे भयं ददाति' इत्यादिशङ्का: न सन्तोषप्रदा: समाधत्ते।[396] 'रूच्यार्थानां प्रीयमाण:' इत्यादिसूत्रेषु असौ भाषावृत्ते: मन्तव्यानां प्रतिपादने सफल: दृश्यते। क्रुधद्रुहेर्ष्येति सूत्रे कैय्यटानुसारम् अनेन व्याख्यायि।[397]

रामचन्द्र: प्रयोगरत्नमालायां पाणिने: सम्प्रदानसूत्रव्याख्याने वृत्तिकारमनुसरति मुख्यतया। 'कर्मणा'पदेन च 'दानस्य कर्मणा' इत्याशयं गृह्णाति।[398] 'पत्ये शेते' इत्यादि प्रयोगसिद्धये च वृत्तिकारमतसिद्धं नियमं करोति-'क्रिययापि यमभिप्रैति स सम्प्रदानम्' इति। एवं हि पाणिनिना सम्प्रदानप्रकरणे प्रतिपादितानाम् अन्यसूत्राणामपि व्याख्यां करोति। किन्तु व्याख्याने अस्य नूतनं योगदानं न्यूनमेव।[399]

तत्र प्रसादटीकाकार: विठ्ठलाचार्य: रामचन्द्रस्य सम्प्रदानकारकव्याख्याया: उपरि 'सम्यक् प्रदीयते यस्मै स सम्प्रदानम्' इत्यस्या: परिभाषाया: प्रभावं निरूपयति।[400] सम्प्रदानकारके पाणिने: लक्षणस्य पदकृत्येन अस्य अर्थं बोधयति।[401] भर्तृहरिकृतविभाजनानुगुणम् असौ सम्प्रदानकारकस्य भेदत्रयं प्रदर्शयति।[402]

भट्टोजिदीक्षित: सिद्धान्तकौमुद्यां 'सम्प्रदानलक्षणस्य' वृत्तिं कुर्वन् सम्प्रदानशब्दस्य व्युत्पत्यर्थं स्वीकरोति।[403] इदं च भाष्यकारस्यासम्मतं किन्तु भाष्यादेव 'खण्डिकोपाध्याय: तस्मै चपेटां ददाति', 'न शूद्राय मतिं दद्यात्' इत्याद्युदाहरणोद्धरणेन असौ स्वमतं

---

[396] अभि सर्वतो भावेनाभिलाषेण च सम्बन्धम् आह..........शत्रवे भयम् इति। तथा च भयानि दत्ता सीतायै इति भट्टि:। एतेन पूजानुग्रहकारकाम्यभि: सुद्रव्यस्य परार्पणं दानं तस्यार्पणस्थानं सम्प्रदानम्...........। भाषावृत्यर्थव्यावृत्ति: पृ.९६

[397] तत्रैव, पृ.९९

[398] दानस्य कर्मणा यम् अभिप्रैति स सम्प्रदानसंज्ञ: स्यात्। प्रयोगरत्नमाला, पृ. ४१२

[399] क्रियया यम् अभिप्रैति सोऽपि सम्प्रदानम्, तत्रैव, पृ.४१३, क्रियया यम् अभिप्रैति स सम्प्रदानम्, काशिका, पृ.५४८-५४९

[400] प्रक्रियाकौमुदी, पृ.४१४-४१३

[401] तत्रैव, पृ.४१२-४१३

[402] सम्प्रदानं त्रिविधम्, अनिराकर्तृ, प्रेरकम्, अनुमन्तृ च तथोक्तं भर्तृहरिणा अनिराकरणात् कर्तुस्त्यागाङ्गं कर्मणेप्सितम्, प्रेरणानुमतिभ्याञ्च लभते सम्प्रदानताम् इति, तत्रैव, पृ.४१३

[403] सम्प्रदानं त्रिविधम्, अनिराकर्तृ, प्रेरकम्, अनुमन्तृ च तथोक्तं भर्तृहरिणा अनिराकरणात् कर्तुस्त्यागाङ्गं कर्मणेप्सितम्, प्रेरणानुमतिभ्याञ्च लभते सम्प्रदानताम् इति, तत्रैव, पृ.४१३

पोषयति। 'रजकस्य वस्त्रं ददाति' अयं प्रयोग: काशिकाया: सिद्धान्तत्वेन न स्वीकर्तुं शक्यते अपितु भाष्यं तत्र शरणं भवति।[404] अस्मिन् प्रकरणे कात्यायनवार्तिकमपि दीक्षित: समर्थयति।[405]

कौण्डभट्ट: वैय्याकरणभूषणसारे चतुर्थीविभक्त्यर्थप्रतिपादनप्रसंगे सम्प्रदानकारकं विश्लेषयति। तदनुसारं सम्प्रदाने विहिताया: चतुर्थ्या: अर्थ: उद्देश्यं भवति। अत्रानुषङ्गे 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इति सूत्रं व्याचक्षाण: सम्प्रदानकारकम् असौ उद्देश्यत्वेन प्रतिपादयति।[406] कौण्डभट्ट: भूयोऽपि विवृणोति यत् उद्देश्यम् मीमांसकेषु 'शेषि'संज्ञया प्रसिद्धमिति। भट्टोजिदीक्षितमिव सोऽपि 'मैत्रावरुणाय दण्डं प्रयच्छतीति प्रयोगोद्धरणपूर्वकं 'शेषिण: सङ्कल्पनामातनोति।[407] 'रजकाय वस्त्रं ददाति' इति वाक्येऽपि अयं भाष्यकारस्य सन्दर्भेण साधुत्वं विवृणोति।[408] सम्प्रदानभेदानां वर्णनं कुर्वाणोऽयं वाक्यपदीयकारिकां समर्थितवान् तथा च चतुर्विधसम्प्रदानभेदान् निरूपितवान्।[409]

हरिवल्लभ: स्वटीकायां कौण्डभट्टेन प्रतिपादितम् उद्देश्यं व्याख्यानेन स्पष्टीकृतम्। 'विप्राय गां ददाति', 'वृक्षायोदकं सिञ्चति' इति उदाहरणदर्शनेन उद्देश्यं विवेचयति। सम्प्रदाने तार्किकसिद्धानां समीक्षणं प्रस्तौति असौ।[410]

नागेश: सम्प्रदानकारकं व्याचक्षाण आह यत् कर्ता कर्मणा येन जनेन सम्बद्धुमिच्छति स सम्प्रदानं भवति।[411] ब्राह्मणाय गां ददाति इत्युदाहरणे कर्ता ददातिक्रियाया: गोरूपकर्मणा ब्राह्मणेन सह आत्मानं सम्बद्धुमिच्छति। अतो ब्राह्मण: सम्प्रदानं 'य: सम्प्रदानस्य भूमिकां

---

[404] दानस्य कर्मणा यम् अभिप्रैति स सम्प्रदानसंज्ञ: स्यात्। सिद्धान्तकौमुदी, (मो.ब.स.) पृ.४३६

[405] शब्दकौस्तुभ:, पृ.१२०-१२१, प्रौढमनोरमा, पृ.५१७-५१८,

[406] उद्देश्यश्चतुर्थ्यर्थ:..........उद्देश्यम्, वैय्याकरणभूषणसार:, पृ.१८५

[407] इदमेव शेषित्वम्...............दण्डादीनां न प्रयोग: किन्तु चतुर्थीश्रुत्यार्थकर्मेति तत्र निर्णीतम्, तत्रैव पृ.१८७-८

[408] तत्रैव पृ. १८६

[409] तत्रैव पृ. १९०

[410] तत्रैव, पृ.१८६-१८७

[411] सा शक्तिश्च तद्धात्वर्थकर्मनिष्ठफलनिरूपकत्वेनेच्छाविषयो यस्तन्निष्ठफलनिरूपकत्वेनेच्छाविषयो यस्तन्निष्ठ:, तत्रैव, पृ.१२६१.

निर्वहति स उद्देश्यं शेषि वा भवति। वस्तुत: सम्प्रदानम् उद्देश्यशेष्यो: समानार्थक एव। नाशेश: मैत्रावरुणाय दण्डं प्रयच्छति इत्यनेन मीमांसाया: उदाहरणेन शेषिसंकल्पनां विशेषयति।[412]

वैय्याकरणा: कारकेषु शक्ते: सिद्धान्तं निरूपयन्ति। नागेश: सम्प्रदानकारके सम्प्रदानत्वशक्तित्वं प्रतिपादयति। तस्याश्च चतुर्थ्या: विभक्ते: बोधं स्वीकरोति।[413]

भट्टोजिदीक्षित: यत् सम्प्रदानसूत्रव्याख्याने 'दानस्य कर्मणा यम् अभिप्रैति सम्प्रदानमिति टीकते।[414] तन्नासम्मतं नागेशस्य। तदनुसारं इदं पाणिने: सूत्रस्य प्रतिपाद्यं नास्ति। अपितु भट्टोजिदीक्षितस्य अयथार्थ: अवबोध: व्याख्यायां दानस्येति पदग्रहणम्।[415] तथैव जिनेन्द्रबुद्धे: सम्प्रदानस्य सम्यक् प्रदानरूपं विवरणमपि निराकरोति। नागेश: 'रजकाय वस्त्रं ददाति' इदमपि वाक्यं साधु मनुते।[416] यद्यपि वैय्याकरणानाम् अधिकै: स्वीकृतं 'रजकस्य वस्त्रं ददाति' इति प्रयोगमपि स न आक्षिपति।

नागेश: दाधात्वर्थविवरणेन सम्प्रदानकारकं युक्तिसहितं बोधयति। तन्मते दाधातु: क्वचिदेव स्वस्वत्वनिवृत्तिपूर्वके परस्वत्वापादने प्रयुज्यते। यथा- 'विप्राय गां ददाति' इत्यत्र।[417] अन्यत्र अन्यार्थेषु अपि उपयुज्यते। यथा 'पितृभ्य: श्राद्धं दद्यात्' इति वाक्ये पितॄणाम् अनुपस्थितो पित्रतिरिक्तस्य कस्यचित् स्वत्वं प्राप्यते।[418] 'रजकाय वस्त्रं ददाति' अत्र रजकस्य हस्तयो: प्रापणमस्यार्थ:[419], चपेटां ददाति अत्र च चिबुकस्पर्श: हस्तेन

---

[412] तत्रैव, पृ.१२६१.

[413] कारकचतुर्थ्या सम्प्रदानता-शक्तिमान् अर्थ:, तत्रैव, पृ.१२६१

[414] कर्मणायं दानस्येति। धात्वर्थस्येत्यर्थ:। इदम् उपलक्षणं क्रियामात्रस्याहु:....प्रत्याख्यापरं भाष्यं संगच्छते। बृहच्छब्देन्दुशेखर:, पृ.८८२

[415] तत्रैव, पृ.८८२

[416] यत्तु तद्धात्वर्थकर्मसम्बन्धजन्यफलं....पदार्थान्तरम् एव। लघुमञ्जूषा, पृ.१२६२.

[417] तत्रैव, पृ.१२६२-१२६३.

[418] पितृभ्य: श्राद्धं दद्यात्........परस्वत्वहेतुश्च त्याग एव, तत्रैव, पृ.१२६३.

[419] अत एव विदेशस्थपितरम् उद्दिश्य....इति व्यवहार:, तत्रैव, पृ.१२६३

इत्यर्थः।[420] मतिं न दद्यात् इत्यत्र अध्यापनं दाधात्वर्थ इति। अन्यदपि विभजनादिकमर्थं ददातेर्धातोर्निरूप्य स्वमतं पोषयत्यसौ।[421]

'रूच्यार्थानां प्रीयमाणः', 'स्पृहेरीप्सितः', इत्यादिष्वपि धातूनाम् अर्थविवरणे सूत्रस्य आशयं प्रकाशयति नागेशः।[422] एवं हि पाणिनेः सम्प्रदानविषयकं सिद्धान्तं याथार्थ्येन निरूपयितुं यततेऽसौ।[423]

पाणिनीयेतरव्याकरणेषु सम्प्रदानकारकव्याख्यानं कलापे शर्ववर्मा 'यस्मै दित्सा रोचते धारयते वा तत्सम्प्रदानम्[424] व्युत्पत्याधारितं लक्षणं विदधाति। तत्र प्रसङ्गे अन्यदपि सूत्रद्वयं 'रूच्यर्थानां प्रीयमाणः', 'धारेरूत्तमर्णः' इति स्वग्रन्थे स्वीकरोति किन्तु शिष्टानि सूत्राणि अनावश्यकत्वात् त्यजति 'स्पृहेरीप्सितः' इत्यादीनि। दुर्गसिंहः अस्य व्याख्यानप्रसङ्गे 'सम्यक् प्रकारेण दीयते यस्मै' इति जिनेन्द्रबुद्धिस्वीकृतमर्थमेव निरूप्य तदनुषङ्गेन 'रजकस्य वस्त्रं ददातीत्याद्युदाहरणेषु सम्प्रदानं निराकरोति।[425] किन्तु पुष्पेभ्यः स्पृहयतीत्यादौ पूर्वेषां वैय्याकरणानां प्रतिकूलतया सम्प्रदानं न स्वीकरोति। तन्मतेन अत्रोदाहरणे तादर्थ्ये चतुर्थी भवति।[426] त्रिलोचनः अपि टीकमाणः दुर्गसिंहं समर्थयति।[427]

सुषेणाचार्य शर्ववर्मणः सम्प्रदानसूत्रस्य टीकायां नेन्द्रबुद्धिकृतव्याख्यानोक्त'ददातिकर्मणः' इति सन्दर्भेण शर्वस्य सूत्रं पाणिनेः 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इति सूत्रसमानार्थकं विज्ञापयति। तदनुसारं सम्यक् प्रदानमेव सम्प्रदानं स्यात्। तच्च दाधातूक्तक्रियाफलाश्रयरूपमिति। तत्रासौ उदाहरणेन साधयति यत् सम्यक् प्रदानाभावे न सम्प्रदानमिति। यथा- 'राज्ञो दण्डं ददाति' इति वाक्ये न सम्प्रदानं दाधातोः स्वेतरार्थे

---

420 तत्रैव, पृ.१२६६

421 तत्रैव, पृ.१२६५.

422 तत्रैव, पृ.१२६८-१२७५

423 तत्रैव, पृ.१२६८-१२७५

424 कलाप, सू.२१६.

425 दातुम् इच्छेत्यादि, तथा रजकस्य वस्त्रं ददाति, घ्नतः पृष्ठं ददाति-स्वामित्वं लभते यदि, तत्रैव, पृ.१९६

426 तत्रैव, पृ.१९७

427 तथा सम् उपसर्गेण सम्यक् प्रदीयते यस्मै तत् सम्प्रदानं........यद्वातादर्थ्यविवक्षायामेवात्र चतुर्थी, तत्रैव, पृ.१९८-१९९

प्रयोगात्। तथैव हि 'रजकस्य वस्त्रं ददातीत्यत्रापि। 'दाशरथाय मैथिली प्रदीयताम्' अत्रासौ यत्नेन सम्प्रदानं निरूपयति। सीतायां रावणस्य अधिकाराभावे कथं सम्यक्प्रदानम् इति प्रश्ने सुषेण: समाधत्ते यदयमधिकार: अपहरणेन उत्पन्न: सम्यक् प्रदाने साधनभूतश्चेति। अत्र स्वयमपि असन्तुष्ट: सुषेण: इदं प्रयोगं पुन: तादर्थ्ये चतुर्थीप्रयोगं स्वीकरोति। चन्द्रगोमी सम्प्रदानस्य व्युत्पत्तिपरकमर्थं स्वीकृत्य सम्यक्प्रदानाभावे रजकस्य वस्त्रं ददातीत्यत्र सम्प्रदानं नाङ्गीकरोति।[428] असौ 'रूच्यर्थानां प्रीयमाण:', 'धारेरूत्तमर्ण:' इत्यादीनि सूत्राणि अत्र स्वीकरोति।[429]

क्रमदीश्वर: संक्षिप्तसारे 'प्रदानात्संप्रदानम्' इति सम्प्रदानकारकं लक्षयति। अनेन सहैव सम्प्रदानसंज्ञाविधायीनि अन्यानि अपि सूत्राणि चकार-'ईप्सितादि: स्पृहादे:', 'यद् अभिप्रेत्य धात्वर्थ:', 'साधुर्धारयते:' इत्यादीनि।[430] प्रथमलक्षणे न उत्तरै: साध्यन्ते। असौ च विधानेषु मुख्यत: पाणिनिं कात्यायनश्चानुसरति। टीकाकार: जुमरनन्दी 'प्रदानात्सम्प्रदानमितिलक्षणव्याख्याने सम्प्रदानं नाम प्रकृष्टम् आत्यन्तिकं दानमि'ति स्वीकरोति।[431] क्रमदीश्वरस्य 'यदभिप्रेत्य धात्वर्थ:' इति सूत्रेण 'पत्ये शेते' 'युद्धाय सन्नह्यते राजा' इत्यादीन् प्रयोगान् साधयति।[432] कात्यायनवार्तिके सम्प्रदानकारकविषये अयमाशय: लक्षितपूर्व:। गोपिचन्द्र: स्वटीकायां जुमरनन्दिनोक्तस्य 'आत्यन्तिकदानस्य अभिप्रायं स्पष्टयति। तदनुसारं 'भयानि दत्तानि सीतायै', 'माषान् अस्मै तिलेभ्य: प्रतियच्छति'। अनयोरुदाहरणयो: आत्यन्तिकदानं परिलक्ष्यते अत एवात्र सम्प्रदानमिति।

---

[428] चान्द्र., पृ.१७४

[429] तत्रैव, पृ.१७६

[430] संक्षिप्तसार:, सू.१७

[431] (१) ईप्सितादि: स्पृहादे:, तत्रैव.सू.१८, स्पृहादेरीप्सित:, पा.सू.१/४/३६, (२) यदभिप्रेत्यधात्वर्थ:, संक्षिप्तसार:, कारक. सू.१९, क्रियाग्रहणम्, वार्तिकम्, (३) यत् प्रीतिरूच्यर्थकर्ता, संक्षिप्तसार:, सू.२०, रूच्यर्थानां प्रीयमाण:, पा.सू.१/४/३३, (४) साधुर्धारयते:, संक्षिप्तसार:, सू.२१, धारेरूत्तमर्ण:, पा.सू. १/४/३५, (५) क्रुधद्रुहेर्ष्यासूयार्थानां यत्रार्थ: कोपे, संक्षिप्तसार:, कारक.सू.२२, क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोप:, पा.सू.१/४/३७ (६) श्लाघतेर्यज्जनीप्सा, संक्षिप्त.का.सू.२३. श्लाघ्ह्नुङ्शपां ज्ञीप्स्यमान:,पा.सू.१/४/३४, (७) राधीक्षोर्विविधप्रश्न: यस्य, संक्षिप्त., का. सू.२५, राधीक्ष्योर्यस्य विप्रश्न:, पा.सू. १/४/३९, (८) प्रत्याङ्भ्यां अनुप्रतिगृणश्च गम्यपूर्वकक्रिया कर्ता, संक्षिप्त.का.सू.२५, (अ) प्रत्याङ्भ्यां श्रुव: पूर्वस्य च कर्ता, पा.सू.१/४/४०, (आ) अनुप्रतिगृणश्च, पा.सू.१/४/४१

[432] तत्रैव. पृ. १००७

अपरत्र च 'रजकस्य वस्त्रं ददाति', 'राज्ञो दण्डं ददाति', 'घ्नत: पृष्ठं ददाति' इत्यादिषु आत्यन्तिकदानाभावे न सम्प्रदानमिति।[433] 'आत्यन्तिकदानस्य कृते पुनरनादानम्' अस्य मतेन।

देवनन्दी जैनेन्द्रव्याकरणे सम्प्रदानकारकं परिभाषयति-'कर्मणोपेय: सम्प्रदानमि'ति[434] पाणिनीयलक्षणे किञ्चित्परिवर्तनेन। अभयनन्दी इदं लक्षणं वृत्तिकारसिद्धान्तानुगुणं दाधात्वर्थेन सह सम्बध्नाति। भाष्यकारानुकरणेन च कर्मशब्देन क्रियाग्रहणमपि करोति। अनेन न केवलम् असौ 'उपाध्याय: गां ददाति' इत्यादीन् प्रयोगान् साधयति अपितु 'युद्धाय संन्नह्यते' 'रोचते देवदत्ताय मोदकम्' इत्यादीनपि तत्र समावेशयति। 'रजकस्य वस्त्रं ददाति' इत्यादौ च पूर्णतया दानाभावे सम्प्रदानं स्वीकरोति।

हेमचन्द्र: शब्दानुशासने पाणिनीयं[435] सम्प्रदानलक्षणम् एव[436] भिन्नतया निरूपयति-'कर्माभिप्रेय: सम्प्रदानमि'ति। भाष्यकारभेदेन च तत्रैव लक्षणे क्रियाग्रहणमपि स्वीकरोति। तदनुसारं कर्ता वस्तुना केनापि क्रियया वा कयाचित् येन सह आदरपूर्णं, सौमनस्यपूर्णं वा सम्बन्धं स्थापयितुमीहते स सम्प्रदानं भवतीति।[437] अयमाशय: जिनेन्द्रबुद्धेरप्यस्ति किन्तु तस्य 'सम्यक् प्रदीयते यस्मै' इत्येनमर्थं हेमचन्द्र: न स्वीकरोति। अस्य टीकाकार:[438] चन्द्रसागराग्नि: 'वाताय चक्षुर्ददाति' 'छात्राय चपेटां ददाति' इत्याद्युदाहरणं सम्प्रदानत्वं निरूपयति अनेन लक्षणेन। पतञ्जलिना स्वीकृतपूर्व: अयं प्रपञ्च: अपि।[439]

---

433 यस्य पुनरादानं नास्ति.......किं पुनर्दानं कर्त्रा क्रियमाणम्? यत्तेन स्वेच्छया दीयते न तु भयादिना अत एव घ्नत: पृष्ठं ददाति, राज्ञो दण्डं ददातीत्यादौ न सम्प्रदानम्, तत्रैव, पृ.१००६७.

434 जैनेन्द्र:, १/२/११०

435 तत्रैव, पृ.९२-९३.

436 शब्दानुशासनम्, २/२/२५

437 कर्मणा व्याप्येन क्रियाया: वा श्रद्धानुग्रहादिकाम्या यम् अभिसम्बध्नाति, तत्रैव, पृ.७४.

438 अभिप्रग्रहणाद् इह न भवति- घ्नत: पृष्ठं ददाति, रजकस्य वस्त्रं ददाति, .....इह च भवति वाताय चक्षुर्ददाति, छात्राय चपेटां प्रयच्छति, तत्रैव, पृ.७४.

439 तत्रैव, पृ.७४

अष्टाध्याय्या: सूत्रद्वयं 'स्पृहेरीप्सित:', 'क्रुधद्रुहेर्ष्यासूयानां यं प्रति कोप:' इत्यपि असौ स्वीकरोति।[440] व्याख्याने च 'यं प्रति कोप:' इति विधानस्यौचित्यं निरूपयति।[441] अत्र प्रकरणे पाणिने: अन्यानि विधानानि असौ नाङ्गीकरोति। 'शत्रवे भयं ददाति'त्यादीनामपि न सम्प्रदानत्वमस्य मतेन।

मुग्धबोधकार: सम्प्रदानेऽर्थे 'भ'संज्ञां प्रतिपादयति। व्याख्यायां च असौ शर्ववर्मसम्मतं विवरणं प्रस्तौति। सहैवासौ पाणिने: अन्यानि अपि सम्प्रदानविधान्यपि 'धा'संज्ञाव्याख्याने एव विवृणोति नैषां पृथग्विधानं 'रूच्यर्थानां प्रीयमाण:' इत्यादीनामिव।[442]

दुर्गादासविद्यावागीश: बोपदेवस्य मतं सूक्ष्मेक्षिकया समीक्षते। सुषेणाचार्येण सम्प्रदानकारे प्रतिपादितसिद्धान्तैरस्य मतेन साम्यं वर्तते। विशेषत: 'शिष्याय चपेटां ददाति', शत्रवे भयं ददाति इत्यादिषु गौणतयैव सम्प्रदानत्वं स्वीकरोत्यसौ।[443] द्वितीयोदाहरणे ददातिपदेन जनयति इत्यर्थं गृह्णाति दुर्गादास:। अतो गौणत्वं सम्प्रदाने।

रामतर्कवागीशोऽपि सम्प्रदानकारकमधिकृत्य बोपदेवस्य मतं तन्वान: तदुक्तं लक्षणं समीक्षते। तन्मतेन 'यस्मै दित्सा' इत्यनेन स जन: गृह्यते यस्मै कर्ता स्वातन्त्र्येण सम्पूर्णतया च किञ्चिद्वस्तु ददाति। यथा 'विप्राय गां ददाति'। 'माषान् अस्मै तिलेभ्य: प्रतियच्छति। तादृशदानाभावाच्च रजकस्य वस्त्रं ददातीत्यादौ न सम्प्रदानम्। 'भयानि दत्ता सीतायै' इत्यत्र वक्तु: विवक्षा साधुत्वकारणमिति स्वीकरोत्यसौ।[444]

---

440 स्पृहयतेर्धातोर्व्याप्यं वा सम्प्रदानसंज्ञं भवति, पुष्पेभ्य: पुष्पाणि वा स्पृहयति, तत्रैव, पृ.७४

441 तत्रैव, पृ.७४.

442 यस्मै दित्सासूयाक्रोधेर्ष्यारूचि……धार्यथा-भम्……..मुग्ध-कारक., सू.१५.१५.

443 तत्रैव, पृ.६७

444 तत्रैव, पृ.६७.

सारस्वतव्याकरणस्य कर्ता सम्प्रदानकारकं दानपात्रमिति पदेन विवृणोति। अस्य वर्णनेन ज्ञायते यत् कर्ता यस्मै पूर्णतया श्रद्धया च किञ्चिद्दातुमिच्छति स सम्प्रदानमिति। यथा 'वेदविदे गां ददाति'।[445] अत्र सम्प्रदानेन आदरस्यापि ग्रहणं क्रियते।

सम्प्रदाने दातुः इच्छा आवश्यकी स्वीकृता अनेन। 'राज्ञो दण्डं ददाति' इति परम्परितोदाहरणविरुद्धं च कालिदास्य रघुवंशात् 'ददौ व्याजेन राघवे करम्' इति सम्प्रदानस्य उदाहरणं प्रस्तुतम्।[446] सारस्वतव्याकरणे सम्प्रदानकारकं त्रिप्रकारकं विवृतम् अस्ति- अनुमातृ, अनिराकर्तृ, प्रेरकश्च।[447] भर्तृहरेरिव इदमपि विभाजनम्। 'पत्ये शेते' इत्यादीनां साधुत्वाय वैय्याकरणः 'क्रियया यम् अभिप्रैति सोऽपि सम्प्रदानम्' इति पृथक् सूत्रं करोति।[448] टीकाकारः चन्द्रकीर्तिः 'दानपात्रं' धार्मिककारणेन वस्तुनः स्वाम्यस्य प्राप्तकर्ता भवति इति प्रतिपादयति।[449] रामाश्रयश्च अनुभूतिस्वरूपाचार्यस्य विवरणे मौनमेवाश्रयते। पद्मनाभः सौपद्मव्याकरणे 'प्रदानाभिसम्बध्यमानं सम्प्रदानम् इति लक्षयति सम्प्रदानकारकम्।[450] असौ वैय्याकरणः व्युत्पत्तिलभ्यमर्थमेव स्वीकरोति सम्प्रदानकारकव्याख्याने। 'शत्रवे भयं ददाती'त्यादौ च सम्यक्प्रदानेन सम्प्रदानं स्वीकरोति।[451]

'स्पृहेरीप्सितः', 'धारेरुत्तमर्णः', इत्यपि पाणिनेः द्वे सूत्रे स्वीकरोति पद्मनाभः किन्तु तत्र प्रसङ्गे अन्यसूत्राणां सौपद्मव्याकरणे समावेशः नास्ति। टीकाकारः विष्णुमित्रः पद्मनाभस्य सम्प्रदानकारकसूत्रे टीकमाणः जिनेन्द्रबुद्धेः विवरणं शब्दान्तरेण

---

[445] दानपात्रे सम्प्रदानकारकचतुर्थी, सम्यक् श्रेयोबुद्ध्या प्रदीयते यस्मै तत् सम्प्रदानकारकम्, वेदविदे गां ददाति, सारस्वत., पृ.८५

[446] अन्यत्र- राज्ञो दण्डं ददाति, रजकस्य वस्त्रं ददाति.....व्याजेन राघवाय करम् इति महाकविप्रयोगदर्शनात्, तत्रैव, पृ.८५

[447] तत्रैव, पृ.८४

[448] तत्रैव, पृ.८४

[449] सारस्वतव्याकरणे चन्द्रकीर्तिटीका, पृ.१५५

[450] सुपद्म., पृ.७३

[451] तत्रैव, पृ.७४.

प्रतिपादयति।[452] अथापि 'शत्रवे भयं ददाति', 'भयानि दत्ता सीतायै', इत्यादि प्रयोगेषु 'अभि' इत्युपसर्गसमर्थितस्य 'आभिमुख्य' अभावे गौणतया सम्प्रदानत्वमङ्गीकरोति।[453]

हरिनामामृतकार: जीवगोस्वामी सौपद्मानुकरणेन सम्प्रदानकारकं लक्षयति- 'प्रदेयाभिसम्बध्यमानं सम्प्रदानमि'ति।[454] तत्र प्रदेयशब्दं च 'आत्यन्तिकं देयमिति व्याख्याति। 'रजकस्य वस्त्रं ददाति' इति वाक्ये आत्यन्तिकदानाभावे सम्प्रदानत्वं निराकरोत्यसौ।[455] सम्प्रदानकारकप्रकरणे अन्येषामपि पाणिनीयसूत्राणां परिवर्तनं कृत्वा ग्रहणं करोति स्वशास्त्रे।[456]

प्रयोगरत्नमालाकार: 'सम्यग्दानं यमुद्दिश्य.........सम्प्रदानं तदीष्यते' इति[457] परम्परितं सम्प्रदानलक्षणं प्रत्यपीपदत्। जिनेन्द्रबुद्धे अनुकरणेन च तद्व्याख्याति।[458] 'पत्ये शेते' इत्यादिप्रयोगसाधनाय 'क्रियायोगे यन्निमितम् इत्यादिना पृथग्रूपेण नियमं निर्दिशति। अत्र प्रकरणे अन्येषाम् पाणिनीयनियमानां समावेशनं सहैव 'कर्मण: करणसंज्ञा'इत्यादिवार्तिकम् अपि असौ प्रतिपादयति।[459]

## पाणिनीयव्याकरणे अपादानकारकव्याख्यानम्

पाणिनि: ध्रुवमपायेऽपादानमि'ति[460] अपादानकारकं लक्षयति। केषाञ्चन अवशिष्टप्रयोगाणां साधनाय इतराण्यपि सप्तसूत्राणि प्रणिनाय। 'भीत्रार्थानां भयहेतु:',

---

452 ननु राज्ञो दण्डं ददाति, घ्नत: पृष्ठं ददातीत्यादौ......सम्प्रदानमिति महतीयं संज्ञा, सम्यक् प्रकर्षेण यस्मै तत् सम्प्रदानं.........स्वेच्छया पूजानुग्रहकाम्यया एवात्र दानाभिसम्बन्ध: तत्रैव यथा स्यात्, तत्रैव, पृ.७५.

453 शत्रवे भयं ददाति......गौणं सम्प्रदानत्वम्, तत्रैव, पृ.७५.

454 हरिनामामृतम्, सू.१०३९

455 तत्रैव, पृ.४१९-४५०

456 (१) रूच्यार्थैरिच्छन् ह.ना. सू. १०४१. (२) स्पृहेरभीष्टम् ह.ना. सू. १०४२. (३) धारेरधनिक:, ह.ना.सू.१०४३ (४) क्रुधाद्यर्थानां यं प्रति कोप:, तत्रैव, सू.१०४४ (५) श्लाघ्ह्नुङ्स्थाशपां ज्ञापयितुमिष्ट:, तत्रैव, सू.१०४७. (६) प्रत्याङ्भ्यां श्रुव: प्रार्थयिता, तत्रैव, सू.१०४८. (७) अनुप्रतिगृण: प्रशस्यमानवचन:, तत्रैव, सू.१०४९.

457 प्रयोगरत्न., पृ.३७०.

458 विशुद्धाभिसन्धिपूर्वकस्वस्वधांश-फलकव्यापारो यमुद्दिश्य तत् सम्प्रदानम्, तत्रैव. पृ.३७०.

459 तत्रैव, पृ.३७६-३८०

460 पा.सू.१/४/२४

‘पराजेरसोढः’, ‘वारणार्थानामीप्सितः’, ‘अन्तर्धौ येनादर्शनमिच्छति’, ‘आख्यातोपयोगे’, ‘जनिकर्तुः प्रकृतिः’, ‘भुवः प्रभवः’, इति एतदनुसारमेवास्ति।[461]

कात्यायनोऽपि वार्तिकेनैकेन पाणिनीयं विवरणं समर्थयति- ‘जुगुप्साविरामप्रमादार्थानाम् उपसंख्यानम्’ इति।[462]

पतञ्जलिः पाणिनीयलक्षणोक्तध्रौव्यं विमर्शयति।[463] तदनुसारं ध्रौव्येण न केवलं स्थिरवस्तूनाम् अपितु गतिशीलानामपि ग्रहणं भवति यथा धावतोऽश्वात् पतति’। भाष्यकारः तर्कपूर्वकम् इदम् अपादानस्य उदाहरणं प्रतिपादयति। यतो अश्वगतम् अश्वत्वं स्थिरमेव अस्ति अश्वत्वरूपसामान्यं च ध्रुवं सत् अपादानं भवेदिति। अन्यैरपि उदाहरणैः असौ स्वमतं पोषयति-‘अश्वात् त्रस्तात् पतितः’, रथात् प्रवीतात् पतितः’,‘सार्थाद् गच्छतो हीनः’ इत्यादिषु अपि सामान्ये एवम् अपादानत्वमिति। तत्र अश्वे अश्वत्वम्, आशुगामित्वं वा सामान्यम्, रथे तोष्ट्रत्वम्, सार्थेऽपि सार्थत्वम्।[464] एवमेव ध्रौव्ये योगः इति।[465]

अपायेनापि द्विविधः पृथग्भावः स्वीक्रियते भाष्यकृता-वास्तवः मानसश्चेति। अनेन च ‘भीत्रार्थानां भयहेतुः’, ‘पराजेरसोढः’, ‘वारणार्थानामीप्सितः’ इत्यादीनाम् उदाहरणेषु मानसापायस्य उपस्थितेः ध्रुवमपाये इत्यादिसूत्रेणैव अपादानं प्रतिपद्यते अतः उक्तसूत्राणि व्यर्थानि सन्ति इति रूपेण स्वीकृतिः। यथा ‘भीत्रार्थानां भयहेतुः इत्यस्योदाहरणे ‘वृकेभ्यो बिभेति’ ‘चौरेभ्यस्त्रायते’ अत्र मानसोऽपायः उच्यते वृकेभ्यः चोरेभ्यश्च कर्तुः। अपादानत्वञ्च मुख्यसूत्रेणैव उक्तं स्यात् अतः नात्र पृथक् सूत्रमावश्यकमिति।[466]

---

461 पा.सू.१/४/२५-३१

462 महाभाष्यम्, पृ.२४८.

463 इदं तर्हि वृक्षस्य पर्णं पतति, कुड्यस्य पिण्डं पतति, महाभाष्यम्, पृ.२४७.

464 इह तावत् अश्वात् त्रस्तात् पतति इति यत् तद् अश्वस्य अश्वत्वम्.........तद् ध्रुवं विवक्षितम्। तत्रैव, पृ.२४९.

465 तत्रैव, पृ.२४९.

466 तत्रैव, पृ.२५०

'पराजेरसोढः' इत्यस्यापि वैय्यर्थ्यं प्रादर्शयत् भाष्यकारः। 'अध्ययनात् पराजयते' अत्र वाक्ये अध्ययनात् मानसावायात् कर्तुः नेदमपि सूत्रमावश्यकमिति।[467] तथैव 'अन्तर्धौ येनादर्शनमिच्छति' अस्योदाहरणे 'उपाध्यायादन्तर्धत्ते इति वाक्ये कर्तुः उपाध्यायात् मानसोऽपायः विवक्ष्यते। अत एव मुख्यसूत्रैव अपादानसंज्ञाऽऽपद्येत न पुनः पृथक् सूत्रं कर्तुमावश्यकम्। 'वारणार्थानामीप्सितः' अत्र च प्रयोगे 'माषेभ्यो गां वारयति' इति वाक्ये। माषेभ्यः गोः अपायः कर्तुः मनसि बिम्बितः भवति। अतः मुख्यसूत्रोक्तं लक्षणमत्र प्रवर्तते न पृथग्लक्षणपेक्ष्यते।[468] आख्यातोपयोगे' इत्यत्रापि उपाध्यायात् वस्तुतः[469] निर्गत्य ज्ञानं अध्येतरि अस्याशयः उक्तः भवति न कर्तुमावश्यकं पृथक् सूत्रयितुमिति।[470]

'जनिकर्तुः प्रकृतिः', 'भुवः प्रभवः' इत्यनयोः उदाहरणे 'गोमयाद् वृश्चिको जायते', 'गोलोमाविलोमभ्यो दूर्वा जायते' 'हिमवतो गंगा प्रभवति' इत्यादिषु वास्तविकोऽपायः लक्ष्यते अतः नात्र आवश्यकं सूत्रयितुमिति। यत्र च कार्यकारणयोः अपायः न शक्यः यथा- 'दुग्धात् दधि भवति' तेषां प्रयोगाणां साधुत्वाय पृथग्लक्षणमसौ करोति- 'अथवान्याश्चान्याश्च प्रादुर्भवति'[471] एतदनुसारम्। ईदृशः कार्यकारणयोः पृथग्भावः बौद्धानां क्षणिकवादस्य, सांख्यानां सत्कार्यवादस्य, वैशेषिकाणाञ्च आरम्भवादस्य सन्दर्भेऽपि विवेचितः भवति।

हिमवतः गंगा सातत्येन प्रवहति अतः तस्याः पृथग्भावः नास्ति इत्यपि एकेषां मतं विवृण्वानः भाष्यकारः जलानां प्रतिक्षणम् अपायं गत्वा इदम् अपादानस्य स्फुटमुदाहरणं

---

467 तत्रैव, पृ.२५०-२५१.

468 तत्रैव, पृ.२५१-२५२

469 तत्रैव, पृ.२५२-२५३

470 कथम्? उपाध्यायात् अधीयते इति, उपक्रमति तस्माद् अध्ययनम्.........सन्ततत्वात् अथवा ज्योतिर्विज्ञानानि भवन्ति, तत्रैव, पृ.२५४

471 तत्रैव, पृ.२५५

प्रतिपादयति।[472] न कश्चिदपि समानां नदीं द्विधा प्रविशतीति पाश्चात्य (ग्रीक) विदुष: मतमपि पतञ्जले: सिद्धान्तं समर्थयति।

जुगुप्साविरामप्रमादार्थानाम् उपसंख्यानम्' इति कात्यायनस्य वार्तिकमपि भाष्यकार: अनावश्यकं प्रतिपादयति। 'धर्माद् विरमति' 'अधर्मात् प्रमाद्यति' इत्यादिषु धर्माधर्मयो: कर्तु: मानसिकापायात्। मुख्येन अपादानसूत्रेणैव अपादानमुक्तं भवति।[473] तथैव हि 'संकाश्यकेभ्य: पाटलिपुत्रका: अभिरूपतरा:' ईदृशतुलनात्मकवाक्येषु अपि तुलिताभ्याम् अन्यतरात् अन्यस्य अपाय: उच्यते वक्तुर्मनसि। अत एव पञ्चमीविभक्ते: इत्यपि सूत्रं नावश्यकम्।[474] नैय्यायिकानाम्, बौद्धानां च क्षणिकवादिनां परोक्षसन्दर्भेण भाष्यकार: 'आसनात् प्रेक्षति' इत्यत्रापि चक्षुरिन्द्रिये आसने च अपायस्य बोधात् अयमपि प्रयोग: मुख्योऽपादानप्रसङ्ग नात्र 'पञ्चमीविधाने ल्यब्लोपे कर्मण्युपसंख्यानम्' वार्तिकमावश्यकमिति।[475]

कैय्यट: पाणिनीये अपादानलक्षणे सयुक्तिकं व्याख्यानं प्रस्तौति। तस्यानुसारं 'ध्रुवमपायेऽपादानम्' अस्य 'यत्तदश्वे अश्वत्वम् आशुगामित्वं तद्ध्रुवं तच्च विवक्षितम्' इत्यभिप्राय:।[476] 'आख्यातोपयोगे' अस्य च 'ज्ञातृत्वाज्ज्ञानानि भवन्ति इतिवत्।[477] 'जनिकर्तु: प्रकृति:' अस्यापि अथवा 'अन्यश्चान्यस्य प्रादुर्भवन्ति' इत्येवम् अभिप्राय: भवति।[478] ध्रुवशब्दे कैय्यटस्य विवरणम् भर्तृहरे: समानम् अस्ति किन्तु प्राय: पतञ्जलेरनभिप्रैतम्।[479]

---

[472] उपक्रमन्ति.....अथवान्यश्चान्यस्य प्रादुर्भवन्ति, तत्रैव, पृ.२५५

[473] तत्रैव, पृ.२४८

[474] इह च संकाश्यकेभ्य:........एतत् प्रयुंक्ते, तत्रैव, पृ.२४८

[475] अपादानम् इत्येव सिद्धम्.......अन्यश्चान्यस्य प्रादुर्भवन्ति, तत्रैव, पृ.५०५, २/३/२८ पा.सूत्रे

[476] अयमर्थ; व्युत्पत्तिमात्रम्.......अश्वत्वमेवोच्यन्ते। तत्रैव, पृ.२४९

[477] शब्दस्य व्यञ्जका.....सन्ततान्युच्यन्ते। तत्रैव, पृ.२४९

[478] क्षणिकपक्षं द्रव्यान्तरारम्भापेक्षं वा परिणामापेक्षं वा आश्रित्यैतदुक्तम्..........कारकरूपोपगमात्। तत्रैव, पृ.२५५

[479] ततो अपाये यद् अनाविष्टं तद् अपाये ध्रुवमुच्यते, तत्रैव, पृ.२४०

भर्तृहरिणा वाक्यपदीये प्रतिपादितान् एव कैय्यटोऽपि स्वीकरोति।[480] 'वारणार्थानामीप्सित' इत्यत्र असौ ईप्सितशब्दस्य व्युत्पत्तिभिन्नमर्थं स्वीकरोति पतञ्जले: सन्दर्भेण।[481] भर्तृहरि: 'ध्रुवमपायेऽपादानमि'त्यत्र पतञ्जलिना स्वीकृतमिव स्थिरे चले च उभयत्र ध्रौव्यं स्वीकरोति। ध्रुवञ्च अपाये वियोगजनकव्यापारस्याश्रय: भवति।[482] असौ च ध्रुवस्य अर्थे अवधिसंज्ञामपि पृथक् प्रतिपादयति। ध्रुवं भूयोऽपि स्पष्टीकुर्वन् भर्तृहरि: धावन्तं तिष्ठन्तञ्च अश्वमवधित्वेन निरूपयति। यदा आरोही अश्वात् पतति चेत् अश्व: धावन् तिष्ठन् वाऽपि सन् ध्रुव: भवति किन्तु अश्वारोहिणौ अभावपि यदा कुड्या: पतत: चेत्तु कुडी ध्रुवा। द्वयो: वस्तुनो: मिथ: सापेक्ष्यं ध्रौव्यं भवति।[483] तत्र प्रसङ्गे वक्तुर्विवक्षैव ध्रौवस्य निर्धारकतत्वं भवति।[484] भर्तृहरि: अपायेऽपि द्वैविध्यं पतञ्जलिसम्मतं स्वीकरोति। तद्धि वास्तविकं मानसञ्च। अनेनासौ मानसापायसम्बन्धीनि 'भीत्रार्थानां भयहेतु:', 'पराजेरसोढ:', 'पञ्चमी विभक्ते'रित्यादीनि सूत्राणि व्याचष्टे।[485]

पतञ्जलेरुदाहरणेषु 'बलाहको विद्योतते', 'बलाहके विद्योतते', 'बलाहकाद् विद्योतते' इत्यादिषु विभक्तीनामर्थभेदं स्पष्टतया विवृणोति भर्तृहरि:।[486] तथाहि 'साधकतमं करणमि'त्यत्र 'धनुषा विध्यति' 'धनुर्विध्यति' इति उदाहरणयो: धनुषि स्थितं शक्तिद्वयं क्रमश: उक्तं भवति। इति भर्तृहरे: स्थापना।[487] अपादानमसौ निर्दिष्टविषयम्', उपात्तविषयम्', अपेक्षितक्रियञ्चे'ति त्रिधा विभनक्ति।[488]

---

480 तत्रैव, पृ.२४८

481 ईप्सितशब्द: क्रियाशब्दमाश्रीयते न तु रूढिशब्द:, तत्रैव, पृ.२५१

482 अपाये यद् उदासीनं चलं वा यदि वा चलम्। एवातदावेशात् तदपादानमुच्यते॥ वाक्यपदीयम्, सा.१४०

483 पततो ध्रुव एवाश्वो........अवधित्वं पृथक् पृथक्, तत्रैव, सा. १४१

484 तत्रैव. सा. १३९

485 तत्रैव सा. १४७

486 तत्रैव सा. १४६

487 तत्रैव सा. १४५

488 तत्रैव सा.१३६

हेलाराज: ध्रुवमपायेऽपादानमित्यत्र ध्रौव्यमधिकृत्य भर्तृहरे: व्याख्यानं सोदाहरणं विशदयति।[489] अपादानभेदानपि स: उदाहरणै: स्पष्टीकरणं करोति। यथा- 'ग्रामाद् आगच्छति' इदं निर्दिष्टविषयमपादानम्। 'बलाहकात् विद्योतते' इदं च उपात्तविषयमपादानम्। 'मथुरा: पाटलिपुत्रकेभ्य आढ्यतरा:' अत्र अपायप्रतिपादिकाया: क्रियाया: अभावो लक्ष्यते अत: अपेक्षितक्रियमपादानमिदम्।[490] 'निर्धारणे विभक्ते: य:' इति कारिकाव्याख्याने हेलाराज: अपेक्षितक्रियमपादानं[491] मानसमपादानञ्च सयुक्तिकं स्पष्टयति।[492]

वृत्तिकार: अपादानकारकविवरणे भाष्यप्रत्याख्याने सर्वाणि अपि अपादाने पाणिनीयसूत्राणि आवश्यकानि स्वीकरोति उदाहरणै: स्पष्टयत्यपि।[493] 'जनिकर्तु: प्रकृति'रित्यत्र प्रकृतिं हेतुत्वेन निर्दिशत्यसौ।[494] पतञ्जलिस्तु प्रकृतिमुपादानकारणं प्रतिपादयति।[495]

जिनेन्द्रबुद्धि: अपादानकारके पतञ्जले: व्याख्यानं स्वीकरोति किन्तु तत्र पाणिने: सर्वाण्यपि सूत्राणि आवश्यकानि मनुते। तदनुसारम् आचार्य इमानि सूत्राणि उक्त्वा अपादानस्य सर्वसंभवां कल्पनां निरूपयतीति। 'अन्तर्धौ येनादर्शनमिच्छती'त्यत्र असौ सप्तम्या: अर्थं निमित्तं विवृणोति।[496] तथैव 'जनिकर्तु: प्रकृति'इत्यत्र प्रकृतिपदेन उपादाननिमित्तोभयकारणयो: ग्रहणं स्वीकरोति। यथा 'पुत्रात् प्रमोदो जायते' इत्यत्र पुत्र: निमित्तकारणमस्ति।[497]

---

489 तत्रैव, पृ.३४०-३४१

490 तत्रैव, पृ.३३६

491 तत्रैव, पृ.३४५

492 तत्रैव, पृ.३४५

493 काशिका, पृ.५३५-५४५

494 तत्रैव, वृ.५४४

495 तस्मात् पूर्वस्यायं प्रपञ्च: एवम् एवम् उत्तरेऽपि योग: पूर्वस्यैव वेदितव्य:। तत्रैव, १/४/२५ पा.सूत्रे, पृ.५३९

496 अन्तर्धाविति निमित्तसप्तम्या, तत्रैव, पृ.५४१

497 अथ प्रकृतिग्रहणं किमर्थम्............प्रकृतिग्रहणे तु सति सर्वस्यैव कारणमात्रस्य भवति, तत्रैव, पृ.५४४

हरदत्त: जिनेन्द्रबुद्धे: प्रतिपादनानि स्वीकुर्वाणोऽपि[498] 'अन्तर्धौ येनादर्शनमिच्छती'त्यत्र सप्तम्या: अर्थं निमित्तं न मनुते अपितु विषयसप्तमीं सति सप्तमीं वा स्वीकरोति।[499]

पुरुषोत्तम: अपादानकारके पाणिनीयलक्षणानि यथावत् स्वीकरोति।[500] भर्तृहरे: अनुकरणेन चास्य त्रैविध्यमपि विवृणोति-निर्दिष्टविषयम्, उपात्तविषयम्, अपेक्षितक्रियञ्च।[501] सृष्टिधराचार्या: अपादाने पाणिनीयसूत्राणि विस्तरेण विवृण्वन्ति।[502] किन्तु विवरणे तै: किञ्चिदपि मौलिकचिन्तनं नो प्रस्तूयते। रामचन्द्राचार्योऽपि अपादाने भाष्यकारमतमनादृत्य सूत्रकारवार्तिककारयो: सर्वाण्यपि लक्षणानि यथावत् स्वीकरोति।[503] उदाहरणैश्च स्पष्टयति। विट्ठलाचार्य: अपि पाणिनि-कात्यायनयो: मतमेव स्वीकृत्य तत्र विस्तृतं व्याख्यानं प्रस्तौति। जिनेन्द्रबुद्धे: भर्तृहरेश्च मतमपि स्वव्याख्याने स्पष्टीकरोती।[504]

भट्टोजिदीक्षित: अपादानकारकं विवृणोति 'ध्रुवमपायेऽपादानमि'ति सूत्रोल्लेखेन। तदनुसारं यदा धातुना वस्तुद्वये अपाय: उच्यते चेत् अपायस्याधार: अपादानं भवति किन्तु अपायविधायकव्यापारस्य आधार: अधिकरणं न भवति। यथा 'वृक्षात् पर्णं पतति। असौ अपाये ध्रुवस्यार्थे अवधिशब्दं स्वीकरोति।[505] 'अपाये यद् उदासीनं चलं वा यदि चलं वा

---

498 पूर्वस्यां प्रपञ्च:,,,,,,तत्रैव, १/४/२५ सूत्रे, पृ.५३८, अयमपि प्रपञ्चो….सिद्धम्, तत्रैव, १/४/२७ सूत्रे, पृ.५४०, अयमपि प्रपञ्च:, तत्रैव, १/४/२८ सूत्रे, पृ.५४२

499 नायं निमित्तात् कर्मयोगे इति सप्तमी…….विषयसप्तम्येषा, सति सप्तमी वा, तत्रैव, पृ.५४१

500 भाषावृत्ति, पृ.४२

501 तत्रैव, पृ.४२

502 भाषावृत्त्यर्थव्यावृत्ति:, पृ.८९-९४

503 प्रक्रियाकौमुदी, पृ.४२५-४२९

504 (१) आप्य इति। विशेषो विभाग:……..तस्मिन् साध्य इति विषयसप्तमी……..यद्यपि ध्रुवशब्दो लोके एकरूपताम् आचष्टे ध्रुवमस्य रूपमिति तथाप्यपायं गतिविशेषं प्रति या ध्रुवतोपयुज्यते सा इहेवोपपद्यते स च अवधिभावमेव, प्र.कौ., पृ.४२५, अपाय:, विश्लेष:, विभाग इत्यर्थ:……स चावधिभाव एव, जिनेन्द्रबुद्धि:, काशिका, पृ.५३५. (२) यद्ध्रुवम् अवधिभूतम् इति…………तथा चोक्तम्; अपाये यद् उदासीनं……..अपादानमुच्यते इति। पततो ध्रुव एवाश्वो……….कर्तृत्वञ्च पृथक् पृथक् प्रक्रियाकौमुदी, पृ.४२५., (३) पूर्वस्यायं प्रपञ्च: उत्तरेपि यो पूर्वस्यैव एवं तर्हि पूर्वस्यायं प्रपञ्च: ……एवम् उत्तरेऽपि योग: पूर्वस्यैव प्रपञ्च: वेदितव्य:, जिनेन्द्रबुद्धि:, काशिका, पृ.५३९

505 ध्रुवं स्थिरम् प्रकृतधातूपात्तगत्यनाविष्टत्वे सति तज्जन्यविभागाश्रय:, प्रौढमनो. पृ.५२६

यदि वाऽचलम्’ इति कारिकाया: उद्धरणसहितम् असौ अपादानस्य स्थिरत्वं चलत्वं वा सम्भवति इति प्रतिपादयति। यथा- ‘धावतोऽश्वात् पतति।’[506] पृथग्भूयमानस्य वस्तुद्वयस्य मिथ: सापेक्षमपादानत्वं विवक्षया तस्य निर्धारणमपि भट्टोजिदीक्षित: भर्तृहरे: सन्दर्भेण विवृणोति।[507] असौ भाष्यकारदिशा अपादानकारके केषाञ्चन पाणिनीयसूत्राणाम् अनावश्यकत्वमपि विवृणोति किन्तु तन्न समर्थयति।[508]

कौण्डभट्ट: ध्रुवमपायेऽपादानमिति सूत्रव्याख्याने अपाये ध्रुवपदार्थम् अवधिं वदति। तदनुसारञ्च पञ्चमीविभक्ते: अर्थ: अवधिरेव भवति। असौ अपादाने भर्तृहरिणा ‘अपाये यद् उदासीनं ध्रुवं वा यदि वा चलम्’ इत्यादिकारिकोक्तं मतं यथावत् स्वीकरोति।[509] भर्तृहरि: क्रियया उत्पद्यमानस्य अपायस्य अधिकरणं ध्रुवमपादानं वा भवति। तथैव हि क्रियाया: अधिकरणमपादानं न इति।[510] अत्र क्रियाशब्देन व्यापारस्य ग्रहणं न सत् धात्वर्थस्य ग्रहणं क्रियेत इति कौण्डभट्टस्य अभिप्राय:। अनेन च ‘वृक्षात् वस्त्रं पतति’ इत्यत्र निष्क्रियेऽपि वस्त्रे वृक्षगतक्रियया पतिते वृक्षोऽपादानं भवति।[511]

वाक्यपदीयस्य अनुकरणेन कौण्डभट्ट: अपादानं त्रिधा विभनक्ति। तत्र युक्तानि उदाहरणानि अपि प्रस्तौति।[512] मानसापायमप्यसौ उदाहरणै: स्पष्टयति।[513] कौण्डभट्टस्य अपादानसम्बन्धीनि मतानि हरिवल्लभ: सुष्ठुतया विवृणोति।[514]

नागेशानुसारम् अपादानमपादानशक्तिमत् भवति। तदनुसारं पञ्चमीविभक्ते: बोध्यं अपादानत्वशक्तिरेव। ‘अपादाने पञ्चमी’ सूत्रस्य अयमेव अभिप्राय:। नागेश: शक्तिं

---

[506] सिद्धान्तकौमुदी १/४/२४ वा. सूत्रे

[507] प्रौढमनो. पृ.५२७

[508] भाष्यकारस्तु जुगुप्सादीनां...........एवम् उत्तरसूत्राण्यपि, तत्रैव, पृ.५२८

[509] अवधि: पञ्चम्यर्थ:, अपादाने पञ्चमी, तच्च अवधिभूतम् इति भाव:। उक्तञ्च वाक्यपदीये अपाये यदुदासीनं........पृथक् पृथक् इति, वै.भू.सा. पृ.१७८-१७९

[510] एवञ्च विश्लेषहेतुक्रियानाश्रये सति विश्लेषाश्रयत्वं फलितम्, तत्रैव, पृ.१७९

[511] क्रिया च धात्वर्थो............वृक्षाद् वस्त्रं पततीति संगच्छते, तत्रैव, पृ.१८०

[512] तत्रैव, पृ.१८४

[513] तत्रैव, पृ.१८३-१८४

[514] तत्रैव, पृ.१७८-१८४

शक्तेराश्रयश्च समानमेव स्वीकरोति। अत: अपादानम् अपाशक्तिमान् च अभिन्नौ भवत:। पाणिनीये अपादानलक्षणे 'ध्रुवमपायेऽपादानम्' इत्यत्र नागेशस्य स्वीकृति: अस्ति अथ च भट्टोजिदीक्षितकौण्डभट्टाभ्यां तत्र ध्रौव्ये प्रस्तुतानि विवरणानि अपि नागेशस्य सम्मतानि।[515] भाष्यकारदिशा च मानसापाय: वास्तविक: अपायश्च द्वावपि अपादानेऽस्य स्वीकृतौ।[516]

अपादाने ध्रौव्यमधिकृत्य भर्तृहरे: चर्चामपि नागेश: विवृणोति।[517] सिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन उदाहृतानां प्रयोगाणां समीक्षणेन नागेश: अपादानकारकं स्पष्टयति।[518]

## पाणिनीयेतरव्याकरणेषु अपादानकारकव्याख्यानम्

शर्ववर्मा कालापव्याकरणे सूत्रद्वयेन अपादानकारकं सूत्रयति- 'यतोऽपैति भयमादत्ते वा तदपादानम्', 'ईप्सितञ्च रक्षार्थानाम्' इतिवत्।[519] तत्र च प्रथमेन असौ पाणिने: सूत्रत्रयस्य कार्यं साधयति। 'ध्रुवमपायेऽपादानम्', 'भीत्रार्थानां भयहेतु:', 'आख्यातोपयोगे' च एतानि। द्वितीयेन 'वारणार्थानामीप्सित:' अस्य कार्यं साध्यते। किन्तु पाणिने: अन्यानि अपादानलक्षणानि प्रत्यसौ मौनमाश्रयति।

शर्वस्य प्रथमे अपादानसूत्रे व्याख्यां प्रस्तुवन् दुर्गसिंह: सूत्रोक्तं यत: इति पदम् अवधिवाचकं स्वीकरोति। भाष्यकारप्रतिपादितम् मानसमपायम् अपि स्वीकरोति। तत्रासौ 'अधर्माज्जुगुप्सते', 'अधर्माद् विरमति' इत्याद्युदाहरणै: मानसमपायं दर्शयति।[520]

निमित्तोपादानकारणाभ्यां पृथग्भूय कर्मण: उत्पत्तौ अपायात् अपादानं प्रदर्शयत्यसौ उदाहरणै: यथा- 'बीजाद् अंकुरो जायते', 'पुत्रात् प्रमोदो जायते।'[521]

---

[515] पञ्चम्या अपादानत्वम् अर्थ:................ध्रुवमपायेऽपादानमिति सूत्रात्।, लघुमञ्जुषा, पृ.१२८४-१२८५

[516] तत्रैव, पृ.१२८५

[517] तत्रैव, पृ.१२८७

[518] तत्रैव, पृ.१२८९-१२९८

[519] कालापम्, कारक.सू.२१४-२१५

[520] तत्रैव पृ.१९०

[521] जनिकर्तु: कारणम् अपायावधिरेव.........तथा भूकर्तु: प्रभवोऽर्थोप्यवधिरेव, तत्रैव, पृ.१९०

‘आसनात् प्रेक्षते’ अत्रापि अपायो मन्यतेऽनेन विदुषा। भाष्यकार इव असौ चक्षुरिन्द्रियासनयो: अपायं स्वीकरोति।[522] त्रिलोचनोऽपि टीकायां दुर्गसिंहस्य मतानि स्पष्टीकरोति पोषयति च।[523] सुषेणाचार्य: दुर्गसिंहं समर्थयन् कलापस्य ‘यतोऽपैति’ इति सूत्रेण अवधिं प्रतिपादयति। पूर्वाचार्याणां विशेषत: भर्तृहरे: मतमनुसरन् असौ अवधे: स्थिरत्वं चलत्वं वाऽपि स्वीकरोति। यद्यपि अयम् आचार्य: ‘व्याघ्राद् भयमि’त्यादौ मानसापायेन अपादानं विवृणोति किन्तु कलापसूत्रकृता अपादानसूत्रेऽपि ‘भयमादत्ते’ इति स्वतन्त्र: पाठ: कृत: अस्ति।[524]

चन्द्रगोमी अपादानेऽर्थे अवधिसंज्ञां स्वीकरोति। अवधेश्च अपाये भूमिकां स्पष्टयति। तस्य उदाहरणै: इदमपि ज्ञायते यत् अपादानस्य सर्वेऽपि प्रयोगा: अस्य लक्षणेन सिध्यन्ते इति।[525]

संक्षिप्तसारकार: क्रमदीश्वर: पाणिने: अपादानलक्षणम् एव किञ्चित् संशोध्य स्वीकरोति।[526] जुमरनन्दी क्रमदीश्वरस्य पाणिनीयलक्षणे कृतं संशोधनं स्पष्टयति समर्थयति च। क्रमदीश्वर: पाणिने: ‘वारणार्थानामीप्सित:’ इति सूत्रं परिवर्त्य ‘वारणादेर्यन्निमित्तम्’ इति रूपेण प्रस्तौति। जुमरनन्दी स्पष्टयति यत् ‘पापाद् विरमति’ ‘धर्माद् प्रमाद्यति’ इत्यादीनि उदाहरणानि अपि उक्तलक्षणेन साधयति।[527]

---

522 यत्र तु.....एवम् अधिकरणस्यापीति, तत्रैव, पृ.१९०

523 तत्रैव, पृ.१९१

524 यत्र इत्यवधौ पञ्चमी...........प्रपञ्चार्थम् इदमुच्यते, तत्रैव, पृ.१९३

525 अवधौ पञ्चमी.......प्रपञ्चार्थम् इदमुच्यते, तत्रैव, पृ.१९३

526 (१) चलत् प्राग्घुरूपादानम्। संक्षिप्तसार:, कारक.सू.२६, ध्रुवमपायेऽपादानम् पा.सू.१/४/२१, (२) गुर्वादिङ्गर्थादे:, संसा.,कारक, सू.२८, आख्यातोपयोगे, पा.सू.१/४/२९, (३) पराजे: सोढुमशक्यम्, सं.सा., कारक., सू.३०, पराजेरसोढ:, पा.सू. १/४/२५, (४) भीत्रार्थयोर्भीहेतु:, सं.सा.,कारक., सू.३१, भीत्रार्थानां भयहेतु:, पा.सू. १/४/२६, (५) अन्तर्ध्यर्थे यदीयादर्शनमिच्छति, सं.सा., कारक,३२, अन्तर्धौ येनादर्शनमिच्छति पा.सू. १/४/२८, (६) वारणादेर्यन्निमित्तम् सं.सा.,कारक.,सू.३४, जनिकर्तु: प्रकृति:, पा.सू. १/४/३०, (७) भुव आद्योपालम्भस्थानम्, सं.सा., कारक., सू.३५., भुव: प्रभव:, पा.सू.१/४/३१

527 सं.सा. पृ.१०१४

गोपीचन्द्र: अपादानकारकं प्रधानं गौणञ्चेति द्विधा विभनक्ति। गौणापादाने उदाहरणानि प्रस्तूय तत्स्पष्टयति।[528] टीकाकार: 'जन्यर्थकर्तु: प्रकृति:' इति सूत्रे प्रकृतिशब्देन समवाय्यसमवाय्यिनिमित्तकारणानां ग्रहणं भवति। अनेन च नैय्यायिकसम्मतं कारणत्रितयम् अपि स्वीकरोति। अथापि सर्वविधकार्यकारणसम्बन्धेषु अस्य लक्षणं प्रवर्तते।[529] अनेन सहैव टीकाकार: जीवानो चतुर्धा विभाजनं प्रतिपादयति।[530]

जैनेन्द्र: 'अपाये ध्रुवमपादानम्'[531] इति अपादानं लक्षयति। अभयनन्दी 'ध्यपायं' 'ध्रुवञ्च' व्याख्याने विवृणोति। 'धि'शब्देन मानसापायस्यापि ग्रहणमसौ प्रतिपादयति। यथा 'व्याघ्राद् बिभेती'त्यादौ। ध्रुवञ्चासौ अवधे: ग्रहणं निर्दिशति। स च अवधि: चल: स्थिर: वा भवितुमर्हति।[532] अनेन च ज्ञातं भवति यत् टीकाकार: पतञ्जले: भर्तृहरेश्च मतम् आदरेण स्वीकरोति इति। व्याख्यानप्रसङ्गेऽसौ उदाहरणै: स्वपक्षं समर्धयति।[533]

शब्दानुशासनकार: 'अपायेऽवधिरपादानम्' इति अपादानलक्षणं प्रस्तौति।[534] अपायेन चासौ मानसं वास्तविकञ्चोभयविधमपायम् अभिप्रैति।[535] अवधे: चलत्वं स्थिरत्वमप्यसौ स्वीकरोति।[536] इमानि हि सर्वाणि मतानि पूर्वाचार्यैरपि सिद्धान्तानि तानि सन्ति अपादानकारकविवरणे। तथैव परम्परानुगुणं त्रिधाऽपादानं विभनक्त्यसौ।[537] भिन्नप्रकारकान् अपादानोदाहरणान् प्रस्तूय स्पष्टीकरणमपि करोति।[538]

---

528 यतश्चलत्वम् इह मुख्यं गौणश्च गृह्यते..........भवति, तत्रैव, पृ.१०१५

529 करणं त्रिविध.............निमित्तं करणम्, तत्रैव, पृ.१०१८

530 ननु चतुर्विध:.........प्राणिनो जायमाना भवति-जरायुजाण्डजोद्भिजोष्मजाश्च, तत्रैव, पृ.१०१५

531 जैनेन्द्र:. सू.१/२/१०९

532 धीर्बुद्धि:..........ध्रुवमविचलमवधिभूतं वा। तत्रैव., पृ.९१. ध्यपायस्य विशेषणं किम्, अधर्माज्जुगुप्सते इत्यादि, तत्रैव, पृ.९२.

533 तत्रैव, पृ.९१-९२.

534 शब्दानुशासनम्, सू.२/२/२९

535 अपायश्च कायसंसर्गपूर्वको बुद्धिसंसर्गपूर्वको वा विभाग उच्यते, तत्रैव, पृ.७५

536 तत्रैव, पृ.७५

537 तदेतत् त्रिविधम्..........अपेक्षितक्रियञ्च। तत्रैव, पृ.७५.

538 तत्रैव, पृ.७५

बोपदेव: मुग्धबोधे अपादानेऽर्थे 'जा' संज्ञां करोति। तत्र विवरणे पाणिनिना नियमितानि अपादानस्य विवरणानि सर्वाण्यपि समाविशति।[539] दुर्गादासविद्यासागर: अपादानस्यार्थं प्रतिपादयति। अपायव्याख्याने 'जा'संज्ञां गत्यर्थकां स्वीकरोति। पूर्वै: अपायशब्देन गृहीतं वियोगरूपमर्थमपि निराकरोति असौ। तदनुसारम् एवं स्वीकृते तु 'पत्राद् वृक्षस्तिष्ठति' इति प्रयोग: अपि साधु: भवेत्।[540] रामतर्कवागीश: बोपदेवस्य अपादानलक्षणे दुर्गादासमिव उदाहरणानि प्रस्तौति। परम्परया स्वीकृतं भेदत्रयमपि तत्र विवृणोति।[541]

सारस्वतवैय्याकरण: अपादानकारके भर्तृहरे: विवरणानि समर्थयति यत् चलं स्थिरञ्चोभयथापि अपादानं सम्भवतीति। अथ च मानसमपायमधिकृत्य भाष्यकारमतं न समर्थयति।[542] यत: पाणिनि: स्वयं भयस्य हेतौ 'भीत्रार्थानां भयहेतु:' इति स्वतन्त्रलक्षणं प्रतिपादयति तथैव 'आख्यातोपयोगे' इत्येतल्लक्षणमुच्यते। अनुभूतिस्वरूपाचार्य: एतयो: सूत्रयो: सन्दर्भे पतञ्जलिं विरूध्य पाणिने: मतं पोषयति।[543] 'जनिकर्तु: प्रकृति'रिति पाणिनीयलक्षणं समर्थयति अयं वैय्याकरण:। तत्र च प्रकृतिम् उपादानकारणत्वेन परिभाषयति प्रकृतिम्।[544] सारस्वतवैय्याकरण: अपादाने केषाञ्चन पाणिनीयलक्षणानां समर्थनं करोति नान्येषाम्। व्याख्याकार: चन्द्रकीर्ति: अपादानस्य व्युत्पत्तिलभ्यमर्थं स्वीकरोति।[545] तत्रासौ पतञ्जलिसम्मतं मानसं वास्तविकञ्चेत्युभयथा अपादानं प्रतिपादयति।[546] रामाश्रम: न तत्र व्याख्याख्यां प्रकाशविशेषं चिक्षेप।

---

[539] यतोऽपायाभिजुगुप्सा..........वारणम्, मुग्धबोध:, कारक:, सू.२०.

[540] मुग्धबोध:, पृ.७३.

[541] अपायो विश्लेष:..........त्रिधापादानमुच्यते, तत्रैव, पृ.७४

[542] विश्लेषावधौ पञ्चमी। विश्लेष: विभागस्तत्र यो अवधि: स चलतया अचलतया वा विवक्षितस्तत्रापादाने पञ्चमी, सारस्वतम्, पृ.८५.

[543] भयहेतौ पञ्चमी च वक्तव्या, सारस्वत; सू.४४६., जनिकर्तु: प्रकृति:, तत्रैव, सू.४८०, विद्यास्वीकारे. तत्रैव, सू.४८९.

[544] जायमानस्य कार्यस्योपादनम् अपादानसंज्ञं भवति, तत्रैव, पृ.८९

[545] अपादीयते पृथक् क्रियते यस्मात् तदपादानम्, सारस्वते चन्द्रकीर्तिटीका, पृ.११५

[546] बुद्ध्या स्वरूपेण वा एकाश्रयात् पृथग्भवनमित्यर्थ:, तत्रैव, पृ.१५५.

सुपद्मव्याकरणे पद्मनाभ: 'अवधिरपायादिष्वपादानम्' इति अपादानलक्षणं सूत्रयति। मुख्यतया अस्मिन् पाणिनेरेव प्रभावो लक्ष्यते।[547] किन्तु अस्य व्याख्याकार: विष्णुमित्र: मानसं वास्तवं वा एकदैव अपादानं स्वीकरोति।[548] अवधिशब्दमसौ भर्तृहरेरिव एव स्पष्टयति।[549]

हरिनामामृतकार: पाणिनिं कात्यायनं च समर्थयति अपादानविवरणे।[550] तत्रासौ स्वीया: द्वादश अपादानपरिभाषा: प्रतिपेदे। 'जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्' इति कात्यायनलक्षणमसौ सूत्रद्वयेन समाविशति स्वशास्त्रे 'प्रमादजुगुप्सायाश्च तद्विषय:', 'अथ विरामे त्यज्य:' इतिवत्। 'प्रतिग्रहे दाता' इति नूतनमप्येकं लक्षणं जगाद असौ।[551] पतञ्जलेर्मानसोऽपाय: अस्य लक्षणेनोपलभ्यते।

पुरूषोत्तमविद्यासागर: प्रयोगरत्नमालायाम् अपादानस्य विस्तृतं लक्षणं करोति। तत्र 'भुव: प्रभव:' इति सूत्रं विहाय अन्यलक्षणान्यन्तर्भवन्ति।[552] 'भुव: प्रभव:' इत्यस्य स्थानेऽसौ 'प्रभव:' इतिवत् सूत्रयति। कात्यायनस्य 'जुगुप्साविराम: इत्यर्थेऽपि पृथक् सूत्रेण सह अपादाने त्रीणि सूत्राण्यनेन कृतानि।[553] सर्वत्रापि उदाहरणै: स्पष्टीकरणमपि विहितम्।[554]

## पाणिनीयव्याकरणे अधिकरणकारकव्याख्यानम्

पाणिनि: आधारोऽधिकरणमिति अधिकरणकारकस्य लक्षणं करोति।[555] अत्र आधारं निरूपयन् भर्तृहरि साक्षात् आधारं न स्वीकरोति अपितु परोक्षमाधारं निरूपयति।

---

547 सुपद्म. पृ.७८

548 तत्रैव, पृ.७८-८०

549 तत्रैव, पृ.७८

550 हरिनामामृतम्, सूत्राणि-१०२६,१०२८, १०२९, १०३०-१०३८.

551 तत्रैव, सू.१०३६

552 यतोऽपायादानरक्षा.........अपादानकारकम्, तत्रैव, पृ.३५७.

553 तत्रैव, पृ.३६७.

554 यतो अवधिभूताद् अपायो विभागस्तद् अपादानम्............धर्मात् प्रमाद्यति धर्मं नानुतिष्ठति। तत्रैव, पृ.३५७-३६९.

555 पा.सू. १/४/४४

यत: क्रियाया: साक्षात् आधार: कर्ता भवति। यथा- 'देवदत्त: स्थाल्याम् ओदनं पचति' इत्यत्र पाकाय आवश्यक: आन्तरिकव्यापार: देवदत्ते आश्रित: भवति, स व्यापार: बहि: क्रियारूपेणाभिव्यज्यते। पाकस्य फलञ्च ओदने आश्रितं भवति। देवदत्तेन क्रियमाणा पाकक्रिया परम्परया स्थाल्याश्रिता भवति। 'राम: कटे आस्ते' अत्र च रामस्य स्थानक्रिया परम्परया कटे आश्रिता भवति।

पतञ्जलि: अधिकरणसूत्रं व्याचक्षाण: सूत्रे तमप्प्रत्ययस्य अग्रहणेन सूत्रार्थं निर्धारयति। यत: सूत्रकृता कर्मलक्षणे च ग्रहणकृतमस्ति। तदभावेन अत्र ज्ञायते यत् अधिकरणकारकं गौणे प्रधाने च उभयोरप्यर्थयो: प्रवर्तते इति। यथा 'तिलेषु तैलम्' इत्यत्र तैलस्य तिलेषु वर्तमानत्वात् तिला: प्रधानमधिकरणं भवन्ति। 'गंगायां घोष:' अत्र तु घोषस्य गंगाया: समीपे वर्तमानत्वात् गङ्गा गौणतया अधिकरणं भवति। एवमुभयथा पाणिनेर्लक्षणं प्रवर्तते।[556]

अधिकरणं त्रिप्रकारकं निर्दिशति भाष्यकार:-'औपश्लेषिकम्', 'वैषयिकम्', 'अभिव्यापकञ्चेति'।[557] तत्र 'मासे दीयते' 'इको यणचि' इत्युदाहरणयो: उपश्लेषिकमधिकरणम्। 'मासे दीयते' अत्र 'मासे' पदेन गतमासस्य आगामिमासस्य च प्रथमदिने संयोग: बोध्यते।[558] 'इको यणचि' अत्रापि इक: अचश्च संयोग: उक्त: भवति।[559] तथैव 'तिलेषु तैलम्' 'दध्नि सर्पि:' अनयो: वैषयिकम् अधिकरणम् उदाह्रियते। अभिव्यापकाधिकरणे किञ्चिद्विशेषविवरणं नोपलभ्यते भाष्ये।[560]

कैय्यट अधिकरणव्याख्यानप्रसङ्गे 'यत्र कृष्ण: आहारात्मा' इत्यादिना भाष्यकृता प्रतिपादितम् उभयविधमधिकरणं स्फुटं विवृणोति।[561]

---

556 तथाधारमाचार्य: किं न्याय्यं मन्यते, यत्र कृत्स्न: आधारात्मा व्याप्तो भवति.......तेनैवेह स्यात्....तिलेषु तैलम्, दध्नि सर्पिरिति। गंगायां घोष:, कूपे गर्गकुलमित्यत्र न स्यात्........इत्यत्रापि सिद्धं भवति। महाभाष्यम्, पृ.२५१.

557 अधिकरणं नाम त्रिप्रकारकम्.........वैषयिकम् इति, महाभाष्ये, ६/१/७२

558 न तन्मासे दीयते, किं तर्हि मासे गते। एवं तर्हि औपश्लेषिकम् अधिकरणं विज्ञास्यते। तत्रैव, पा.सू. ५/१/९६

559 तत्रैव, पा.सू. ६/१/७२

560 तत्रैव, पृ.२५१

561 यत्र कृत्स्न इति। सर्वैरवयवै: सह........स भवति। तत्रैव, पृ. २५१.

भर्तृहरिश्च क्रियया परम्परितमाधारम् अधिकरणं प्रतिपादयति।[562] क्रिया कर्तरि आश्रिता भवति कर्ता च आधारे। अत: क्रियाकर्तृमाध्यमेन अधिकरणेन सह सम्बध्यते। भाष्यकारोक्तत्रिविधेऽप्यधिकरणे औपश्लेषिकत्वं[563] सामान्यमिति हरे:[564] मति:। आधाराधेययो: तु संयोग: अनिवार्य: भवति। यथा 'तिलेषु तैलम्' इत्यत्र तैलं तिले सर्वेषु अवयवेषु समवायसम्बन्धेन उपस्थितं भवति। 'कटे आस्ते देवदत्त:' इत्यत्र च देवदत्तस्य एकदेश: कटस्य एकदेशेन संयुज्यते। तथैव 'आकाशे शकुनय: सन्ति' अत्र आकाशस्यैकदेशेन शकुने: सर्वे अवयवा: संयुज्यन्ते। अयञ्च शकुने: आकाशेन सह संयोग: पक्षिणं पतनाद्रक्षति। अत्र च वैषयिकाधिकरणे कथम् औपश्लेषिकमिति चेत् कस्यापि प्राणिनोऽप्राणिनो वा स्थानदेश: परिस्थिति: वा वैषयिकाधिकरणं भवति इति प्राचीनानां स्वीकृति:। अन्यत्र अपि केषाञ्चन प्रयोगाणामालोके इदं साधयितुं शक्यते। 'गुरौ वसति' इत्यत्र शिष्यस्य गुरुसन्निधौ वास: अध्ययनहेतुक:। शिष्यस्य अध्ययने वासे च गुरौ आश्रितत्वात्तयो: आधाराधेयसम्बन्ध: भवति। 'जले मत्स्या: विन्दन्ते' अत्र जलस्य मत्स्यानामाधारभूतत्वात् वैषयिकत्वं सिद्ध्यति।

भर्तृहरे: इदं विवरणं स्वलक्षणे स्पष्टयति-'कर्तृकर्मधारणात् तत्समवेतायां क्रियायाम् उपकारकम् अधिकरणं पारम्पर्येणे'ति।[565] हेलाराज: कैश्चिदुदाहरणै: अधिकरणभेदेषु औपश्लेषिकस्यान्तर्भावं साधयति। जिनेन्द्रबुद्धिरपि अस्मिन् भाष्यात् उदाहरणद्वयमुपस्थापयति- 'गुरौ वसति', 'गंगायां घोष:' इतिवत्।[566]

वृत्तिकार: क्रियाया: परम्परितो आधार: अधिकरणमिति भर्तृहरे: मतं विशदयति। तदनुसारं कर्तृकर्मणोरन्यतम: क्रियाया: आधार: भवति। तयोरन्यतमस्य आधारभूतं क्रियाया: परम्परितं कारकम् अधिकरणं भवति।[567] जिनेन्द्रबुद्धि: 'आधारोऽधिकरण' सूत्रे

---

[562] कर्तृकर्मव्यवहितम् असाक्षात् धारयति क्रियाम्। उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्। वाक्य, सा. १४८.

[563] उपश्लेषस्य चाभेदास्............संयोगसमवायिनाम्। तत्रैव, सा. ४९

[564] वाक्य, पृ.३४९

[565] कटे आस्ते..........व्यवधानेन कारकत्वमविरुद्धम्। तत्रैव, पृ.३४८

[566] उपश्लेष: आधारस्याधेयेन सम्बन्ध:। गुरौ वसतीति गुर्वाधीनायां वृत्तौ वैषयिकम् अधिकरणम्, गुरु:...........उपश्लेषोऽप्यत्र बुद्ध:...........गंगायां गाव इति गंगाशब्द: सामीप्यात्.........औपश्लेषिकमधिकरणम्। तत्रैव, पृ.३४९

[567] काशिका, पृ.५६१

आधारपदे तमप्प्रत्ययाभावे अधिकरणकारकस्य अन्यकारकापेक्षया गौणत्वं कर्तृकर्माधीनत्वं वा प्रतिपादयति।[568] अस्य च अन्यदपि प्रतिपादनं भवति यत् अधिकरणं कर्तृकर्मणो: स्थानं नाप्तुं शक्नोति इति।[569] अयं व्याख्याकार: त्रिविधमधिकरणं विवृणोति- औपश्लेषिकम्, वैषयिकम्, अभिव्यापकञ्चेति। इदं विभाजनं महाभाष्यस्य समर्थनं करोति किन्तु उपश्लेषस्य भर्तृहरिसम्मतं संयोगरूपमर्थं न समर्थयति। अत: 'कटे आस्ते' इत्यत्र औपश्लेषिकमधिकरणं वर्तते। वैषयिकाधिकरणं विवृण्वान: असौ 'गंगायां घोष:' इति वाक्येनोदाहरति। तथैव 'गुरौ वसति' इत्यपि एतदनुसारं वैषयिकमधिकरणमस्ति।[570] हरदत्त: पदमञ्जर्याम् अधिकरणविवरणे जिनेन्द्रबुद्धे: मतानि व्याचष्टे समर्थयति च।[571] पुरुषोत्तमोऽपि 'आधारोऽधिकरणमि'ति सूत्रव्याख्याने उदाहरणद्वयस्य विश्लेषणेन अधिकरणं स्पष्टयति।[572]

सृष्टिधरानुसारं कर्तु: कर्मण: आधार: तयोरनुष्ठीयमानक्रियायाश्च परम्परितो आधार: अधिकरणं भवतीति।[573] भाष्यकारप्रतिपादितस्य अधिकरणस्य भेदत्रयं प्रतिपादयति व्याचष्टे च।[574] गौणाधिकरणस्यापि चर्चाऽनेन व्यधायि।[575]

रामचन्द्राचार्य: परम्परासम्मतमेव व्याख्यानं प्रस्तौति 'आधारोऽधिकरणमि'ति सूत्रे।[576] असौ हि अधिकरणस्य चतुर: भेदान् स्वीकरोति- औपश्लेषिकम्, सामीपिकम्, विषयिकम्, व्याप्तं चेति। तत्र विषयमधिकरणं वैषयिकसम्बद्धव्याप्तञ्चाभिव्यापकसम्बद्धम्।[577] सामीपिकमधिकरणमस्य टीकायां

---

[568] तत्रैव, पृ.५६२

[569] मुख्यस्यापि कर्तु: कर्मणश्च.........अनवकाशत्वाच्च कर्तृकर्मसंज्ञाभ्यां बाध्यमानत्वात्। तत्रैव, ३६२

[570] तत्रैव, पृ.५६४

[571] तत्रैव, पृ.५६१

[572] आश्रयोऽधिकरणमुच्यते। गृहे तिष्ठति, स्थाल्यां पचति, भाषा. पृ.४५.

[573] भाषावृत्यर्थव्यावृति:, पृ.१०१

[574] तत्रैव, पृ.१०१

[575] अत एव गंगायां घोष:..............इति भवत्येव, तत्रैव, पृ.१०१

[576] क्रियाश्रयो कर्तृकर्मणोराधारो अधिकरणसंज्ञ: स्यात्, प्र. कौ. पृ.४५५

[577] तत्रैव, पृ.४५५

प्राथम्येन उक्तम्। तत्रासौ उदाहरति- 'नद्याम् आस्ते' इति।[578] अनेन 'नद्यां' पदस्य अर्थ: नदीतटे भवति। अयं प्रयोग: 'गंगायां घोष:' इत्यादिवत् गौणम् अधिकरणं लाक्षणिकार्थं वा बोधयति। रामचन्द्रानुसारम् ईदृशा: प्रयोगा: पूर्वोक्ते भेदत्रये न अन्तर्भवन्ति।[579] विट्ठलाचार्य: जिनेन्द्रबुद्धिरिव कस्यापि नियन्तु: नियन्त्रिते आधिकरण्यं स्वीकरोति।[580]

भट्टोजिदीक्षित: 'आधारोऽधिकरणम्' इति सूत्रमाध्यमेन अधिकरणकारकं व्याचष्टे। तदनुसारं कर्तु: कर्मणश्च साक्षादाधार:। अनयोश्च सामान्येन जायमानाया: क्रियायाश्च परम्परितं आधार: अधिकरणं भवति।[581] भट्टोजिदीक्षितस्य मतं रामचन्द्रस्य वृत्ते: समीपम् अस्ति। असौ च भाष्यकारस्यानुगमनेन औपश्लेषिकम्, अभिव्यापकम्, वैषयिकम् इतिरुपेण विभनक्ति।[582] कौण्डभट्ट: आश्रयं आधारं वा निर्दिशति अधिकरणं पाणिने: अधिकरणलक्षणस्य व्याख्याने। तदनुसारं सप्तम्या विभक्त्या आश्रयस्यैव प्रतिपत्तिर्भवति।[583] असौ च इदमपि स्पष्टयति यत् क्रिया कर्तृकर्मणो: आश्रिता भवति किन्तु तस्या: गौणतया आश्रय: अधिकरणं भवति। अर्थात् अधिकरणं कर्तृमाध्यमेन कर्ममाध्यमेन वा क्रियाया: आधार: भवति। तत्रासौ भर्तृहरे: 'कर्तृकर्माव्यवहितम्' इत्यादिकारिकां प्रस्तौति।[584] अधिकरणस्य त्रिधा विभाजनमपि असौ समर्थयति- औपश्लेषिकम्, वैषयिकम्, अभिव्यापकञ्चेति। इदं भाष्यकारस्य समर्थनम् एव। किन्तु रामचन्द्रस्य स्थापनां सामीपिकम् अधिकरणमसौ निरासयति। चतुर्भि: उदाहरणैश्च तत् समीक्षते।[585]

---

578 तत्रैव, पृ.४५६

579 क्रियाश्रययोरिति तथोक्तं भर्तृहरिणा कर्तृकर्मव्यवहितम्……………स्मृतम् इति। तत्रैव, पृ.४५५

580 (१) आधाराधेययोरन्यत्र सिद्धयो: प्रादेशिक: सम्बन्ध: उपश्लेष: तत्र भव: औपश्लेषिक:…..नद्या सह घोषस्य संयोगभवमौपश्लेषिकम्। नापि वैषयिको व्याप्तो वा विषयाद्यभावात्। अतोऽयम् पृथक्। तत्रैव. पृ.४५५-४५६., (२) यतो यदधीना यस्य स्थिति:……..तत्तस्याश्रयो भवति। तत्रैव, पृ.४५६.

581 क्रियाश्रयो: कर्तृकर्मणोर्धारणात्…..अधिकरणं स्यात्। सि.कौ.पृ.१२७

582 तत्रैव, पृ.१२७

583 सप्तम्या अप्याश्रयोऽर्थ:…..सूत्रात् आधार:। वै.भू.सा १७६

584 कारके इत्यधिक्रियते….शास्त्रेऽधिकरणं स्मृतमिति। तत्रैव पृ.१७६-१७७

585 एतच्च त्रिविधम् औपश्लेषिकम्, वैषयिकम्, अभिव्यापकश्च। कटे शेते, गुरौ वसति, मोक्षे इच्छति, तिलेषु तैलम्……….भाष्ये स्पष्टम्, तत्रैव, पृ.१७७

कौण्डभट्टस्य विधानानि अधिकृत्य हरिवल्लभ: न्यायशैल्याम् अधिकरणं व्याचष्टे।[586] नैय्यायिकानां तर्कैश्चासौ आधाराधेययो: सम्बन्धं विशदयति।[587]

नागेशानुसारम् अधिकरणकारकेण अधिकरणस्य अयमेव अर्थ:।[588] सप्तम्या प्रतिपादितस्य अधिकरणस्य अयमेव अर्थ:।[589] इदञ्च ज्ञातपूर्वमेव यन्नागेश: शक्तिं शक्त्याश्रयं समानं मनुते कारकप्रतिपादने। 'आधारोऽधिकरणमि'ति सूत्रव्याख्यायामसौ अधिकरणत्वशक्तिं सम्यक्तया प्रतिपेदे। अत्र विषये भर्तृहरे: स्थापनाञ्च समर्थयामास।[590] नागेशस्तर्कयति यत् काल: क्रियाया: साक्षात् आधार: भवति किन्तु पाणिने: लक्षणानुसारं क्रियाया: परम्परित: आधार: एव अधिकरणं भवति। काले च क्रियाश्रये स्वीकृते तत्र कर्तृत्वमप्यापद्येत।[591] असौ अधिकरणे पतञ्जले: विभाजनं समर्थयति तत्र भर्तृहरे: उपश्लेषसम्बन्धिनीं स्थापनामपि कृतवान् यत् अन्यभेदेष्वपि उपश्लेष: सामान्येन प्रवर्तते इति। 'कटे आस्ते', 'तिलेषु तैलम्', 'खे शकुनय:', गुरौ वसतीत्यादिषु उदाहरणेषु असौ भर्तृहरे: दृष्टिसम्मतं व्याख्यानं प्रस्तौति। तत्र च हेलाराजस्य अनुकरणं करोति तर्कदृष्ट्या।[592]

## पाणिनीयेतरव्याकरणेषु अधिकरणकारकविवेचनम्

शर्ववर्मा प्राय: पाणिनीयमेव लक्षणं कालापेऽपि सूत्रयति-'य आधारस्तदधिकरणम्' इति रूपेण।[593] तत्र दुर्गसिंह: कर्तृमाध्यमेन क्रियाया: परम्परितमाधारम् अधिकरणम् इति भर्तृहरिसमर्थितं मतं स्वटीकायां विवृणोति।[594] असौ च अधिकरणस्य चतुरो भेदान् स्वीकरोति-'औपश्लेषिकम्', 'वैषयिकम्', 'अभिव्यापकम्, 'सामीपिकम्' च। इदं विभाजनं

---

586 तत्रैव, पृ.१७६-१७८

587 नैय्यायिकास्तु.........भवतीत्याहु:। तत्रैव, पृ.१७८

588 लघुमञ्जूषा, पृ.१३२२

589 तत्रैव, पृ.१३२२

590 स च शक्ति: कर्तृकर्मद्वारा.......शास्त्रेऽधिकरणं स्मृतमिति, तत्रैव, पृ.१३२२-२३

591 यद्यपि काल: साक्षात् क्रियाधारस्तथापि............कर्तृत्ववत्त्वात्, तत्रैव, पृ.१३२३

592 अधिकरणं त्रिधा.............गंगाशब्द: सामीप्यात् देशवृत्तिरित्यौपश्लेषिकमेव तत्। तत्रैव, पृ.१३२५

593 कलाप, सू.२१७

594 तत्रैव, पृ.२०१

रामचन्द्रेणापि प्रक्रियाकौमुदीकृता[595] पूर्वेण कृतम्। 'आधाराधेयसम्बन्धविषयकं भर्तृहरे: तर्कं यत् अधिकरणस्य सर्वभेदोऽपि उपश्लेषेण व्याप्त: इति प्रस्तुवन् इदं विभाजनम् अवास्तविकं मनुतेऽसौ।[596] किन्तु तथा सत्यपि विभाजनस्य आवश्यकतां मनुते।[597] औपश्लेषिकपदं विवृण्वानेनानेन उदाहरणै: स्पष्टीकरणं विहितम्। तदनुसारं 'गंगायां घोष:' इति तु सामीपिकमधिकरणम्।[598] त्रिलोचनाचार्य: वैयाकरणानां परम्परामनुसरन् क्रियाया: परम्परितम् आधारम् अधिकरणं स्वीकरोति।[599] तत्र च तस्य भेदत्रयस्य कल्पनामप्यसौ समर्थयति।[600] सुषेणाचार्य: शर्ववर्मण: अधिकरणव्याख्याने किञ्चिन्नाविन्यमुपजनयितुं प्रयतते किन्तु न तद् सङ्गतं वैय्याकरणानाम्। तदनुसारं क्रियाया: साक्षादाधारोऽपि अधिकरणं भवेदिति।[601] यथा 'चैत्रे स्थिति:'। 'गले बद्ध्वा गौर्नीयते'। प्रथमोदाहरणविषये स्वयमेव असौ 'अस्ति' इत्यस्य ग्रहणं सूचयति।[602] पुनरीदृशप्रयोग: नगण्या संस्कृतभाषायाम्। द्वितीयोदाहरणे च न बन्धनक्रियाया: साक्षादाधार: गल: अपितु रज्जुमाध्यमेन बन्धनात् गल: परम्परित: आधार: भवेदिति। त्रिलोचनाचार्यसमर्थितं त्रिविधमधिकरणं समर्थयति सुषेण:। चतुर्थश्च सामीपिकं निराकरोति। यत: इदम् औपश्लेषिके अन्तर्भवति। अन्यस्य भेदत्रयस्य स्थितिमसौ युक्त्या विवेचयति।[603] अभावस्य अधिकरणेन सह सम्बन्धमपि सुषेण: चिन्तयति प्रथमतया।पूर्वे वैय्याकरणा: तु अभावस्य तदधिकरणेन सह स्वाम्यसम्बन्धं स्वीकुर्वते। भवानन्दादय: नैय्यायिका इदं स्वाम्यसम्बन्धं पूवमेव निराचक्रु:। 'भूतले घटाभाव: घट-घटाभावयो: संयोग: स्वाम्यसम्बन्ध: अशक्य:।[604] नैयायिका: एनं सम्बन्धम् आधाराधेयसम्बन्धं

---

[595] तत्रैव, पृ.२०१

[596] अन्यस्त्वाह उपश्लेषस्य भेदास्तिलाकाशकटादिषु........भेदहेतव इति, तत्रैव, पृ.२०१

[597] गंगादीनां सयोगसमवायलक्षणो न घोषादिरिति सामीपिको विद्यते, तत्रैव, पृ.२०१

[598] तत्रैव, पृ.२०१

[599] तत्रैव, पृ.२०१

[600]स चाधारस्त्रिविध:......वैषयिकश्चेति, तत्रैव, पृ.२०१

[601] तत्रैव, पृ.२०२

[602] चैत्रे स्थितिरित्यादौ तु अस्तक्रियाध्याहार: न दोष:, तत्रैव, पृ.२०१

[603] तथेति तन्मते-लक्षणा न क्रियत इति आधरस्त्रिविधो ज्ञेय: इति........तत्रैव, पृ.२०३

[604] अस्य मुख्योदाहरणं भूतले घटाभाव इति...........नापि समवाय:, तत्रैव पृ.२०३

स्वीचक्रु:। इममधिकरणं सुषेणाचार्य: वैषयिकाधिकरणं वदति। स जिनेन्द्रबुद्धे: सन्दर्भेण वैषयिकार्थं विवृणोति। जिनेन्द्रबुद्धि: वैषयिकं अन्वयाभावार्थकं प्रतिपादयति। सुषेणानुसारम् अन्यत्वाभाव: संयोगे-स्वाम्यसन्बन्धे वा न अन्तर्भवति इति।[605]

चन्द्रगोमी अधिकरणेऽर्थे आधारसंज्ञां करोति किन्तु न तत्र किञ्चिद्व्याख्यानविशेषं प्रस्तौति।[606] अयम् आधारं चतुर्भेदोपेतं प्रतिपादयति-औपश्लेषिकम्, वैषयिकम्, अभिव्यापकम्, सामीपिकञ्चेति। एतानि नामानि यद्यपि अनेन नोल्लिखितानि किन्तु तदुक्तैरुदाहरणै: इदं ज्ञातुं शक्यम्। 'अधीति व्याकरणे इदमपि अधिकरणमस्ति चन्द्रानुसारम्।[607]

संक्षिप्तसारे क्रमदीश्वर: 'वैषयिकाद्यधिकरणम्'[608] इति अधिकरणं लक्षयति। इदं च लक्षणं न व्याख्यानात्मकमपितु विवरणात्मकम् इति हि स्पष्टम्। तदापि अनेन लक्षणेन असौ अधिकरणस्य परम्परया उक्तान् त्रीन् भेदान् स्वीकरोति अथवा रामचन्द्र-दुर्गसिंहयोरिव चतुर: भेदान् इति तु अस्पष्टम्। टीकाकार: जुमरनन्दी क्रमदीश्वरस्य अधिकरणलक्षणेन त्रीन् अधिकरणभेदान् प्रतिपादयति-वैषयिकम्, औपश्लेषिकम्, अभिव्यापकं च। चतुर्थं सामीपिकम् असौ औपश्लेषिकान्तर्गतं मनुते।[609] गोयिचन्द्र: क्रियाया: परम्परितमाधारमधिकरणमिति स्वीकृतपूर्वं टीकते।[610] इदं मतं मुख्यतया हरिणा प्रतिपादितम् अस्ति। तन्मतेन 'गंगायां घोष:', 'अंगुल्यग्रे करिशतम् एतौ औपश्लेषिकाधिकरणप्रयोगौ इति। तत्र 'गंगयां घोष:' इति तु गौणतयाऽधिकरणं मनुतेऽसौ।[611]

---

605 अस्य मुख्योदाहरणं भूतले घटाभाव इति................नापि समवाय:, तत्रैव पृ.२०३

606 चान्द्र. सू. २१/१/८८

607 तत्रैव, पृ.१८१

608 संक्षिप्तसार:, कारक, सू.३६

609 तत्रैव, पृ.१०१६

610 तत्रैव, पृ.१०१६-१०१७

611 ननु कथं गंगायां घोष:-गंगाशब्द्र तीरं सामीप्यं लक्ष्यते एवम् अंगुल्यग्रे करिशतं वसतीत्यत्रापि अंगुल्यग्रनिर्दिष्टं देशं..........लक्षयति। तत्रैव, पृ.१०१७

देवनन्दी पाणिनीयमेव लक्षणं किञ्चित् परिवर्त्य 'आधारोऽधिकरण:' इति सूत्रयति अधिकरणकारके।[612] अभयनन्दी सूत्रव्याख्याने स्पष्टयति यत् क्रियाया: द्वितीय: गौण: आधार: अधिकरणम् इति। वृत्तिकारस्येव असौ अधिकरणं कर्तु: कर्मण: वा अन्यतरस्य आधारं स्वीकरोति। पाणिनिना स्वाधिकरणलक्षणे तमप्प्रत्यय: न पठित: अत:क्रियाया: असाक्षादाधार: अधिकरणं भवितुमर्हति इति तन्मतम्। अनेन च जिनेन्द्रबुद्धि-देवनन्दिनौ उभावपि क्वचित् क्रियाया: साक्षादाधारमपि अधिकरणं स्वीकुरुत:। अत्र विषये ताभ्यामुदाहरणद्वयं प्रस्तुतम्।[613] भाष्यकृता प्रतिपादितान् अधिकरणभेदान् असौ यथावत् स्वीकरोति। तन्मतेन च 'गंगायां घोष:' इतति वैषयिकाधिकरणमस्ति।[614]

हेमचन्द्र: शब्दानुशासने पाणिनीयमधिकरणलक्षणं यथावत् स्वीकरोति। तत्र आधारं व्याख्यानेन विवेचयति।[615] अधिकरणस्य षड्भेदानसौ निरूपयति वैषयिकम्, औपश्लेषिकम्, अभिव्यापकम्, सामिपिकम्, निमित्तकम्, औपचारिकम् इति अस्येव। तदनुसारम् 'युद्धे सन्नह्यते', 'शरदि पुष्पन्ति सप्तच्छद' इत्यादिप्रयोगा: नैमित्तिकाधिकरणस्योदाहरणानि सन्ति। अथ च 'अंगुल्यग्रे करिशतम्' 'स मे मुष्टिमध्ये तिष्ठति' इत्यादय: औपचारिकाधिकरणस्य।[616]

मुग्धबोधे बोपदेव: अधिकरणेऽर्थे 'दा' इति कृत्रिमां संज्ञां प्रयुनक्ति। ताञ्च व्याख्याति 'कालभावाधार:'[617] इति। अर्थात् कालस्य क्रियाश्च आधार: 'दा' संज्ञया ज्ञायते। असौ चतुर्धा स्वीकरोति इममाधारम् 'औपश्लेषिकम्' वैषयिकम्', 'अभिव्यापकम्', समीपिकम् इति।[618] टीकाकार: दुर्गादासविद्यासागर: आधारं व्युत्पादयति 'आध्रियते

---

612 जेनेन्द्र, सू.१/२/११५

613 एवन्तर्हि कर्तृकर्मणो:......अधिकरणत्वम्। तत्रैव, पृ.९५

614 आसनक्रिया देवदत्ते वर्तते, विक्लेदनं तण्डुलेषु, तत्रैव, पृ.९५

615 तत्रैव, पृ.९५-९६

616 क्रियाश्रयस्याधारो अधिकरणम्। शब्दानुशासनम्. सू.२/२/३०

617 मुग्धबोध:, कारक.सू.३०

618 तत्रैव, पृ.२३

पदार्थो यस्मिन्नि'ति।[619] तत्रासौ स्पष्टयति यत् आधार: परम्परित: स्वीकार्य: अधिकरणेऽर्थे। रामतर्कवागीशोऽपि भर्तृहरे: इदं प्रतिपादयति यत् क्रियाया: आधार: अर्थात् अधिकरणम् असाक्षाद् भवति। तत्र च कर्तृकर्मणोरन्यतम: माध्यम: भवति।[620] आधारभेदान् अधिकृत्य विस्तृतं व्याख्यानं प्रास्तौत् असौ।[621]

सारस्वतव्याकरणे 'आधारोऽधिकरणम्' इति पाणिनीयनियम: एव स्वीकृत: अस्ति। व्याख्याने असौ प्रतिपादयति यत् सप्तम्या: अधिकरणस्यैव बोध: भवति। पुनराधानं निरूपयन्नाह-'आधारो नाम अधिकरणम्' इति।[622] सारस्वते षड्विधं स्वीकृतमस्ति अधिकरणम्- औपश्लेषिकम्, सामीपिकम्, अभिव्यापकम्, वैषयिकम्, नैमित्तिकम्, औपचारिकं च। इदं विभाजनं हेमचन्द्रेणापि पूर्वम्प्रतिपादितम्। एषु सर्वेषु भेदेषु सारस्वतकार: उदाहरणानि प्रास्तौत्। सामीपिके नूतनमुदाहरणं तत्रोपलभ्यते-'वटे सुशेरते गाव:' इति।[623] औपश्लेषिके भूयोऽपि भेदत्रयं निरूपयति असौ- एकदेशवृत्ति:, अभिव्याप्यवृत्ति:, व्यङ्ग्यवृत्तिश्चेति।[624] व्याख्याकार: चन्द्रकीर्ति: क्रियाया: कर्तुराधारम् अधिकरणं वदति;[625] न च कर्मण:। यतो हि सारस्वतकृता कर्मण: आधारम् अधिकरणं मत्वा एकमपि उदाहरणं नैव प्रदत्तम्। असौ च औपश्लेषिकादि भेदानभिलक्ष्य सोदाहरणं विवेचनं चकार।[626] अन्य: टीकाकार: रामाश्रय: सारस्वतकृता निर्दिष्टं षड्विधम् अधिकरणं समर्थयति।[627] सुपद्मव्याकरणे पद्मनाभ: 'आधारोऽधिकरणम्' इति पाणिनीयलक्षणं स्वीकरोति।[628] व्याख्याकारश्च विष्णुमित्र: सूत्रव्याख्याने

---

619 तत्रैव, पृ.२३

620 आध्रियते परम्परया क्रिया यत्र स आधार:.......यदुक्तं कर्तृकर्मव्यवहितम्......स्मृतम् इति। तत्रैव, पृ.९४

621 तत्रैव, पृ.९४

622 सारस्वतम्, पृ.८६

623 तत्रैव, पृ.८६

624 औपश्लेषिकं त्रिविधम्......केषाञ्चिन्मतम्, तत्रैव, पृ.८६

625 सारस्वते चन्द्रकीर्तिटीका, पृ.१५६

626 तत्रैव, पृ.१५६

627 सारस्वते, रामाश्रमटीका, पृ.३१४

628 सुपद्म, पृ.८१

वैय्याकरणपरम्परोक्तसिद्धान्तान् समर्थयति।[629] अधिकरणस्य त्रीन् एव भेदान् असौ युक्तान् स्वीकरोति- औपश्लेषिकम्, वैषयिकम्, अभिव्यापकञ्च। तदनुसारम् 'अंगुल्यग्रे करिशतम्' इदम् औपश्लेषिकमधिकरणम्।[630]

हरिनामामृतकार: जीवगोस्वामी 'कर्तृकर्मणोराधारोऽधिकरणमि'ति लक्षयति अधिकरणकारकम्।[631] इदं लक्षणं प्राय: पाणिनीयलक्षणानुसारि एव किन्तु अधिकतरं सुबोधमस्ति। असौ च भेदत्रयं निर्दिशति अधिकरणस्य 'औपश्लेषिकम्', 'सामीपिकम्', 'व्याप्तञ्च'।[632] वैषयिकमिति अधिकरणभेदं स न स्व्यकरोत्।

पुरुषोत्तमविद्यासागर: प्रयोगरत्नमालायं पाणिनीयम् अधिकरणलक्षणं यथावत् स्वीकरोति।[633] तत्र चासौ चतुर्भेदान् विवृणोति- समवायी, संयोगी, विषयम्, औपचारिकञ्च।[634] तत्र आद्ययो: द्वयोरपि प्रत्येकं भेदद्वयं प्रतिपादयति-अभिव्याप्तम्, अनभिव्याप्तञ्च। तिलेषु तैलम्, दुग्धे घृतम् एतौ तदनुसारं संयोगिनोऽधिकरणस्य अभिव्याप्तसम्बद्धौ प्रयोगौ।[635] अनेन ज्ञायते यदसौ आधाराधेययो: सम्बन्धमधिकरणं मनुते इति।

---

[629] तत्रैव, पृ.८१

[630] तत्रैव, पृ.८१

[631] हरिनामामृतम्, सू.१०२०

[632] तत्रैव, पृ.४३८-४३९

[633] प्रयोगरत्नमाला, पृ.३८१

[634] तत्रैव, पृ.३८१

[635] तत्रैव, पृ.३८१

चतुर्थोऽध्यायः

# पालिव्याकरणे कारकाणां विभक्तीनां च विवेचनम्

- मोग्गल्लानव्याकरणे (इतरव्याकरणेषु च) कच्चायनसद्दनीत्यादिषु।
- बौद्धशास्त्रीयशाब्दबोधे कारकाणां विभक्तीनां च प्रवृत्तेः विवेचनम्।

कर्मकारकम् (कम्मकारकं)

क्रियाया: कर्त्रा सह सम्बन्धस्य स्थापकं कर्म वदति मोग्गलान: 'कम्मे दुतिया'[636] इति सूत्रव्याख्याने। तत्रैव द्वितीयाविभक्तिप्रतिपादने 'इच्छितेऽपि' अथ च 'एवमनिच्छिते' इति उल्लेखाभ्यां द्विकर्मकधातुयोगे कर्मकारकं द्वितीयाविभक्तिं च सहैव प्रतिपादयति।[637] विवक्षाधीनत्वं भाष्यकारवदेव प्रतिपादयति-'वत्तिच्छातो हि कारकानि होन्ति। तं यथा- बलाहका विज्जोतते, बलाहकस्स विज्जोतते, बलहको विज्जोतते, बलाहके विज्जोतते, बलाहकेन विज्जोतते।[638]

कच्चायन: कर्मकारकं परिभाषमाण: 'यं करोतिं तं कम्मं'[639] इति सूत्रानुसारं सूत्रयति तत्र वृत्तौ 'यं करोति यं वा पस्सति, यं वा सुणाति तं कारकं कम्म सञ्ञं होति'।[640] तत्र च उदाहरणानि प्रस्तौति- 'कटं करोति, छत्तं करोति, रथं करोति, धजं करोति, रूपं पस्सति, सद्दं सुणाति, कण्टकं मद्दति, विसं गिलत्ति'।[641] तेषु हि उदाहरणेषु अनीप्सितकर्मसम्बद्धानामपि समावेश: दृश्यते।

कच्चायनमतं स्पष्टीकुर्वन् बालावतारे धर्मकीर्ति: 'कत्ता यं इच्छितमनिच्छितमिच्छितानिच्छितं वा करोति, क्रियाय सम्बन्धयति तं च

---

636 कम्मे दुतिया..............अत्थेव गुणयुत्तस्य कम्मता। मो.सू.२/२, वृत्ति, पृ.४१

637 इच्छितेऽपि कम्मताव दुतीया सिद्धा।..............सिस्सं धम्ममनुसासति एवमच्छितेऽपि। अहिं लङ्घयति.........अधिसिठासानंपयोगेधिकरणे कम्मवचनिच्छा। मो.सू.२/२, वृत्ति पृ.४१.

638 मो.सू.२/२, वृत्ति. पृ.४२

639 कच्चा. सू. २/६/१०

640 तत्रैव, वृत्ति:, पृ.१३६

641 तत्रैव, वृत्ति:, पृ.१३६

वाकारेणाकथितं च कम्मं नाम होति'।[642] तत्रासौ 'कम्मत्थे दुतीया' इति सूत्रस्य व्याख्याने चतुर्विधं कर्मकारकं सोदाहरणं विवृणोति- इच्छितम्, अनिच्छितम्, इच्छितानिच्छितम्, अकथितं च-

इच्छितम्- बुद्धं वन्दे। उनपत्तं भुञ्जति।

अनिच्छितम्- कण्टकं मद्दति। विसं गिलति।

इच्छितानिच्छितम्- गामं गच्छं रूक्खमूलमुपसप्पति।

अकथितम्- भगवा भिक्खू एतदोवाच।[643]

पुनरसौ स्पष्टयति यत् अकथितं कर्मकारकं द्विकर्मकधातुयोगे एव भवति इति।[644] कर्मभेदानपि धर्मकीर्ति: कारिकयैकया प्रतिपादयति- निवृत्तिकर्म, विकृतिकर्म, प्राप्तिकर्म इतिवत्-

निब्बतिविकतिप्पत्तिभेदो कमं तिधायथा।
कटं करोति, जापेति कट्ठं रूपं विपस्सति॥[645]

कर्मेतरकारकाणां कर्मत्वेन प्रयोगमपि मोगग्लान: पाणिनिवदेव प्रदर्शयति कर्मसूत्रव्याख्याने अधि सि ठा सानं पयोगेधिकरणे कम्मवचनिच्छा' यथा- 'पठविं अधिसेस्सति, गाममधितिट्ठति, रूक्खमज्झासतेति।[646] अत्राधिकरणं कर्मत्वेन प्रयुक्तम्। तथैव अयं नियम: 'अभिनिविसप्रयोगे वसतेश्च धातो: उप-अनु-अधि-आङ् उपसर्गपूर्वकात् भोजननिवृत्यर्थेतरेऽर्थे प्रतिपाद्यते[647] विकल्पेन। पानार्थे, चरणार्थे च उक्तेऽपि कर्मत्वं द्वितीया च उच्येते- 'तप्पानाचारेपि कम्मताव दुतिया सिया- नदिम्पिबति, गामं चरति'

---

642 बालावतार:, कारकप्परणं, विभत्तिभेदो, पृ.१९४

643 तत्रैव, पृ. १९-१९५.

644 अकथितं च कम्मं द्विकर्मकधातुयोगे दट्ठं। तत्रैव, पृ.१९५

645 तत्रैव, पृ.१९५

646 मोग्ग. २/२ वुत्ति, पृ.४२

647 एवमभिनिविसस्स वा, धम्ममभिनिविसते धम्मे वा, तथा उपन्वज्झावसस्साभोजननिवुत्तिवचनस्स। गाममुपवसति, गाममनुवसति, पब्बतमधिवसति, घरमावसति। अभोजन...........भोजननिवुतिं करोति। तत्रैव, पृ.४२-४३

इतिवत्।[648] 'प्रति'- उपसर्गेऽपि द्वितीयाविभक्तिः उक्ता- 'विहिताव पटियोगे दुतिया- पटिभन्तु तं चुन्द बोज्झगाति। प्रतेश्च धातुयोगे सम्बन्धबोधात् न कर्म तत्र इति। यथा 'तस्स न प्पटिभाति'। पुनः 'अक्खे दिब्बति, अक्खेहि दिब्बति, अक्खेसु दिब्बति' इत्यादयः प्रयोगाः कर्मकरणाधिकरणेषु अन्यतमस्य विवक्षा भवति।[649]

(द्वितीया) कालाद्धानमच्चन्तसंयोगे

क्रियागुणद्रव्यैः सह कालाध्वनोः साकल्येन सम्बन्धः अत्यन्तसंयोगः उच्यते। तस्मिन् गम्यमाने कालवाचकशब्दे अध्ववाचके च द्वितीया उच्यते।[650] 'मासमधीते मसं गुडधाना, कोसमधीते, कोसं कुटिला नदी, कोसं पनतो अत्यन्तसंयोगाभावे तु षष्ठी।[651] मोग्गल्लानेन अयं नियमबहुलं प्रतिपाद्यते।[652]

क्रियायाः फलप्राप्तौ गम्यमानायां कालध्ववाचिशब्दानां करणत्वमुपपद्यते ततस्तृतीयेति। ईदृशीफलप्राप्तिः अपवर्ग इति प्रतिपादिता।[653] फलप्राप्त्यभावे पुनः करणत्वाभावे द्वितीयैवेति।[654] ये च कालाध्ववाचिनो शब्दाः कारकमध्ये वर्तमानाः तेभ्यः सप्तमीपञ्चम्यौ उच्येते-'कारकमज्झे ये कालाध्दनवाचिनो ततो सत्तमीपञ्चमियो अभिमता अज्ज भुत्वा देवदत्तो द्विहे भुजिस्सति, द्विहा भुजिस्सति अत्र द्वयोयमिस्सासो कोसे लक्खं विज्झति, को सा लक्खं विज्झतीति। तापीह सक सक कारकवचनिच्छायेव सिद्धा।[655]

---

[648] तत्रैव, वुत्ति, पृ.४३

[649] तत्रैव, वुत्ति, पृ.४३

[650] तत्रैव, वुत्ति, पृ.४३-४४

[651] अच्चन्तसंयोगे किं? मासस्स द्वीहमधीते, कोसस्सेक देसे पव्वतो, पुबन्ह समयं निवासेत्वा, एकं समयं भगवा, इमं रत्तिं चत्तारो महाराजाति-एवमादिसु कालवाचीहि अच्चन्तसंयोगे दुतीया सिद्धा। तत्रैव, वुत्ति, पृ.४४

[652] तत्रैव, वुत्ति, पृ.४४

[653] फलप्पतीयं किरियासुपरिसमत्त्यपग्गो तस्मिं विज्जमाने कालद्धानं किरियायच्चन्तसंयोगे ततीयाभिमता, सापि करणत्ताव सिद्धामासेनानुवाकोधीतो, कोसेनानुवाकोधीतोति।

[654] अनपवग्गे तु असाधकमत्ता करणताभावे दुतीयाव-मासमधीतोनुवाको न चानेन गहितोति। तत्रैव, वुत्ति, पृ.४४

[655] तत्रैव, वुत्ति, पृ.४५

कच्चायनेन अयं नियम: तथैव पूर्वं प्रतिपादितं 'कालाद्धानमच्चन्तसंयोगे'[656] इति। तेन च वृत्तौ अनिर्दिष्टविशेषं धर्मकीर्ति: व्याचष्टे-'कालध्दानं दब्बगुणक्रियाहि निरन्तरसंयोगे सति दुतिया सिया'। मासं मंसोदनो। सरदं रमणीया नदी। मासं सज्झायति। अध्दाना- योजनं वनराजि। योजनं दीघो, पब्बतो कोसं सज्झायति'[657] ति।

गतिबोधाहारसद्दत्थाकम्मकभज्जादीनां पयोज्जे इति मोग्गल्लान: गत्यर्थकानां, बोधार्थकानां, आहारार्थकानां, शब्दार्थकानाम्, अकर्मकधातूनां, भज्जादीनां (भर्जादीनां) च धातूनां णिजन्तप्रयोगे तत्र प्रयोज्यकर्तरि द्वितीयाविभक्तिं प्रतिपादयति। तत्र च कर्मभावं निर्दिशति।[658] अन्यप्रयोज्यस्यापि अत्र ग्रहणं स्वीक्रियते यथा 'गमयति देवदत्तं यञ्ञदत्तेनति।[659]

तत्रैव क्रमे हरतेर्धातो: प्रयोज्यकर्तरि विकल्प: प्रतिपाद्यते।[660] अपवादमुखेन च 'न खादादनं, वहस्सानियन्तुके, भक्खस्साहिसायं' इति द्वितीयाया: निषेध: उक्त: अस्ति।[661]

ध्यादीहि युत्ता इत्यारभ्य कर्मप्रवचनीयानां योगे द्वितीयाविभक्तिर्विहिता सप्तभि: सूत्रै:-'लक्खणिमभूतवीच्छास्वाभिना, पति परी हि भागे च, अनुना, सहत्थे, हीने उपेन' च इतिवत्।[662] यद्यपि कर्मप्रवचनीयसंज्ञा मोग्गलानेन न कृता किन्तु कच्चायनादिभिरियं प्रतिपादिता।

---

656 कच्चा.२/६/२८

657 बालावतार:, कारकप्पकरणं, २०२, पृ.१९५

658 गमनत्थानं, बोधत्थानं, आहारत्थानं, सद्दत्थानमकम्मकानं भज्जादीनं च प्योज्जेकत्तरी दुतीया होति, सामत्थिया च पयोजकव्यापारेन कम्मतावस्स होतीति पतीयते- गमयति माणवकं गामं, यापयति माणवकं गामं, बोधयति गाणवकं धम्मं, वेदयति माणवकं धम्मं, भोजयति माणवकमोदनं, आसयति माणवकमोदनं, अज्झापयति माणवकं उदानं, पाठयति माणवकं उदानं, आसयति देवदत्तं, साययति देवदत्तं, अञ्ञं भज्जापेति, अञ्ञं कोट्टापेति, अञ्ञं संथरापेति। तत्रैव, २/४, वुति, पृ.४५-४६

659 तत्रैव, वुत्ति, पृ.४६

660 हारादीनं वा। हरादीनं पयोज्जे कत्तरि दुतीया होति वा, हारेति भारं देवदत्तं, देवदत्तेनेति वा, अज्झोहारेति सत्तुं देवदत्तं देवदत्तेनेति वा। कारेति देवदत्तं देवदत्तेनेति वा, दस्सयते जनं राजा जनेनेति वा, अभिवादयते गुरूं देवदत्तं देवदत्तेनेति वा। तत्रैव, २/५, वुत्ति पृ.४६

661 मोग्ग.सू.

662 मोग्ग-२/९-१५

कच्चायन: प्रयोज्यस्य द्वितीयाविधाने एवं सूत्रयति-'गतिबुद्धिभुजपठहरकरसयादीनं कारिते वा'।[663] अर्थात् गति-बुद्धि-भुज-पठ-हर-कर-सयादीनां धातूनां प्रयोगे प्रेरणार्थे गम्यमाने विकल्पेन द्वितीया उच्यते। यथा- पुरिसो पुरिसं गामं गमयति। अन्यपक्षे च पुरिसो पुरिसेन इत्यादिवत् तृतीया पक्षे पुरिसो पुरिसस्स इति षष्ठी अपि।

अत्र कच्चायनवुत्तौ वण्णनाकार: व्याख्यानविशेषं प्रस्तौति-'पुब्बसुत्तेनेव सिज्जनतो इमस्सुच्चाणं विकप्पत्थं; तेन पुरिसो पुरिसं कम्मं कारेतीति एत्थ दुतीया विभत्ति, पुरिसेनाति एत्थ 'कत्तरि चे'ति च सद्देन कम्मत्थे ततिया विभत्ति च, पुरिस्सा ति एत्थ 'दुतिया पञ्चमीनञ्चे ति सुत्तेन कम्मत्थे छट्टी विभत्ति होतीति- अयं रूपसिद्धिकारकस्स बुद्धप्पिया चारियस्स मति'।[664] किन्तु धम्मकीर्तिनेदं विधानं समावेशयति न च तत्र व्याख्याति।

कच्चायन: कर्मप्रवचनीयानां द्वितीयाविधाने 'कम्मप्पवचनीय युत्ते'[665] इत्येकं सूत्रं करोति। तत्र चोदाहरति-'तं खो पनभवन्तं गोतमं कित्तिसद्दो अब्भुगतो'। वण्णनाकार: कम्मप्पवचनीयं (कर्मप्रवचनीयम्) व्याख्याति-'कम्मं पवुच्चति इमेहीति कम्मप्पवचनीया:। के ते? अभि- अनुत्यादयो। तेहि युत्तं ति कम्मप्पवचनीययुत्तं, तस्मि।[666] बालावतारे धर्मकीर्ति: भूय: स्पष्टयति- लक्खणे विच्छायं इत्थम्भूते भागे सहत्थे हीने च वतमानस्स अनुस्स, सहत्थहीनवज्जितेसु, तेस्वेव अभिस्स कम्मप्पवचनीयसञ्ञा।'[667] अर्थात् लक्षणे इत्थंभूताख्याने, भागे, सहार्थे, हीनेऽर्थे च अनोरूपसर्गस्य सहार्थे- हीनार्थवर्जितेऽर्थे लक्षणादौ वतमानयो: पति-परि-उपसर्गयो:, भाग-सह-हीनार्थवजितस्य अभि-उपसर्गस्य कर्मप्रवचनीयसंज्ञा भवति। धर्मकीर्ति: वीप्सामपि स्पष्टयति कारिकया-

---

663 गति-बुद्धि-भुज-पठ-हर-कर-सयादीनं धातूनं पयोगे कारिते सति दुतीया विभत्ति होति वा। पुरिसो पुरिसं गामं गमयति, पुरिसो पुरिसेन वा, पुरिसो पुरिसस्स वा; एवं बोधयति, भोजयति, पाठयति, हारयति, कारयति, सायापयति। एवं सब्बत्थ कारिते। कच्चा-२/६/३०, वुत्ति, पृ.१४४

664 तत्रैव, वण्णना, पृ.१४४

665 कच्चा. २/६/२९

666 तत्रैव, वण्णना, पृ.१४३

667 बालावतार:, पृ.१९५

‘भिन्नानि यानि वत्थूनि क्रियाय तु गुणेन वा।
दब्बेन वापि व्यापितुमिच्छा विच्छा ति वुच्चते॥’[668]

मोग्गलान: ‘कत्तुकरणेसु ततिया’[669] इति कर्तरि करणे च कारके तृतीयां विभक्तिं प्रतिपादयति- ‘कत्तरि करणे च कारके ततिया होति- पुरिसेन कतं, असिना छिन्दति। पकतियाभिरूपो, गोतेन गोतमो, सुमेधो नाम नामेन, जातिया सत्तवस्सिको भूधातुस्स सम्भवा करणे एव ततिया। एवं समेन धावति, विसमेन धावति, द्विदोणेन धञ्ञ किणाति, पञ्चकेन पसवो किणातीति।’[670]

कारकद्वये तृतीयां प्रतिपाद्य मोग्गल्लान: उपपदतृतीयामपि पञ्चभि: सूत्रै: प्रतिपादयति। तत्रादौ ‘सहत्थेन’[671] इति सहार्थस्य योगे तृतीया उच्यते।[672] ‘लक्खेण’ इति[673] लक्षणद्योतके शब्दे तृतीया उच्यते। अत्र अङ्गविकारकथनेऽपि लक्षणत्वं स्वीकृतमति।[674] ‘हेतुम्हि’[675] येन शब्देन क्रियाविशेषस्य हेतु: गम्यते तत्रापि तृतीया भवति।[676] ‘पञ्चमिणे वा’[677] इति ऋणं यत्र हेतुर्भवति तत्र तृतीया भवति पञ्चमी वा।[678] ‘गुणे’[679] इति परस्य क्रियारूपहेतुवाचके शब्दे तृतीया पञ्चमी वा भवति।[680]

---

668 बालावतार:, पृ.१९६, अर्थात् यानि भिन्नानि वस्तूनि क्रियागुण-द्रव्यै: सम्बद्धुमिष्यन्ते तत्र इच्छा वीप्सा इति उच्यते।

669 मोगा. २१/१८

670 तत्रैव, वुत्ति, पृ.५०

671 मो.सू. २/१९

672 सहत्थेन योगे ततिया सिया- पुत्तेन सहागतो, पुत्तेन सध्दिं आगतो। ततियापि छट्ठीव अप्पधाने भवति, तत्रैव, वुत्ति, पृ.५०

673 मो.सू.२/२०

674 लक्खणे वत्तमानतो ततिया सिया- तिदण्डकेन परिब्बाजकमदक्खि, अक्खिना काणो, तेन हि अंगिनो विकारो लक्खीयते। तत्रैव, वुत्ति, पृ.५०

675 मो.सू.२/२१

676 तक्किरिया योग्गे ततिया सिया- अन्नेन वसति, विज्जाय यसि, तत्रैव, वुत्ति, पृ.५१

677 मो.सू.२/२२

678 इणे हेतुम्हि पञ्चमी होति वा, तत्रैव, वुत्ति, प्.५१

679 मो.सू.२/२३

680 परांगभूते हेतुम्हि पञ्चमी होति वा, जडत्ता बद्धो, जडत्तेन बध्दो वा, पञ्ञाय मुतो, हुत्वा अभावतोनिच्चा, संखारनिरोधा निरोधे विम्माण. कच्चा. २/६/९, तत्रैव, पृ.५१

कच्चायन: 'येन वा करियते तं करणं'[681] तत्र वृत्तावसौ येन क्रियते, दृश्यते, श्रूयते वा तत् कारकं करणसंज्ञं भवतीति प्रतिपादयति।[682]

पुन: 'करणे ततिया'[683] इति करणकारके तृतीयाविभक्तिं प्रतिपादयति कच्चायन:।[684] 'कत्तरि च'[685] इति सूत्रेण कर्तृकारके तृतीया विभक्ति: भवति।[686] कच्चायनवण्णनाकार: अत्र चकारेण इत्थंभूतलक्षणे, क्रियापवर्गे, पूर्व (पुब्ब), सादृश्य (सदिस), सम, कलह, निपुण, मिश्र (मिस्सक), श्लक्ष्ण (सखिल) एषां योगे, काले, अध्वनि, प्रत्यर्थे, कर्मण्यर्थे च पञ्चमीसप्तम्यो: स्थाने तृतीयाविधानं स्वीकरोति। यथा- इत्थंभूतलक्षणे 'यो पन भिक्खु ऊनपञ्चबन्धनेन पत्तेन अञ्ञं नवं पत्तं चेतापेय्य, सा काडी भिन्नेन सीसेन पग्धरन्तेन लोहितेन पटिविस्सकानं उपज्झापेसीति', क्रियापवर्गे- 'एकाहेनेव वाराणसिं पायासि', पूर्वादिषु-मासेन पुब्बो, पितरा सदिसो, मातरा समो, असिना कलहो, वाचाय निपुणो, गुडेन मिस्सको, वाचाय सखिलो इत्यादय:। काले यथा- कालेन धम्मसाकच्छा। अध्वनि- योजनेन धावति। प्रत्यर्थे- मणिना मे अत्थो। कर्मण्यर्थेतिलेहि वपति खेत्ते, संविभजेनो रज्जेन, पञ्चम्यर्थे-सुमुत्ता भयं तेन महासमणेन, सप्तम्यर्थे- दक्खिणेन विरुडहको।[687]

काच्चायनस्य कर्तृसंज्ञाविधायकसूत्रं व्याचक्षाण: बालावतार: धर्मकीर्ति: वाक्ये अन्यकारकाणां प्रधान: कर्मस्थ: आत्मस्थ: वा क्रियाया: कर्ता कर्तृकारकं भवति।[688] तत्र

---

[681] कच्चा. २/६/९

[682] येन वा करियति, येन वा पस्सति, येन वा सुणाति तं कारकं करणसञ्ञं होति। दात्तेन वीहिं लुनाति, वासिया रुक्खं फरसुना रुक्खं छिन्दति, कुद्दालेन आवटं खणति, हत्थेन कम्मं करोति, चक्खुना रूपं पस्सति, सोतेन सद्दं सुणाति। तत्रैव, वुत्ति, पृ.१३५

[683] कच्चा. २/६/१६

[684] करणकारके ततिया विभत्ति होति। अग्गिना कुट्टिं झापेति, मनसा चे पदुट्ठेन, मनसा चे पसन्नेन, कायेन कम्मं करोति।

[685] कच्चा. २/६/१८

[686] कत्तरि च ततिया विभत्ति होति। रञ्ञा हतो पोसो, सक्केन दिन्नो वरो, अहिना दट्ठो नरो।

[687] तत्रैव, क. वण्णना, पृ.१४०-१४१

[688] यो अञ्ञकारकानं पधानो कम्मट्ठमत्तट्ठं वा क्रियं करोति, सो कत्ता नाम। यो करोति स कत्ता इति सूत्रे वुत्ति। बालावतार, का. पृ.१९८

कत्तरि च इति सूत्रेऽसौ उदाहरणै: स्पष्टयति यत् क्रियाया: अभिनिवर्तक: उत्साहवान् कर्ता भवति। तत्रैव तृतीया इति।[689] कर्तृलक्षणे एकां कारिकामपि असौ प्रस्तौति-

योो योजयं सकसके खलु कारकानि,
अञ्ञे क्रिये यतनुयुत्ततया पधानो।
कम्मट्ठितं क्रियमथात्तठितं करोति,
कत्ताति सो निगदितो स च नेकभेदो॥[690]

कर्त्रनन्तरं धर्मकीर्ति: कच्चायनस्य करणसूत्रं 'येन वा करियते तं करणं' इत्येतत् व्याचष्टे यत् कर्ता येन कारकेण क्रियां करोति पश्यति वा तत् कर्तु: क्रिया सिद्धौ अत्यन्तम् उपकारकं सत् करणसंज्ञं भवति।[691] करणे च तृतीयविभक्ते: विधानप्रसङ्गे करणं च आभ्यान्तरं बाह्यमिति द्विविधं प्रतिपाद्यते-

बाहिरं च तथाज्झत्तं करणं दुविधं यथा।
वीहिं लुनाति दात्तेन, नेत्तेन चन्दमिक्खते॥[692]

'सहादियोगे च'[693] इति कच्चायन: सहादिनां (सह, सध्दिं, समं, नाना, विना, अलम् आदि) शब्दानां योगे तृतीयां प्रतिपादयति।[694]

चकारेण वण्णनाकार: निपातयोगेऽपि तृतीयाविधानं स्वीकरोति एवं करणत्थे ततियाविभत्तुपतिं दस्सेत्वा निपातयोगे अकारकेऽपि ततियाविभत्तुप्पतिं दस्सेत्वा निपातयोगे अकारकेपि ततिया विभत्तुप्पतिं दस्सेतुं "सहादियोगे च" इति वुत्तं, 'च सद्देन

---

689 सूदेन थालियं कट्ठेहि ओदनं पच्चते। रञ्ञो पासादे पादेहि हीयते। एत्थ थाल्यादिकारकसमूहो सूदेन योजितो यं यं धारणादिना व्यापारेन पाकक्रियमभिनिब्बतयतीति सूदो येव उत्साहयुत्तता पधानो, न पन थाल्यादि। तत्थ पाकक्रिया कम्मट्ठा, ठितिक्रिया तु कत्तुट्ठा। बालावतारे, कारकप्पकरणम्, पृ.१९८

690 तत्रैव, पृ.१९९

691 कत्ता येन करोति पस्सति वा, तं कत्तुस्स क्रियासिद्धियमतिसयेनोपकारभूतं गम्यतेति करणं नाम। बालावतारे, कारकप्पकरणे, पृ.१९९

692 तत्रैव, का.प्प. पृ.१९९

693 कच्चा, २/६/१७

694 सहादियोगत्थे च ततिया विभत्ति होति। सहा पि जग्गेन सङ्वो उपोसथं करेप्प, विना गग्गेन, महता भिक्खुसङ्घेन सद्धिं, सहस्सेन समं मिता। तत्रैव, वृत्ति, पृ.१४०

तेसं सहादियोगानं' अत्थसम्भवे सति पि ततिया विभत्ति होतिति'।[695] धमकीर्ति बालावतारे 'सहादियोगे च' इति सूत्रव्याख्याने सहादियोगक्रियागुण: द्रव्याणां समवायगतं मनुते।[696]

मोग्गल्लानस्य लक्खणे इति सूत्रार्थे कच्चायन: येनाङ्गविकार इति पाणिनीयमेव सूत्रं स्वीकरोति किन्तु अङ्गविकारगतलक्षणे[697] एवास्य व्याप्ति: न तु इत्थम्भूते।[698] धम्मकीर्ति: विकारमन्यथाभावरूपेण व्याचष्टे।[699] कच्चायन: 'विसेसने च' इति भेदवाचिनि शब्दे तृतीयां निर्दिशति।[700] इदं च तृतीयाविधानं मोग्गल्लानेन कतुकरणेसु ततिया इति करणकारके विहितम्।[701] कच्चायनवण्णनाकार: विसेसने च इत्यत्र चकारग्रहणेन द्रव्य-गोत्र-नाम-जात्यादीनां प्रकृतिभेदानां ग्रहणं समर्थयति- 'चग्गहणस्स च समुच्चयत्थत्ता' दब्ब-गोत्त-नाम-जाति-सिप्प-वय-भावेन विसेसनं वा पकतियेभुय्येन दोणादिकं वा सब्बं संगण्हाति'[702] बालावतारकार: 'विसेसने च' इति भेदबोधके शब्दे तृतीयां समर्थयति[703] सहैव उक्तादन्यत्र तृतीयाप्रतिपादने कत्तरि च इत्यत्र चकारग्रहणम् इति विवृणोति।[704]

---

695 तत्रैव, वण्णना, पृ.१४०

696 सह-अलं-किं-आदिनं योगे सहत्थे च ततिया सिया। सहसद्देन च योगो क्रिया-गुण-दब्ब-समवाये सम्भवति। पुत्तेन सह बुत्ति। अलं ते इध वासेन। किं ते जटाहि। वा. पृ.१९९

697 कच्चा. २/६/२१

698 येन व्याधिमता अङ्गेन विकारो लक्खीयते तत्थ ततिया विभत्ति होति। अक्खिना काणो, हत्थेन कुणी, काणं पस्सतिनेत्तेन, पादेन खञ्जो, पिट्ठिया खुज्जो। तत्रैव, वुत्ति, पृ.१४१

699 येन व्याधिमता अवयवेन सरीरस्स विकारो विञ्ञायति, तत्थ ततिया विभत्ति सिया। विकारो अञ्ञथाभावो। अक्खिना काणो, बालावतारे, पृ.२००

700 विसेसनत्थे च ततिया विभत्ति होति। गोत्तेन गोतमो नाथो। सुवण्णेन अभिरूपो, तपसा।

701 पकतियाभिरूपो, गोत्तेन गोतमो, सुमेधो नाम नामेन, जातिया सत्तवसिको भूधातुस्स सम्भवा करणे एव ततिया..........। मोग्ग, वुत्ति, २/२/१८

702 कच्चा. वण्णना, २/६/२२, पृ.१४२

703 इति विसेसनत्थे ततिया सिया। गोत्तेन गोतमो। बाला. का. घ. पृ.२००

704 वुत्ततोऽञ्ञत्र या ततिया दिस्सति सा सब्बा 'कत्तरि च' इतीह चकारेण सिज्झति। तं यथा कम्मे- तिलेहि वपति। पञ्चमियं- सुमुता मयं तेन महासमणेन। पठमायं- अत्तना व अत्तानं सम्मन्नति। इत्थंभूते- परिब्बाजकं तिदण्डेनादक्खि। किरियापवग्गो- किरियाय आसुनिट्ठापनं। तुल्ये-मातरा समो। काले- धम्मस्सवणं। पुब्बादियोगे-मासेन पुब्बो। उपसङ्कमीत्यादि। बालावतारे, पृ.२००

'हेत्त्वत्थे च'[705] इति हेत्वर्थे तृतीयां प्रतिपादाति कच्चायन:।[706] धर्मकीर्ति: (हेतुयोगे) हेत्वर्थे चेति तद्दिशदयति- 'हेत्वत्थे हेतुयोगे च ततिया सिया। अन्नेन वसति। केन हेतुना वा।[707] यद्यपि मोग्गल्लानसन्दर्भे केन हेतुनेति प्रयोग: 'सब्बदितो सब्बा' इति सूत्रसाध्य: स्यात्। 'सत्तम्यत्थे च'[708] इत्यपि कच्चायन: सप्तम्यर्थे तृतीयाविधानं करोति।[709] इदं मोग्गल्लानस्थशास्त्रे नोपलभ्यते। 'पुब्बेन गामं इति उदाहरणपुरस्सरम् इदं विधानं समर्थितं बालावतारेणापि।[710]

एतदतिरिच्य मोग्गल्लान: हेतौ वाच्ये सूत्रद्वयं ग्रथितं यत् नोपलभ्यते कच्चायनसम्प्रदाये। तद्यथा 'छट्ठी हेत्वत्थेहि'[711] अनेन हेत्वर्थवाचिनां योगे षष्ठी उच्यते-'उदरस्स हेतु, उदस्स कारणा। 'सब्बादितो सब्बा'[712] इति हेत्वर्थकशब्दानां योगे 'सब्ब'- आदिसर्वनामसु सर्वा: विभक्तय: भवन्ति इति।

यथा- को हेतु:, कं हेतु, केन हेतुना, कस्स हेतुस्स, कस्मा हेतुस्मा, कस्स हेतुस्स, कस्मिं हेतुस्मिं, किं कारणं, केन कारणेन, किं निमित्तम्, केन निमित्तेन, किं पयोजनं, केन पयोजनेन इत्यादिवत्।

चतुत्थीसम्पदाने[713] इति सम्प्रदाने चतुर्थी विभक्तिं प्रतिपाद्य टीकायां सम्प्रदानमपि स्पष्टयति मोग्गल्लान:।[714] कच्चायन: भूयोऽपि स्पष्टतया सम्प्रदानं विवृणोति- 'यस्स दातुकामो रोचते धारयते वा तं सम्पदानं'[715] अर्थात् यं प्रति दातुमिच्छा भवति, यस्मै वा

---

[705] कच्चा. २/६/१९.

[706] हेत्वत्थे च ततिआ विभत्ति होति। अन्नेन वसति। धम्मेन वसति। विज्जाय वसति। सक्कारेन वसति। तत्रैव, वु. पृ. १४१

[707] बालावतारे, का. प्प. पृ.१९९

[708] कच्चा. २/६/२०

[709] सत्तम्यत्थे च ततिया विभत्ति होति। तेन कालेन, तेन समयेन, तेन खो पन समयेन। तत्रैव, वुत्ति, पृ.१४१

[710] बालावतारे, का.प्प., पृ.१९९

[711] मोग्ग. २/२/२४

[712] तत्रैव, २/२/२५

[713] मोग्ग. २/२/२६

[714] यस्स सम्मा पदीयते तस्मिं चतुत्थी सिया। संघस्स ददाति, आधारविवक्खायं सत्तमीपि सिया, संघे देहि।

[715] कच्चा. २/६/६

ऋणरूपेण किञ्चित् धार्यते तत् सम्प्रदानम् इति।[716] सूत्रे वा शब्देन सम्प्रदानस्य अर्थविकल्पं प्रतिपादयति कच्चायन: धातु-नाम-उपसर्ग-निपातविशेषणानां योगे।[717] सम्प्रदानं सम्मा दीयते अस्स' इति स्पष्टयति[718] अस्यै च सम्प्रदास्य अर्थविकल्पनेऽपि सम्मति:- 'न वा पयोगेति एत्थ नकारो अञ्ञत्थो यथावुत्तपयोगतो अञ्ञस्मिम्पि पयोगे'ति अत्थो। इमिना च अवसेसकारकमज्झकरणत्थ अदस्सनादिधातुपयोगे सङ्गण्हाति।'[719]

अन्यत्र च 'सिलाघहनुठासपधारपिहकुहकुधदुहिस्सासूयराधिक्खपच्चासुण-अनुपतिगिणपुब्बकत्तारोचनत्थतदत्थतुमत्थालमत्थञ्ञानादरप्पाणिनिगत्यत्थकम्मनिसंस नत्थसम्मुतिभिय्यसत्तम्यत्थेसु'[720] इति सूत्रेण केषाञ्चन धातूनामर्थविशेषे प्रयोगे सम्प्रदानं कारकं प्रतिपादयति। तत्रासौ एवमुदाहरति- सुलाघ-बुद्धस्स सिलाघते, हनु-हनुते मय्हमेव, ठा-उप-तिट्ठेय सक्यपुत्तानं वड्ढकी, सप-मय्हं सपते, धार- सुबण्णं ते धारयते, पिह- बुद्धस्स अञ्ञतित्थिया पिहयन्ति। कुध-कोधयति देवदत्तस्स, दुह-दुहयति दिसानं मेघो, ईर्ष्यार्थक (इस्स)- तित्थिया इस्सयन्ति समणानं गुणगिद्धदेन, तित्थिया समणानं उसुय्यन्ति। राध-इक्ख; विपृच्छायाम् (विकल्पेन)[721]- आराधोमे रञ्ञो, आराधो मे राजानं, क्याहं अय्यानं अपरज्झामि, क्याहं अय्ये अपरज्झामि, चक्खु जनस्स दस्सनाय, तं विय मञ्ञे, आयस्मतो उपालिथेरस्स उपसम्पदापेक्खो, उपतिस्सो, अयस्मन्तं वा।

---

716 यस्स वा दातुकामो, यस्स वा रोचते, यस्स वा रोचते, यस्स वा धार्यते, तं कारकं सम्पदान सञ्ञं होति। समणस्स चीवरं ददाति, समणस्स रोचते सच्चं। देवदत्तस्स सुवण्णच्छतं धारयते यञ्ञदतो। तत्रैव, वुति, पृ.१२८

717 वा ति विकप्पनत्थं- धातुनामानं पयोगे वा उपराग्गयोगे वा निपातप्पयोगे वा नवायोगे वा सति अत्थविकप्पनत्थं वा सद्दो पयुज्जति। तत्रैव, वुत्ति, पृ.१२८

718 सम्मा दीयते अस्सा ति सम्पदानं, अस्स पटिग्गाहकस्स सम्मापूजनगाकारेन पदीयते, इति अस्साति पदेन निद्दिट्ठं तं कारकं सम्पदानं नामा त्यत्थो। इमिना रजकस्स वत्थं ददात्यादीनि निवत्तेति पूजादीनमभावतो। सम्पज्ज अस्स ददाति ति वा सम्पदानं, सम्पज्ज उपगत्वा अस्स पटिग्गाहकस्स वदाती त्यत्थो। एवमत्थे सति रजकस्स ददाती त्यादयो पि संगण्हाति तत्रैव, क. वण्णजा. पृ.१२९.

719 तत्रैव, क. वण्णना, पृ. १२९

720 कच्चा. २/६/६७

721 राध-इक्ख इच्चेतेसं धातूनं पयोगे यस्स अकथितस्स पुन: विपुच्छनं कम्मविख्यापनत्थञ्च, तं कारकं सम्पदानसञ्ञं होति दुतिया च। तत्रैव, वुति, पृ.१३०

पच्चासु-अनुपतिगिणः, पूर्वकर्तरि च-[722] ते भिक्खू भगवतो पच्चसोसुं, आसुणन्ति बुद्धस्स भिक्खू। भिक्खुजनम् धम्मं सावेति; तस्स हि भिक्खुनो जनो अनुगिणाति, तस्स भिक्खुनो जनो पतिगिणाति।

आरोचने अर्थे[723]- आरोचयामिवो भिक्खवे, आमन्तयामिवो भिक्खवे, पटिवेदयामि वो भिक्खवे।
तदत्थे (तादर्थ्ये)[724]- ऊनस्स परिपूरिया वत्थं निक्खिपितब्वं, बुद्धस्स अत्थाय, धम्मस्स अत्थाय, सद्धस्स अत्थाय जीवितं परिच्चजामि।

तुमत्थे (तुमर्थे)[725] लोकानुकम्पाय अत्थाय हिताय सुखाय भिक्खूनं फासुविहाराय इच्चेवमादि। अलमत्थे (अलमर्थे योग्यतायां वारणे च[726]- अलम्मे बुध्दो, अलम्मेरज्जं, अलं भिक्खुपत्तस्स, अलं मल्लो मल्लस्स। अलं ते रूपं करणीयं, अलम् मे हिरञ्ञसुवण्णेन। मञ्ञतिप्पयोगे अनादरे अप्पाणिनि (अनादरे अप्राणिनि च बोध्ये मन्यतेः)[727]- कट्ठस्स तुवं मञ्ञे, कलिंगरस्स तुवं मञ्ञे।

गत्यत्थकम्मनि (गत्यर्थकर्मणि)[728]- गामस्स पादेन गतो, नगरस्स पादेन गतो, अप्पो सग्गाय गच्छति, सग्गस्स गमनेन वा, मूलाय पटिकस्सेय सङ्घो। दुतिया च- गामं पादेन गतो, नगरं पादेन गतो, अप्पो सग्गं गच्छति, सग्गं गमनेन वा, मूलं पटिकसेय्य सङ्घो।

आसिंसनत्थे (आशिषि अर्थे)[729]- अयस्मतो दीघायु होतु कुसलं भवतो होतु, भद्दं भवतो होतु, अनामयं भवतो होतु। सम्मुतिप्पयोगे (सम्मतौ)[730]- अञ्ञत्र सङ्घसम्मुति भिक्खुस्स

---

722 सुणोतिस्सधातुस्स पच्चायोगे यस्स कम्मुनो पुब्बस्स यो कत्ता सो सम्पदान सञ्ञो होति। तत्रैव, वुत्ति, पृ.१३०

723 तत्रैव, वुत्ति, पृ.१३१

724 तत्रैव, वुत्ति, पृ.१३१

725 तत्रैव, वुत्ति, पृ.१३१

726 तत्रैव, वुत्ति, पृ.१३१

727 तत्रैव, वुत्ति, पृ.१३१

728 तत्रैव, वुत्ति, पृ.१३१

729 तत्रैव, वुत्ति, पृ.१३२

730 तत्रैव, वुत्ति, पृ.१३२

विप्पवत्थुं न वहति। साधुसम्मुतिया मे भगवतो स्सनाय। भिय्यप्पयोगे- (भयप्रयोगे)[731]- भिय्यो सोमत्ताय।

सत्तम्यत्थे (सप्तम्यर्थे)[732]- तुय्हं चस्स आविकरोमि, तस्समे सक्को पातुरहोसि। अत्थग्गणेन बहूसु अक्खरप्पयोगे दिस्सति- उपमं ते करिस्सामि, धम्मं वो भिक्खवे देसिस्सामि।

सारत्थे (उत्तमेऽर्थे)[733]-देसेतु भगवा धम्मं भिक्खूनं, तस्स कासु होति, एतस्स पहिणेय्य, यथा नो भगवा व्याकरेय्य, तथापि तेसं व्याकरिस्साम, कप्पति समणानं आयोगे। अम्हाकं मणिना अत्थो, किमत्थो मे बुद्धेन, सेय्यो मे अत्थो, बहूपकाराभन्ते महापजापती गतमि भगवती। बहूपकारा भिक्खवे मातापितरो पुत्तानं।

अन्यत्रापि केषुचिदर्थे सम्प्रदानं संभवति तच्च सुधिजनव्याख्यानाङ्गभूतं स्वीक्रियेत इति कच्चायनाचार्यस्य सम्मतम्।[734] सूत्रे च शब्दपाठाच्च अनुपदिष्टप्रयोगाणां विकल्पेन सम्प्रदानत्वं संभवतीति। यथा- भिक्खुसङ्घस्स पभु अयं भगवा, देसस्स पभु अयं राजा:, खेत्तस्स पभु अयं भगवा, अरञ्ञस्स पभु अयं लुद्दको। क्वचित् प्रसङ्गेषु च द्वितीयातृतीयाषष्ठी सप्तम्यर्थेषु अपि सम्प्रदानं भवति।[735]

कच्चायन: कारिकयैकया सम्प्रदानं विवृणोति-

यो वदेति स कत्ता ति वुत्तं कम्म ति वुच्चति।<br>यो पटिग्गाहको तस्स सम्पदानं विजानिया॥[736]

अर्थात् य: वदति स: कर्ता भवति। यच्च उक्तं तत् कर्म भवति। यश्च साधुकारादिदानस्य कथनस्य वा प्रतिग्राहक: सम्प्रदानं ज्ञेयमिति। वण्णनाकार: स्पष्टयति- ‘कत्तुकम्मसम्पदानविसेसं दस्सेतु ‘यो वदेति.......वुच्चति ति वुत्तं। तत्थ यो भगवादिको कारको वदेति स सावेति च सो कत्ता ति वुच्चति। वुत्तं वचनक्रियं कम्मं ति इति वुच्चति। यो

---

731 तत्रैव, वुत्ति, पृ.१३२

732 तत्रैव, वुत्ति, पृ.१३२

733 तत्रैव, वुत्ति, पृ.१३२

734 तत्रैव, वुत्ति, बहूसु अक्खरपयोगेसु अञ्ञेपिपयोगापयोगविचक्खणेहि योजेतब्बा, पृ.१३२

735 क्वचि दुतिया-ततिया-छट्ठी-सत्तम्यत्थेसु च। तत्रैव, वुत्ति, पृ.१८३

736 तत्रैव, वुत्ति, पृ.१३१

भगवादिको कारको साधुकारादिदानस्स पटिग्गाहको तस्स भगवादिकारकस्स सम्पदानसञ्ञं विजानेय्याति अत्थो।[737]

बालावतारे धर्मकीर्ति: सम्प्रदानलक्षणमधिकतरं स्पष्टयति- कर्ता पूजाबुद्ध्या अनुग्रहबुद्ध्या वा यस्मै दातुमिच्छति, प्रीतिं करोति, धारयते वा तत् कर्तु: दानस्य इच्छाया: निमित्तं सम्प्रदानसंज्ञं भवति।[738] असौ च 'सम्पदाने चतुत्थी' इति सूत्रस्य व्याख्याने सम्प्रदानं त्रिविधं विवृणोति भर्तृहरेरानुगुण्येन-

अनिराकत्तानुमत्ता वा पेरकं सम्पदानियं।
तिधा यथा जलं देति रूक्खस्स भिक्खुनोऽत्थिनो॥[739]

अनिराकरणं यथा- रूक्खस्स जलं देति, अनुमति: यथा- जलं देति भिक्खुनो प्रेरणा यथा- जलं देति अत्थिनो।

सिलाघादिधातुयोगेऽसौ कच्चायनप्रतिपादिमेव सम्प्रदानं समर्थयति।[740] तत्र च 'सम्पदाने चतुत्थी' इति सम्प्रदानकारके चतुर्थीविभक्तिविधानम्।[741] वण्णनाकार: अत्र सूत्रे योगविभागेन उक्तादन्यविषयष्वपि चतुर्थीविधानं समर्थयति[742]- चतुत्थीति योगविभागेन कत्वत्थे, कम्मत्थे, करत्थे, निस्सक्कत्थे छट्ठयत्थे, सत्तम्यत्थे अच्चन्तसंयोगे चतुत्थी विभत्ति होति। 'हेत्वत्थे च' इत्यत्र चकारात् हेत्वर्थेऽप्यत्र चतुर्थी।

मोग्गल्लान: 'तादर्थ्ये'[743] इति सूत्रेण तादर्थ्येन सहैव सर्वस्या: उपपदचतुर्थ्या: प्रतिपादनं करोति। तादर्थ्ये उदाहरति- सीतस्सा पटिघाताय, अत्थाय हिताय देवमनुस्सानं, नालं दारभरणाय, यूपाय दारु, पाकाय वजतीत्वेमादि'।[744] चतुर्थीषष्ठ्यो:

---

[737] तत्रैव, वण्णना, पृ.१३४

[738] कत्ता पूजाबुद्धिया वा अनुग्गहबुद्धिया वा यस्स दातुमिच्छति, पीतिं कारेति वा, धारयते वा, तं कत्तुस्स दानमिच्छानिमितं सम्पदानं नाम। बालावतारे, कारकप्पकरणं पृ.२०१

[739] बालावतारे, कारकप्पकरणं, पृ.२०१

[740] तत्रैव, काप्प. २०२

[741] कच्चा. २/६/२३

[742] तत्रैव, वण्णना, पृ.१४२

[743] मोग्ग. २/२/२७

[744] तत्रैव, वुत्ति (पञ्चिका), पृ.५२

समानरूपत्वात् सम्बन्धमपि क्वचित् चतुर्थ्यर्थं प्रतिपादयति मोग्गल्लान:- 'कस्स सादुं न रूच्चति, मा आयस्मन्तानम्पि सङ्घभेदो रूचित्थ खमति सङ्घस्स, भत्तमस्स न छादेतीति- छट्ठी सम्बन्धवचनिच्छायं; न चेवं विरोधो सिया सदिसरूपता एवं विधेसु च सम्बन्धस्स सद्दिकानुमतत्ता; कस्स वा त्वं धम्मं रोचेसीति- अत्थवत्ते पठमा।[745]

'एवञ्ञापि विञ्ञेय्या परतोऽपि यथागमं।[746] इति वार्तिकेन सिलाघादिधातुयोगे कच्चायनेन उक्तवदेव चतुर्थी प्रतिपाद्यते मोग्गल्लाव्याकरणेपि। कच्चायन: 'नमोयोगदिस्वपि'[747] नम:-स्वस्त्यादिशब्दानां योगे चतुर्थी प्रतिपादयति[748] किन्तु इदं विधानं मोग्गल्लानस्य शास्त्रे नोपलभ्यते। वण्णनाकार: अत्र अपिशब्दग्रहणेन चतुर्थ्या: प्रतिषेधोऽपि प्रतिपाद्यते- 'अपिग्गहणेन नमोयोगादिसु पि कत्थचि पटिसेधेति, नागस्साति खीणावस्स'[749] इति। बालावतारकार: धर्मकीर्तिरपि कच्चायनस्य विधानं यथावत् स्वीकरोति।[750]

मोग्गल्लान: अपादानेऽर्थे अवधिसंज्ञां स्वीकृत्य तत्र पञ्चमीविधानं करोति। 'पञ्चम्यवधिस्मा'।[751] अवधे: किमपि लक्षणादिकमनेन न प्रस्तुतम्। अपितु पदार्थावधे: पञ्चमी स्यादिति सामान्यार्थग्रहणेन व्याख्याति।[752] उदाहरणेषु कच्चायनस्वीकृतानामेव अपादानविवरणानां ग्रहणं लभ्यते। कच्चायन: यस्मादपेति भयमादत्ते वा तदपादानम्[753]

---

[745] तत्रैव, पञ्चिका, पृ.५३

[746] तत्रैव, पञ्चिका, पृ.५३

[747] कच्चा. २/६/२४

[748] नमो योगादिस्वपि च चतुत्थी होति। नमो ते बुद्धवीरत्थु, सोत्थि पजानं नमो करोहि नागस्स, स्वागतं ते महाराज। तत्रैव, वुत्ति, पृ.१४२

[749] तत्रैव, वण्णना, पृ.१४२

[750] बालावतार:, कारकप्पकरणं, पृ.२०२

[751] मोग्ग. २/२/२८

[752] पदत्थावधिस्मा पञ्चमी विभत्ति होति- गामस्मा आगच्छति एवं चोरस्मा भायति, चोरस्मा उत्तसति, चोरस्मा तायति, चोरस्मा रक्खति। तत्रैव, पञ्चिका, पृ.५५

[753] कच्चा. २/६/१

इतिवत् अपादानं लक्षयति। यस्मात् पृथग्भाव:, भयमादानं वा स्यात् तदपादानसञ्ज्ञमिति।[754] अपादानञ्च द्विधा पतिपादयत्यसौ-

समेप्यपगमे द्वित्तं पुब्बरूपा यदच्चुतं।
वुच्चते तदपादानं तं चलाचलतो द्विधा।
यथास्सा धावता पोसो, वने, रूक्खा फलं ति च।[755]

अर्थात् मेषयुद्धे मेषद्वयस्य समानतया अपसरणेऽपि पूर्वमेषस्यापेक्षायां अन्योऽपादानम्। तदपादानं चलाचलभेदेन द्विविधम्। तत्र 'अस्सा धावता अस्सा पोसो पतति' अश्व: चलमपादानम्। 'रूक्खा फलम् ओचिनोति' चाचलमपादानम्।

मोग्गलान: 'पञ्चम्यवधिस्मा अस्मिन्नेव सूत्रे व्याख्यायां शेषाणां कारकविधानेन उपपदविधाने च पञ्चमी प्रतिपादनं करोति। पराजे: योगे असहनेऽर्थे पञ्चमी भवति- 'अज्झेना पराजेति' 'पटिपक्खे पराजेति' इतिवत्। अन्यथा च केवट्टस्स पराजिस्सामि' इति सम्बन्धविवक्षायां षष्ठी। वारयतेश्च योगे पञ्चमी विधीयते- 'यवेहि गावो वारेति', 'पापा चित्तं निवारये', 'काके रक्खति तण्डुलानि' इतिवत्। 'चित्तं रक्खेथ मेधावी' इत्यत्र तु द्वितीयाकर्मणि। अन्तर्धाने, अध्ययने, उद्भवे एतेष्वर्थेषु पञ्चमी- उपाज्जाया अन्तरधायति; 'उपज्झाया अधीते', कामतो जायती सोको। षष्ठीसप्तम्यावपि दृश्येते विवक्षायां तत्थेवान्तरधायिसु', 'नटस्स सुणोति', 'पदुमं तत्थ जायेथति'। अन्यादिष्वपि शब्देषु प्रयोज्ये पञ्चमीविधानं क्रियते- 'अञ्ञो देवदत्ता', 'भिन्नो देवदता'। दूरादारादित्यादियोगे पञ्चमी सम्बन्धविवक्षायां षष्ठी च भवत:- 'आरा सो आसवक्खया', 'इतरो देवदत्ता', 'पुरतो गामस्स', 'दक्खिणतो गामस्स'। अधिकरणे अर्थे च पञ्चमीविधानं क्रियते- 'पासादमारूह्य पेक्खति', 'पासादा पेक्खति'। दूरान्तिकार्थयोगे पञ्चमीषष्ठ्यौ बाधकाभावे च अन्या: अपि विभक्तय: भवन्ति- दूरं गामस्मा, अन्तिकं गामस्मा, दूरं गामस्स अन्तिकं गामस्स, दूरो गामो, अन्तिको गामो इत्यादिवत्।[756]

---

[754] बालावतारे, कारप्पकरणं, पृ.२०४

[755] तत्रैव, कारकप्पकरणं, पृ.२०४

[756] मोग्ग, पञ्चिका, २/२/२८, पृ.५५-५८

अपपरीहि वज्जने[757] इति अवधे: मर्यादाभिविध्योश्चावशिष्टे अर्थे 'अपपरिउपयोगे' पञ्चमी विहिता।[758] यथा 'अपसालाय आयन्ति वणिजा', 'परिसालाय आयन्ति वणिजा' शालां वर्जयित्वेत्यर्थ:। 'पटिनिधिपटिदानेसु पटिना'[759] इत्यनेन 'प्रति' उपसर्गयो: योगे प्रतिनिधिप्रतिदानेऽर्थे पञ्चमी विहिता।[760] 'रिते दुतिया च'[761] इति रितेशब्दयागे द्वितीयापञ्चम्यौ उच्येते- रिते सद्धमं, रिते सद्धम्मा इतिवत्। विनाऽञ्ञत्थ ततिया'[762] इति विना- अञ्ञत्थ शब्दयोर्योगे द्वितीया-तृतीया-पञ्चमी भवन्ति।[763] यथा- विना वातं, विना वातेन, विना वातस्मा इतिवत्। पुथनानाहि[764] इत्यपि पुथुनानाशब्दाभ्यां तृतीयापञ्चम्यौ विकल्पेन भवत:। पुथगेव जनेन, पुथगेव जनस्मा, जनेन ननाजनस्मा नाना।

धातूपसर्गनाम्नां योगेन प्राप्तमपादानं कच्चायन: पृथक् सूत्रेण प्रतिपादयति- धातुनामानमुपसग्गयोगादिस्वपि'इत्यनेन।[765] तत्र धातुयोगे-'धातो: योगे परापूर्वके असह्येऽर्थे गम्यमाने सोऽर्थ अपादानं भवति[766] यथा- बुद्धस्मा पराजेन्ति अञ्ञतित्थिया। प्रपूर्वकस्य च भूधातो: योगे अवच्छिन्ने उत्पादेऽर्थे गम्यमाने तस्य स्रोतोऽपादनम्।[767] यथा- हिमवता पभवन्ति कुन्नदियो। केषाञ्चन नामविशेषाणां प्रयोगे कारकस्य अपादानसंज्ञा भवति।[768] यथा- उरस्मा जातो पुत्तो, उभतो सुजातो पुत्तो मातितो च पितितो च। तथैव उपसर्गाणां योगेऽपि अपादानकारकं भवति[769]- अप सालाय आयन्ति वणिजा, आ ब्रह्मलोका सद्दो अब्भुग्गच्छति। उपरि पब्बता देवो वस्सति। सूत्रे आदिग्रहणेन

---

757 मोग्ग. २/२/२९

758 वज्जने वत्तमानेहि अपपरीहि योगे पञ्चमी होति। तत्रैव, पञ्चिका, पृ.५८

759 मोग्ग. २/२/३०

760 तत्रैव, पञ्चिका, पृ.५९

761 तत्रैव, २/२/३१

762 तत्रैव, २/२/३२

763 तत्रैव, पञ्चिका, पृ.५९

764 तत्रैव, २/२/३३

765 कच्चा. २/६/२

766 जि इच्चेतस्स धातुस्स पपुब्बस्स पयोगे यो असय्हो सो अपादानसञ्ञो होति, तत्रैव, वुत्ति, पृ.१२२

767 भू इच्चेतस्स धातुस्स पपुब्बस्स पयोगे यतो अच्छिन्नप्पभवो सो अपादानसञ्ञो होति। तत्रैव, वुत्ति, पृ.१२२

768 नामप्पयोगे पि तं कारकं अपादानसञ्ञं होति। तत्रैव, वुत्ति, पृ.१२२

769 उपसग्गयोगादिस्वपि च तं कारकं अपादानसञ्ञं होति। तत्रैव, वुत्ति, पृ.१२३

चकारग्रहणेनापि कच्चायन: कारकमध्ये पञ्चमीविभक्तिम् प्रतिपादयति[770]- इतो पक्खस्मा विज्झति मिगं लुद्दको, इतो कोसा विज्झति कुंजरं, मासस्मा भुञ्जति भोजनं। अपिग्रहणेन निपातयोगे पञ्चमी-द्वितीया-तृतीया: भवन्ति विकल्पेन।[771] यथा- रहिता मातुजा पुञ्ञं कत्वा दानं देति, रहिता मातुजं, रहितेन मातुजेन वा। रिते सद्धम्मा कुतो सुखं भवति, रिते सद्धम्मं, रिते सद्धम्मेन वा। तेभिक्खू नाना कुला पब्बजिता, नाना कुलं, नाना कुलेन वा। विना नाना योगेऽपि तथैवोदाहरणानि दीयन्ते वुत्तौ। एतदतिरिच्य चकारेण अन्येष्वप्यर्थेषु पञ्चमीविधानं क्रियते।[772] यथा- यतोहं भगिनि अरियाय जातिया जातो, यतोहं सरामि अत्तानं, यतो पत्तोस्मि विञ्ञुतं, यत्वाधिकरणमेनं अभिज्झादयो पापका अकुसलधम्मा अन्वास्सवेय्युं। 'रक्खणाथानमिच्छितं'[773] इति रक्षणार्थकधातूभि: 'रक्ख-पाल-गुप-पा' इत्येवमादीनां योगे इष्टस्य कारकस्य अपादानसंज्ञा भवति।[774] यथा- काके रक्खन्ति तण्डुलानि, यवा पटिसेधेन्ति गावो। 'येन वादस्सनं'[775] इति यस्मात् अदर्शनमिष्यते तत् कारकमपादानसंज्ञं स्यात्।[776] यथा- उपाज्झाया अन्तरधायति सिस्सो, मातरा पितरा च अन्तरधायति पुत्तो। वाशब्देन च सप्तमीविभक्ति: अपि उच्यते[777] जेतवने अन्तरहितो, वेलुवने अन्तरहितो भगवा। अन्येष्वपि केषुचिदर्थेषु कारकस्यापादानसंज्ञां प्रतिपादयति कच्चायन:- 'दूरान्तिकद्धकालनिम्माणत्वालोपदिसायोगविभत्तारप्पयोगसुद्धप्पमोचनहेतुविवित्तपमाण पुब्बयोगबन्धनगुणवचनपञ्हकथनथोककत्तूसु च'[778] इति सूत्रेण। अत्र-दूरार्थे, समीपार्थे, अध्वपरिच्छेदे, कालपरिच्छेदे, कर्माधिकरणसम्बन्धीनि त्वालोपे, दिशायोगे, विभागे, आरतिशब्दप्रयोगे, शुद्धार्थे, प्रमोचनार्थे, हेत्वर्थे, विभागार्थे, प्रमाणार्थके पुब्बशब्दयोगे,

---

[770] आदिग्गहणेन कारकमज्झेपि पञ्चमी विभत्ति होति। तत्रैव, वुत्ति, पृ.१२३

[771] अपिग्गहणेन निपातयोगेपि पञ्चमी विभत्ति होति, दुतिया च ततिया च। तत्रैव, वुत्ति, पृ.१२३

[772] चसद्दगहणेन अञ्ञथापि पञ्चमी विभति होति। तत्रैव, वुत्ति, पृ.१२३

[773] कच्चा, २/६/३

[774] रक्खणत्थात्थकधातूनं योगे यं इच्छितं तं कारकं अपादानसञ्ञं होति। तत्रैव, वुत्ति, पृ.१२४

[775] कच्चा. २/६/४

[776] येन वा अदस्सनमिच्छति तं कारकं अपादानसञ्ञं होति।

[777] वाति किमत्थं? सत्तमीविभत्त्यत्थं। तत्रैव, वुत्ति, पृ.१२४

[778] कच्चा. २/६/५

बन्धने, गुनकथने, प्रश्ने, कथने, स्तोके, कर्तृभिन्नाद्यर्थानां प्रयोगे च कारकमपादानसंज्ञकं भवति।[779] यथा- दूरं गामा, गामं, गामेन वा। अन्तिकं गामा गमं गामेन वा। इतो मधुराय। इतो भिक्खवे। इत्यादौ। चकारग्रहणेन अन्यत्रापि क्वचित् अनुपदिष्टपसङ्गेष्वपि अपादानस्य प्रवृत्तिरिति।[780]

धर्मकीर्ति: बालावतारे अपादानस्य इमानि विधानानि यथावत् प्रतिपादयति समर्थयति च विशेषव्याख्यानं विना।[781] कच्चायन: कारणत्थे[782] इति पञ्चमी विधानं करोति चकारेण तृतीया च।[783]

मोग्गल्लान: 'सत्तम्याधारे'[784] इति आधारे कारके सप्तमीविधानं करोति। आधारं स्पष्टयति पञ्चिकायां यत् 'किरियाधारभूतकत्तुकम्मानं धारणेन यो किरियाधारो'[785] अर्थात् क्रियाया: कर्तृकर्मणो: धारणेन य: क्रियाया: आधार: स आधारकारकमिति। यथा कटे निसीदति, थालियं ओदनं पचति, आकासे सकुणा, तिलेसु तेलं, गंगायं वज्जो। आधारार्थे कच्चायनेन ओकाससंज्ञा कृता अस्ति- 'योधारो तमोकासं'[786] आधारस्य चतुरो भेदान् स्वीकरोति असौ-व्यापक:, औपश्लेषिक:, वैषयिक:, सामीपश्च। यथा क्रमश:- जलेसु खीरं। परियङ्के राजा सेति। भूमीसु मनुस्सा चरन्ति। वने हत्थिनो चरन्ति।[787] आधारार्थे धर्मकीर्ति: प्रतिष्ठा (पतिट्ठा) शब्दं प्रयुनक्ति। तदनुसारं 'य: क्रियाया आश्रयभूतस्य कर्तु:

---

[779] दूरत्थे अन्तिकत्थे अद्धनिम्माणे कालनिम्माणे त्वालोपे दिसायोगे विभत्ते आरप्पयोगे सुद्धत्थे पमोचनत्थे विवित्तत्थे पमाणे पुब्बयोगे बन्धने गुणवचने पञ्हे कथने थोके अकत्तरि इच्चेतेस्वत्थेसु पयोगेसु तं कारकम् अपादानसञ्ञं होति। तत्रैव, वुति, पृ.१२५

[780] चसद्दगहणेन सेसेस्वपि यो मया नोपदिट्ठा अपादानपयोगिका ते पयोगविचक्खणेहि योजेतब्बा।

[781] बालावतार:, कारकप्पकरणं, पृ.२०४-२०९

[782] कच्चा. २/६/२६

[783] कारणत्थे च पञ्चमी विभत्ति होति, तत्रैव, वुति, पृ.१४३

[784] मोग्ग. २/३६

[785] तत्रैव, पञ्चिका, पृ.६०

[786] कच्चा. २/६/८

[787] यो आधारो तं ओकाससञ्ञं होति। स्वाधारो चतुब्बिधो व्यापिको, ओपसिलेसिको, वेसयिको, सामीपिकोति। तत्थ व्यापिको ताव-जलेसु खीरं, तिलेसु तेलं, उच्छुसु रसो; ओपसिलेसिको-परियङ्के राजा सेति, आसने उपविट्ठो सङ्घो; वेसयिको-भूमिसु मनुस्सा चरन्ति, अन्तलिक्खे वायू वायन्ति, आकासे सकुणा पक्खन्दति; सामीपिको-वने हत्थिनो चरन्ति, गंगायं घोसो तिट्ठति, वजे गावो दुहन्ति, सावत्थियं विहरति जेतवने। तत्रैव, वुत्ति, पृ. १३५.

कर्मण: वा प्रतिष्ठास्थानं तत् ओकासं (अधिकरणं) भवति।[788] 'ओकासे सत्तमी'[789] इति कच्चायन: ओकासकारके सप्तमीविधानं करोति।[790] तत्र हि धर्मकीर्ति: चतुरो आधारभेदान् परिगणयति कारिकया-

'ओपसिलेसिक-विसयाभ्यास-व्यापिकभेदा चतुधाधारो।
वारि घटेसु च सलिले मच्छा, सस्सं नदियं, तिलेसु तेलं॥'[791]

पुन: सप्तमीप्रतिपादने प्रथमं 'निमित्ते'[792] इति सूत्रेण निमित्तेऽर्थे सप्तमी विधीयते।[793] कच्चायन: इदं विधानं 'कम्मकरणनिमित्तत्थेसु सत्तमी'[794] इति सूत्रे प्रतिपादयति। अनेन कर्मण्यर्थे करणेऽर्थे निमित्ते च अर्थे वाच्यसप्तमी विभक्ति: स्यात्। धर्मकीर्ति: उदाहरणविवरणे कर्तरि अर्थेऽपि स्वीकरोति-[795] कर्तरिं (गह-चुबि-अभिवादनयोगे)- बाहुसु गहेत्वा, मुट्ठिसु चुम्बित्वा। कर्मणि- सुदरावुसो इमे आजीविकाभिसुसु अभिवादेन्ति, हत्थेसु पिण्डाय चरन्ति, पत्तेसु पिण्डाय चरन्ति, पथेसु गच्छन्ति, निमित्ते- दीपी चम्मेसु हञ्ञते, कुञ्जरो दन्तेसु हञ्ञते। यब्भावो भावलक्खणं[796] इति क्रियया क्रियान्तरे लक्षिते सप्तमीविधानं करोति मोग्गल्लान:।[797] यथा गावीसु दुय्हमानासु गत: दुद्धासु आगत:। कच्चायन: अत्र 'कालभावेसु च'[798] इति सूत्रं करोति। तदनुसारं कालवाचकेन क्रियाशब्देन

---

[788] यो क्रियानिस्सयभूतानं पतिट्ठा तं ओकासं जेतवने। बालावतार:, कारप्पकरणं, पृ.२१३

[789] कच्चा. २/६/३२

[790] ओकासकारके सत्तमी विभत्ति होति। गम्भीरे ओदकण्णवे, पापस्मिं रमति मनो, भगवति ब्रह्मचरियं वुस्सति कुलपत्तो। तत्रैव, वुति, पृ.१४५

[791] बालावतारे, कारकप्पकरणं, पृ.२/३

[792] मोग्ग. २/३६

[793] निमित्तत्थे सत्तमी होति। अजिनम्हि हञ्ञते दीपी, मुसावादे पाचित्तियं। तत्रैव, पञ्चिका, पृ.१०

[794] कच्चा. २/६/४०

[795] बालावतार:, कारकप्पकरणं, पृ.२१३

[796] मोग्ग. २/३६

[797] यस्स भावो भावन्तस्स लक्खणं होति ततो सत्तमी होति।..........भावोति किं? यो हि जटाहि सो भुञ्जति। भावलक्खणं ति किं? यो भुञ्जति सो देवदत्तो। तत्रैव, पञ्चिका, पृ.६०

[798] कच्चा. २/६/४३

च क्रियान्तरस्य उपलक्षणे कर्त्तरि प्रयुज्यमाने सप्तमी विभक्ति: भवति।[799] यथा पुब्बण्हसमये गतो, भिक्खुसङ्घेषु भोजियमानेसु गतो इत्यादय:। रूपसिद्धौ कालभावयो: विशेषं व्याख्यानं प्रस्तुतमत्र कच्चायनसूत्रे- 'कालो नाम निमेस-खण-लव-मुहुत्त-पुब्बण्हादिको; भावो नाम किरिया सा चेत्थ किरियान्तररूपलक्खणा व अधिप्पेता। तस्मिं कालत्थे च भावलक्खणे भावत्थे च लिङ्गम्हा सत्तमी विभत्ति होति। काले-पुब्बण्णसमये गतो। भावेन भावलक्खणे-भिक्खुसङ्घेसु भोजियमानेसु गतो।[800] वण्णनाकारोऽपि सूत्राभिप्राये चर्चां विशदयति-'कालत्थेव भावेन भावलक्खणेव सत्तमी विभत्ति होती त्यत्थो। काले-पुब्बण्हसमये गतो। भावेन भावलक्खणे लक्खणं लक्खणवन्तो, लक्ख्यं, लक्ख्यवन्तो ति चत्तारि अङ्गानि होन्ति। तेसु भोजियमानेसू ति लक्खणं भिक्खुसङ्घेसू ति लक्खणवन्तो, गतो हि लक्ख्यं, जनो ति लक्ख्यवन्तो। एवं सेसेसूपि। एत्थ च लक्खणं किरियाय भावप्पधानतो इमिना सुत्तेन सत्तमी भवति भोजियमानेसु इति इदं; तस्मिं सिद्धे तेन सहचारितत्ता तेनेव सुत्तेन लक्खणवन्तो पि सिज्झति तथा भिक्खुसङ्घेसु ति। एवं सेसेसु पि'।[801] धर्मकीर्तिरपि भावं क्रियात्वेन प्रतिपादयन् सूत्रार्थं स्पष्टयति।[802]

तादृशे भावलक्षणे अनादरे गम्यमाने सप्तम्या सह षष्ठी अपि विकल्प्यते मोग्गल्लानस्य सूत्रेण - 'छट्ठी चानादरे'[803] इति। कच्चायन: 'अनादरे च'[804] इति सूत्रेण शास्त्रमिदं सूत्रयति। धर्मकीर्ति: इदं सूत्रं न व्याचष्टे।

अत्रैव सूत्रे पञ्चिकायां मोग्गल्लान: केषुचिदन्येष्वपि अर्थेषु सप्तम्या सह विकल्पेन षष्ठीविधानं प्रस्तौति[805]- 'गुन्नं सामीति सम्बन्धे छट्ठी, गोसु सामीति विसयसत्तमी एवं

---

[799] कालभावेसु च कत्तरि पयुज्जमाने सत्तमी विभत्ति होति।........गोसु दुय्हमानासु गतो। दुद्धासु आगतो। तत्रैव, वुत्ति, पृ.१४७-१४८

[800] तत्रैव, रूपसिद्धि, पृ.१४८

[801] तत्रैव, वण्णना, प्.१४८

[802] भावोऽत्र क्रिया। कालत्थे भावत्थे च सत्तमी होति। पुब्बण्हसमये गतो। सङ्घेसु भोजियमानेसु गतो। एत्थ सङ्घानं भोजनकिरियाय कस्सचि गमनकिरिया लक्खियति। बालावतारो, कारकप्पकरणं, पृ.२१४

[803] मोग्ग. २/३७, यस्स भावो भावान्तरस्स लक्खणं भवति ततो छट्ठी भवति सत्तमी चानादरे गम्यमाने- आकोट्यन्तो सो नेति सिविराजस्स पेक्खतो। मच्चु गच्छति आदाय पेक्खमाने महाजने॥ तत्रैव, पञ्चिका, पृ.६१

[804] कच्चा. २/६/३५. अनादरे च छट्ठी विभत्ति होति सत्तमी च। रूदतो दारकस्स पब्बपि, रूदन्तस्मिं दारके पब्बजि। चसद्दग्गहणं छट्ठीसत्तमीग्गहणनुकड्ढनत्थं। तत्रैव, वुत्ति. पृ.१४६

गुन्नमिस्सरो गोसिस्सरो, गुन्नं अधिपति गोसु अधिपति, गुन्नं दायादो गोसु दायादो, गुन्नं सक्खि गोसु सक्खि। गुन्नं पतिभू गोसु पतिभू, गुन्नं पसुतो गोसु पसुतो, कुसला नच्चगीतस्सा कुसला नच्चगीते,[806] आयुतो कटकरणस्स आयुत्तो कटकरणे। तथाधारवचनिच्छायं सत्तमी- भिक्खसु अभिवादेन्ति, मुद्धनिचुम्बित्वा, बाहासु गहेत्वा, हत्थेसु पिण्डाय चरन्ति, पथेसु गच्छन्ति, कदलीसु गजे रक्खन्तीति। जाणस्मिं पसन्नोति-करणे ततिया; एवं ञणस्मिं उस्सुको नाणेन उस्सुकोति'।[807]

कच्चायन: एषु अर्थेषु पृथक् सूत्राणि प्रणयति। तेषां पञ्चम्यत्थे च। उपाध्यधिकिस्सरवचने। मण्डितुस्सुकेसु ततिया च। इति त्रयाणां विवरणं व्याख्यानं च करोति।[808]

'यतो निद्धारणं'[809] इति निर्धारणेऽर्थे षष्ठीसप्तम्यौ विकल्पेन प्रतिपाद्येते मोग्गल्लानेन। तत्र निर्धारणं नाम समुदायात् जातिगुणक्रियाधारेण भागविशेषस्य पृथक्करणं भवति। तत्रेदं विधानमिति।[810] कच्चायन: 'निद्धारणे च'[811] इति इदं विधानं प्रतिपादयति। धर्मकीर्ति: तत् कारिकया विशदयति-

यं हि जातिगुणक्रियानामेहि समुदायतो।
पुथुक्करणमेकस्स तं निद्धारणमब्रुवुं॥[812]

---

805 मोग्ग. पञ्चिका-२/३७, पृ.६१

806 कच्चायन: अत्र पृथक् सूत्रयति- सामिस्सराधिपतिदायादसक्खिपतिभूपसूतकुसलेहि च। कच्चा. सू. २/६/३३., छट्ठी च, कच्चा. सू. २/६/३८ अनेनापि विकल्प:- ततीया सत्तमीनं च अत्थे क्वचि छट्ठी विभत्ति होति। कतो मे कल्याणो, कतं मे पापं- एवं ततीयत्थे कुसला नच्चगीतस्स सिक्खिता चतुरित्थियो, कुसलो त्वं रथस्स अङ्गपच्चङ्गस्स-एवं सत्तम्यत्थे। तत्रैव, वुत्ति, पृ.१४६.

807 अत्रापि कच्चायनस्य पृथक् सूत्रम्- 'मण्डितुस्सुक्केसु ततिया च' कच्चा. सू. २/६/४५ मण्डित-उस्सुक्क इच्चेतेस्वत्थेसु च ततिया विभत्ति होति सत्तमी च। ञाणेन पसीदितो, भाणस्मिं वा पसीदितो; ञाणेन उस्सुक्को, ञाणस्मिं वा उस्सुको तथागतो वा तथागतगोत्तो वा तथागतसावकोवा।

808 बालावतार:, कारकप्पकरणं, पृ.२१३-२१४.

809 मोग्ग. २/३८

810 जातिगुणकिरियाहि समुदायतेकदेसस्स पुथक्करणं निद्धारणं यतो तं करीयति ततो छट्ठी सत्तमियो होन्ति-सालियो सूकधञ्ञानं पथ्यतमा, शालियो सूकधञ्ञेसु पथ्यतमा, कण्हा गावीनं सम्पन्नखीरतमा, कण्हा गावीसु सम्पन्नखीरतमा, गच्छतं धावन्तो सीघतमा, गच्छन्तेसु धावन्तो सीघतमा, सीलमेव सुता सेय्याति-अवधिम्हियेव पञ्चमी। तत्रैव, पञ्चिका, पृ.६२

811 कच्चा. २/६/२४

812 बालावतारे, कारकप्पकरणं, पृ.२११

सप्तम्यनन्तरं मोग्गल्लान: 'पठनात्थमत्ते'[813] इति प्रातिपदिकार्थमात्रबोध्ये प्रथमाविभक्तिं विदधाति।[814] यथा- रूक्खो, इत्थी, पुमा। कच्चायन: 'लिङ्गत्थे पठमा'[815] इतिरूपेण प्रातिपदिके प्रथमां सूत्रयति। तदनुसारं प्रातिपदिकार्थस्य अभिधानमात्रे प्रथमाविभक्ति: स्यादिति।[816] यथा- पुरिसो, एको, द्वे, चे, वा, आह, हे, रे, हरे, अरे इत्यादय:। रूपसिद्धिकार: प्रातिपदिकार्थ एव लिङ्गर्थ इति प्रतिपादयति। तदनुसारं जिनवचनोक्तै: प्रातिपदिकै: सह विभक्तय: भवन्ति। वण्णाकार: लिङ्गर्थं स्पष्टयति व्याख्यया 'लीनं अङ्गंति लिङ्गं, लीनं ति अपाकटं अवयवो। एत्थ च पुरिसोति आदीनं निप्फन्नपदानं पुरिस इति विभत्तिरहितं अवयवभूतं पकतिरूपं अनिफन्नता अपाकटं, तस्स निप्फन्नपदस अवयवत्ता च अङ्गं। इमिना निप्फन्नपदस्स अवयवभूतं पुरिस इति पकतिरूपं लिङ्गं ति वुत्तं। एत्थ च अत्थो नाम सजीवसन्तानेसु उतुजकलापसन्ततिप्पबन्धनविसेसाकारेन पवत्तमाने वत्थुधम्मे उपादाय पञ्ञापियमाने पुरिसघटपटादिवोहारत्थो च.....इमिस्स पन अत्थस्स दीपकं पुरिसत्यादिकं अनिप्फन्नपदं लिङ्गं नाम'।[817]

अयं लिङ्गर्थ: द्विविध: स्वीक्रियते-संसृष्टार्थ: शुद्धार्थश्च। जिनो इत्यादय: शुद्धार्था: तथा जितेन्द्रियादयश्च संसृष्टार्था:। पुरिसो पुरिसा आदय: शुद्धा: लिङ्गार्थवाचका: सन्ति। वण्णनाकार: प्रथमाया: दशविधानर्थान् प्रतिपादयति। किन्तु केषुचित् सन्दर्भेषु अन्येऽर्था: अपि संभवन्ति इति स्पष्टयति।[818] संबोधनेऽर्थेऽपि प्रथमाविधानं करोति मोग्गल्लान

---

[813] मोग्ग. २/३९

[814] नामस्माभिधेय्य मत्ते पठमा विभत्ति होति- रूक्खो, इत्थी, पुमा; नपुंसकं ति लिंगम्पि सद्दथोव, तथा दोणो खारी अळहकं ति परिमाणम्पि सद्दत्थोव, एको द्वे बहवोति संख्यापि सद्दत्थोव। तत्रैव, पञ्चिका, पृ.६२

[815] कच्चा. २/६/१४

[816] लिंगत्थाभिधानमत्ते पठमाविभत्ति होति। तत्रैव, वुत्ति, पृ.१३८

[817] तत्रैव, वण्णना, पृ.१३८

[818] अयं च पठमा विभत्ति लिंगत्थे, कत्त्वत्थे, कम्मत्थे करणत्थे सम्पदानत्थे अपादानत्थे साम्यत्थे भुम्मत्थे दिसायोगे आलपनत्थेति दससु अत्थेसु पवत्तति, अथ खो यतो निदानं यत्वाधिकरणं जयं वेरं पसवतीत्यादिसु हत्वत्थे, एत्थ सा तण्हा उप्पज्जमाना उप्पज्जति निविसमाना निविसति निरूज्झमाना निरूज्झतीत्यादिसु लक्खणत्थे पवत्तति; तेसु चत्थेसु करणत्थादिसु पञ्चम्यत्थेसु च हेत्वत्थे लक्खणेसु च इध सुत्ते अत्थग्गहणेन पठमा विभत्ति होति।

'आमन्त्रणे'[819] इति सूत्रेण। तदनुसारम् उपस्थितस्य शब्देनाभिमुखीकरणम् आमन्त्रणं भवति तत्र प्रथमा[820] यथा- भो पुरिस, भो इत्थी, भो नपुंसक इतिवत्।

कच्चायन: अत्र विषये 'आलपने च'[821] इतिवत् सूत्रयति। तदनुसारं सबोधनस्य आधिक्ये सति लिङ्गार्थस्य अभिधानमात्रे प्रथमा विभक्ति: स्यात्।[822] यथा- भो पुरिस, भवन्तो पुरिसा, भो राज, भवन्तो राजानो, हे सखे, हे सखिनो। अस्य शास्त्रे आलापनस्य 'गे' इति शास्त्रीयसंज्ञाऽपि उपलभ्यते सूत्रेषु- 'भो गे तु' तथा सिपि: इत्यादि 'सेसतो लोपं गसिवि' इत्यादिवत्।[823] धर्मकीर्ति: कच्चायनं समर्थयति अत्र।[824]

सम्बद्धस्यापि अत्र क्रमे 'छट्ठी सम्बन्धे'[825] इति सूत्रेण प्रतिपादनं क्रियते। तदनुसारं क्रियाकारकयो: य: अस्येदमिति भाव: स: सम्बन्ध: भवति। तत्र च षष्ठी विभक्ति: उच्यते- 'किरिया कारकसञ्ञातो अस्सेदम्भावहेतुको सम्बन्धो नाम तस्मिं छट्ठी विभत्ति होति- रञ्ञो पुरिसो, सरति राजस्साति-सम्बन्धे छट्ठी, रज्जसम्बन्धिनिं सति करोति अत्थो।[826] कर्मविवक्षायां द्वितीयैव तत्र इति- सरति रज्जं इतिवत्।[827]

कच्चायन: 'यस्स वा परिग्गहोतं सामी'[828] इति सम्बन्धसूत्रं करोति। तदनुसारं यस्य परिग्रह: भवति: सामी (स्वामी)[829] इति। तत्र च 'सामिस्मिं छट्ठी'[830] इति षष्ठीविधानम्। यथा तस्स भिक्खुनो पटिविंसो, तस्स भिक्खुनो मुखं। तस्स भिक्खुनो पत्तचीवरं इत्यादय:।

---

819 मोग्ग. २/४०.

820 सतो सद्देनाभिमुखीकरणमामन्त्रणं। तस्मिं विसये पठमा विभत्ति होति। तत्रैव, पञ्चिका, पृ.६२.

821 कच्चा. २/६/१५.

822 आलपनत्थाधिके लिंगत्थाभिधानमत्ते च पठमा विभत्ति होति। तत्रैव, वुति, पृ.१३९

823 कच्चा. २/४/३३

824 बालावतार:, नामप्पकरणं, पृ.८१.

825 मोग्ग. २/४१

826 तत्रैव पञ्चिका, पृ.६३

827 तत्रैव, पञ्चिका, पृ.६३

828 कच्चा. २/६/१३

829 यस्स वा परिग्गहो तं सामिसञ्ञम् होति। तत्रैव, वुत्ति, पृ.१३७

830 तत्रैव, २/६/३१

वण्णनाकार: अत्र 'सं एतेसं अत्थी ति सामी' सामीशब्दस्य अर्थं विवृणोति।[831] धर्मकीर्ति: सम्बन्ध: भूय: स्पष्टयति सम्बन्धं 'यस्स वा परिग्गहो तं सामी' इति सूत्रव्याख्यायाम्। यत् यत्र स्वत्वं, स्वामित्वं, सामीप्यं समूहावयवत्वं वा स्यात् तत् सामीकारकमिति।[832] वा शब्दाच्च अन्येष्वपि केषुचित् षष्ठ्यर्थं विवृणोति। यथा- हेतुयोगे-बुद्धस्स हेतु। सादृश्येऽर्थे-पितुस्स सदिस्सो। अबत्राप्ययोगे (अत्मग्लानौ)- मुसावादस्स ओतप्पं। गुणयोगे-पञ्ञाय पटुभावो। सुहितार्थे-फलानं निन्नो, पूरं हिरञ्ञसुवण्णस्स। निपातान्तरयोगे-वसलस्स कन्था। काले-मासस्स द्विक्खतुं भुञ्जति। रूजधातुयोगे-देवदत्तस्स रूजति। वर्तमाने क्तयोगे कर्तरि-रञ्ञो सम्मतो इतिवत्।[833] धर्मकीर्ति: सम्बन्धविषये विस्तृतां चर्चां प्रस्तौति कारिका चतुष्ट्येन-

'एते सम्बन्धिनो द्वे'ति यस्मात्था बुद्धि जायते।
सम्बन्धो नाम सो अत्थो सम्बन्धिद्वयनिस्सितो॥
सम्बन्धिद्वये विसेस्सो कोचि, कोचि विसेसनं।
कं वुद्दिस्स क्रियं तेसं सम्बन्धो सो पवत्तते॥
छट्ठी द्विट्ठो ति सम्बन्धो भेदकस्मा च जायते।
जाता पि सा विसेस्सम्हा सम्बन्धं न वदे यतो॥
सद्दसत्तिसभावोऽयमिति एत्थ पतीयते।
पतीतिमत्तं निक्कम्म होति सद्दत्थसठ्ठिति॥[834]

सम्बन्धमसौ अनेकविधं प्रतिपादयति-जन्यजनकवाच्यवाचकविकारविकारिपरिणामपरिमेय्यपूरणपूरित इत्यादीनामिव। यथा-रञ्ञो पुत्तो' इत्यत्र जननक्रियाकृत: सम्बन्ध:।[835]

---

831 कच्चा. वण्णना, २/६/१३, पृ.१२८

832 यस्स सं, समि, समीपि, समूहो, अवयवो तं सामि नाम। बालावतार, कारप्पकरणं पृ.२०९

833 तत्रैव, कारकप्पकरणं, पृ.२०९.

834 अर्थात् यस्मादर्थात् अर्थसमूहाद्वा 'एतो सम्बन्धिनो' एवं रूपा बुद्धिर्जायते स सम्बन्ध: उभयनिष्ठ: भवति। तयोश्च सम्बन्धिनो: कश्चित् विशेष्यं भवति कश्चिद्विशेषणम्। तयोश्च स सम्बन्ध: क्रियाविशेषेण सम्बद्धो भवति। यद्यपि सम्बन्ध: उभयनिष्ठ: भवति तथाप्यसौ विशेषणादुत्पद्यते तत्र षष्ठ्यां सत्यामपि स विशेषणेन स सम्बन्द्ध्यते। इयं विशेषता शब्दशक्तेरेव प्रकृति: बोद्धव्या। सिद्धान्तत: प्रतीतिमात्रेऽपि शब्दार्थयो: संस्थानं (निश्चय☺ भवति। तत्रैव, कारकप्पकरणं, पृ.२१०

मोग्गल्लान: पञ्चिकायां कृदन्तप्रयोगे कर्तृकर्मणो: सम्बन्धस्य विवक्षायां बहुलं षष्ठी भवति इति प्रतिपादयति।[836] यथा साधु सम्मतो बहुजनस्स, सुपरिविद्धो बुद्धानं धम्मधातु:; धमस्सगुत्तो मेधावी इत्यादिवत्।

'तुल्यत्थेन ततिया वा'[837] इति तुल्यार्थयोगे तृतीयां षष्ठीं च विकल्पेन प्रतिपादयति।[838] यथा तुल्यो पितु, तुल्यो पितरा। सदिसो पितु, सदिसो पितरा।

---

[835] तत्रैव, कारकप्पकरणं, पृ.२१०

[836] मोग्ग. पञ्चिका २/४१, पृ.६४

[837] मोग्ग. २/४२

[838] तुल्यत्थेन छट्ठी होति ततिया वा, तत्रैव, पञ्चिका, पृ.६४

पञ्चमोऽध्यायः

# उभयभाषयोः दर्शनपरम्परासु कारकार्थव्याख्यानम्

- संकृतव्याकरणदर्शने कारकार्थः
- बौद्धशास्त्रीयशाब्दबोधे कारकार्थः

कर्तृकारके दार्शनिकव्याख्यानम् –

कारकचक्रे भवानन्द सिद्धान्तवागीशः कर्तृकारकस्य वैयाकरणोक्तस्वरूपेण सह असम्मतः सन् नाविन्येन तद्व्याख्याति । क्रियाश्रयत्वं कारकत्वम् इति वैय्याकरणानां लक्षणस्य समीक्षया असौ प्रवचनम् आरभते । तन्मतेन एतल्लक्षणानुसारं क्रियापदेन कर्तृवाच्ये कर्तुः बोधः भवति । उदाहरणत्रितयेन असौ विवृणोति-पचति, जानाति, नश्यति इत्यनेन । तत्र पच् धातोः पचति शब्दः व्युत्पद्यते । पाककर्मणि च नैकविधव्यापाराः समाविश्यन्ते । मुख्यतया च पाकः विक्लितिरूपेण परिणतः भवति । भवानन्दानुसारं पचति इति क्रियापदेन विक्लितिजनकव्यापारस्य आश्रयः बोधितः भवति । तथैव च जानाति क्रियापदेन ज्ञानरूपक्रियाया व्यापारस्य अधिकरणम् उक्तं भवति । किन्तु नश्यति क्रियापदेन च नाशकर्मणः व्यापारस्य अधिकरणं नोच्यते । अत्र कर्ता नाशकर्मणा सम्बद्धः भवति ।[839] इदञ्च एवमपि ज्ञातुं शक्यते-देवदत्तः पचति, रामो जानाति, घटो नश्यति एषु देवदत्तः पच् धातूक्तव्यापारस्य आश्रयः भवति । रामश्च ज्ञाधातूक्तव्यापारस्य आश्रयः भवति । घटस्तु नशधातूक्तव्यापारेण सबद्धः भवति । भवानन्दस्य लक्षणेन क्रियाश्रयत्वं कर्तृत्वमनेन त्रयाणामपि कर्तृत्वं साधितं भवति ।

'काष्ठं पचति' अत्र भवानन्दः स्पष्टयति यत् सामान्येन काष्ठं पच् धातूना सह करणत्वेन प्रयुक्तं भवति किन्तु अत्र कर्तुः विवक्षा अस्ति यत् पच्धातुना काष्ठं कर्तृत्वेन उच्येत इति।[840]

उदाहरणेषु इदं दृश्यते यत् निर्जीवपदार्थाः कर्तृकारक: भवति किन्तु भवानन्दस्य इदं न अभिमतम् । अन्येऽपि वैय्याकरणा: कारकलक्षणं 'कारकान्तराप्रयोज्यत्वे सति कारकान्तरप्रयोजकात्वम् कर्तृत्वम् इति स्वीकुर्वन्ति।[841]

---

[839] करोतीति कर्ता, स्वतन्त्र: क्रियासिद्धावनुगुणत्वेन विवक्षात: क्रियाश्रय इत्यर्थ:, तत्रैव, पृ. ५८

[840] स्वतन्त्रः कर्ता...प्रधानीभूतधात्वर्थाश्रयः कर्ता, सारस्वत, पृ. ९०

[841] स्वतन्त्रः कर्ता इत्यत्रैव ।

भवानन्द अन्ये च नैय्यायिकाः निराकुर्वन्ति ।[842] एतल्लक्षणानुसारं च कर्ता अन्यकारकाणां कार्यं प्रति प्रवर्तकः भवति किन्तु स अन्यकारकैः कार्यं प्रति न प्रवर्त्यते । तत्र भवानन्दः आक्षिपति यत् ईश्वरः सर्वेषां जीवानां भिन्नकार्येषु प्रवर्तकः भवति एतल्लक्षणस्वीकारे च सर्वेषामपि जीवानां कर्तृत्वं हीयेत ।[843]

केचन विद्वान्सः कारकान्तराप्रयोज्यत्वं भिन्नतया व्यचक्षाणा: वदन्ति यत् एतदनुसारं कर्ता क्रियायाम् अन्यकारकाणां व्यापारस्य आश्रयः न भवति ये क्रियया कर्तुरभिप्रायं साधयन्ति।

इदमपि मतं निराकरोति भवानन्दः तदनुसारं एवं स्वीकृते तु कुम्भाकारस्य घटं प्रति कर्तृत्वं न सिध्यति । यतः कुम्भकारः दण्डेन चक्रं भ्रमयति, दण्डचक्रयोः सम्बन्धश्च घटरूपं कर्म जनयति । अस्य सम्बन्धस्य आश्रयः कुम्भकारः न भवति अतः कुम्भकारस्य कर्तृत्वं हीयते तच्च अनिष्टं भवति ।[844]

भवानन्द: स्वीयं कर्तृलक्षणं प्रतिपादयति – अनुकूलकृतिमत्त्वं कर्तृत्वमिति' अर्थात् क्रियया इष्टस्य कर्मणः अनुकूलायाः कृतेः आश्रयः कर्ता भवति । कर्तृशब्दे कृधातोः अर्थं यत्नं स्वीकरोति असौ, तच्प्रत्ययस्य च अधिकरणम् ।[845] भवानन्दः स्पष्टयति यत् अनया व्युत्पत्या कर्तुः सजीवत्वं निश्चितम् आपद्यते, निर्जीवानां कर्तृत्वं गौणतया स्वीकर्तुं शक्यते ।[846] न्यायशास्त्रसम्मतमिदं कर्तृव्याख्यानम् उत्तरवर्तिनः नैय्यायिकाः समर्थनं कृतवन्त: ।

सारमञ्जरीकारः भवानन्दोक्तं कर्तृलक्षणं सुत्तरां समर्थयति तस्य च लक्षणं किञ्चित् परिमृज्य प्रस्तौति – 'क्रियानुकूलकृतिमत्वं कर्तृत्वम्' इतिवत् । भवानन्दस्य मुख्य-गौणकर्तृसिद्धान्तं समर्थयत्यसौ ।[847]

जगदीशतर्कालङ्कारः शब्दशक्तिप्रकाशिकायां वदति यत् कर्तृवाच्ये क्रियापदेन उक्तः कर्ता भवति ।[848] यथा पचति जानाति इत्यादौ । 'पचति' इत्यनेन पाकक्रियायै यत्नस्य आश्रयः उक्तः भवति, स च पाकस्य कर्ता भवति । देवदत्त पचति अत्र च पचति क्रियया देवदत्तः उक्तः भवति । तथैव नश्यति इत्यत्र प्रतिबिम्बते इत्यत्र च नाशव्यापारसम्बन्धा: पुरुषः

---

[842] सुपद्म, पृ. ५९

[843] तत्रैव, पृ. ६१-६२

[844] हरिनामामृतम् सू. ९६४

[845] तत्रैव, पृ. ३७९-३८४

[846] क्रियासिद्धौ यः स्वतन्त्रः सः कर्ता...कर्तृप्रयोजकौ हेतुः कर्ता । प्रयोगरत्नमाला, पृ. ४१३-४१५

[847] तत्रैव, पृ. ४१३-४१५

[848] तत्रैव, पृ. ४१३

प्रतिबिम्बनव्यापारविशेष्यकं मुखं कर्तृत्वेन उक्ते भवतः ।[849] मुखस्य प्रतिबिम्बं भासमानं कर्ता भवति ।

प्रथमदृष्ट्या इदं प्रतीयते यत् जगदीशः भवानन्देन कारकचक्रे चर्चितं वैय्याकरणसम्प्रदायस्य कर्तृलक्षणं 'क्रियाश्रयत्वं कारकत्वम्' इत्येनमनुसरति । जगदीशः स्पष्टतया इदं निराकरोति यत् इदं तस्य न मतम् । स लक्षणोक्तं क्रियाशब्दमधिकृत्य वैय्याकरणानां मतत्रयं प्रस्तूय तन्निषेधयति । तत्र एके वैय्याकरणाः क्रियाशब्दं गत्यर्थकत्वेन मन्वते । जगदीशानुसारम् एतस्मिन् मते स्वीकृते लक्षणस्य कर्मणि अतिव्यातिः भवति । यतः पाककाले गतिस्तु तण्डुलेष्वपि लक्षितुं शक्यते । ओदनरूपमपि कर्म गतिरूपक्रियायाः आश्रयभूतं कर्तृत्वमापद्येत इति । अन्ये वैय्याकरणाः क्रियाशब्दं धात्वर्थबोधकं स्वीकुर्वते । जगदीशमतेन तथा सति क्रियायाः आश्रयः भजेयुरिति अनिष्टं नैयायिकानाम् । तृतीयामते च वैय्याकरणाः कर्मणः उत्पत्यनुकूलं व्यापारं क्रियाशब्देन गृह्णन्ति । जगदीशानुसारं एवं सति तु सर्वेषामपि कारकाणां कर्तृत्वं भवति । अन्ततः असौ नैय्यातिकसम्मतं कर्मणः उत्पत्यनुकूलकृतिमतं एव कर्तारं स्वीकरोति ।[850]

गदाधरभट्टाचार्यः व्युत्पत्तिवादे पूर्वप्रतिपादितानां कर्तृलक्षणानां समीक्षां करोति । स च नैय्यायिक सम्मतं लक्षणं समर्थयति अन्ये दूषयन्ति । कर्तुश्च सजीवताम् अनिवार्यां निर्धारयति । तन्मतेन पूर्वोक्तं क्रियानुकूलकृतिमत्वमेव युक्तियुक्तं कर्तृत्वम् ।[851] भवानन्दस्य व्युत्पत्तिप्रतिपादितेन तर्केण गदाधरः सजीवस्यैव कर्तृत्वं पोषयति । निर्जीवानां च कर्तृत्वं गौणं वदति ।[852] यथा काष्ठं पचति इत्यत्र वाक्ये काष्ठम् अन्यकारकान् अतिशेते पाककर्मणि अतः तत् कर्ता भवति पाणिनीये न स्वतन्त्रः कर्त्रिति सिद्धान्तेन ।[853]

गदाधरः अन्यतर्केण साधयति यत् कृतिः एव कर्तृत्वनिर्धारणे मुख्या इति । स वदति यत् यदि शत्रुं प्रति निक्षिप्तेन नाराचेन यदि ब्राह्मणः कथंचित् दुर्घटनावशात् हन्यते चेत् क्षेप्तुः क्षेपणक्रियायां कृतेरभावात् ब्रह्महत्यायाः प्रायश्चित्तं न आवश्यकं सत्यपि तस्मिन् ब्रह्मघातीनि ।[854]

---

849 तत्रैव, पृ. ४१५

850 क्रियाश्रयत्वं कर्तृत्वम् इति वैय्याकरणाः..यद्धातूत्तराख्यातेन तत्क्रियाकर्तृत्वम् । तत्रैव, पृ. १३

851 चैवञ्च पचतीत्यादौ..ततत्क्रियाकर्तृत्वम्...यत्नाश्रयबोधकत्वाच्च । तत्रैव, पृ. १३

852 तदा तु तत्पर्यायेण काष्ठं पचतीत्यादौ तेषां कर्तृत्वम् इष्टनेन, तत्रैव, पृ. १३

853 तत्रैव, पृ. १३

854 तत्रैव, पृ. ११-१२

अनेन गदाधर: प्रधानव्यापाराश्रयस्य वैय्यकरणसम्मतस्य कर्तृत्वं निराकरोति । अथ च क्रियानुकूलकृतिमतः कर्तृत्वमेव स्वीकरोति ।

गागाभट्टः भाट्टचिन्तामणौ वैयाकरणस्वीकृतं लक्षणं कर्तृलक्षणं समर्थयति । कारकचक्रोक्तं लक्षणं च समीक्षया अपाकरोति । लक्षणत्रितयस्य परीक्षणं प्रस्तौति स प्रथममते यत्र यत्र क्रियाश्रयः कर्ता उच्यते । द्वितीये च यत्र क्रियया उत्पद्यमान कर्मणः ज्ञानम् इच्छा च यस्य भवति स कर्ता भवति । एतत् मतद्वयं समीक्षमाणः अयं निराकरोति । तदनुसारम् उक्ते लक्षणे कुलं पिपतिषति रथो गच्छति इत्यादि न व्याप्नोति । तृतीयं च विठ्ठलाद्यै समर्थितं मतमस्ति यत्र कर्ता अन्यकारकाणां क्रियां प्रति प्रवर्तकः भवति । उक्तप्रकारकोदाहरणेषु इदमपि लक्षणं न घटते इति अपाक्तं भवति गागाभट्टानुसारम् ।[855] गागाभट्टस्य विवेचने कर्तृकारकमधिकृत्य न्यूनतया एच मौलिकचिन्तनं कृतं दृश्यते ।

## कर्मकारके दार्शनिकव्याख्यानम् –

कारकचक्रे भवानन्द: कानिचन कर्मलक्षणानि समीक्षते तत्र प्रथमं-‘करणव्यापारवत्त्वं कर्मत्वम्’[856] इति। अत्र च अतिव्याप्तिदोषं पश्यति। यत: ‘दात्रेन लुनाति’ इति वाक्ये हस्तरूपकरणेन सह व्यापारवत्त्वात्। दात्रेऽपि कर्मत्वापत्ति: इति निरस्यते इदं लक्षणम्।[857] अन्यत् लक्षणं समीक्षते- ‘परसमवेतक्रियाजन्यफलशालित्वं कर्मत्वम्’। अत्र हि फलशालित्वे भवानन्दस्य आपत्ति:। यथा- ‘देवदत्तो ग्रामं गच्छति’, ‘पर्णं भूमौ पतति’, ‘वृक्षं त्यजति खग:’ इत्यादिषु संयोगवियोगरूपं फलं कर्मण: अन्येष्वपि कारकेषु अनुगतम् अत: तेषामपि फलशालित्वात् तेषु अपि कर्मत्वस्य अतिव्याप्तिरूपा अनिष्टस्थिति:। भवानन्द: लक्षणे किञ्चित् परिवर्तनमिच्छति-फलशालित्वं धात्वर्थावच्छेदकं स्यात् इति।[858] तत्र एके इदं लक्षणं भिन्नतया काङ्क्षन्ते-“तत्क्रियानाधिकरणत्वे सति तत्क्रियावच्छेदकफलशालित्वं कर्मत्वम्।”[859] अनेन कर्म धातूक्तव्यापारभागं पूर्णतया विहार फलभागस्य एव आश्रय: भवति। भवानन्द: नानेन लक्षणेन तुष्ट: अत: स्वीयं नूतनं लक्षणं चक्रे-

---

855 तत्रैव, पृ. १२

856 कर्मत्वन्तु न करणव्यापारत्वम्……………..दात्रेतिव्याप्तम्, का.च.पृ.१६

857 तत्रैव, पृ.१५

858 तत्रैव, पृ.१८

859 तत्रैव, पृ.२४

"यत्तु तत्क्रियानाधिकरणत्वे सति तत्क्रियावच्छेदकफलशालित्वं कर्मत्वं, द्वितीयादेरपि तत्क्रियानाधिकरणत्वम् अर्थ इति तन्न, क्रियाव्यक्तिभेदेनानन्तशक्तिकल्पनापत्ते:।[860]

असौ स्वीयं कर्मकारकलक्षणम् आह- "तत्तद्धात्वर्थावच्छेदकफलशालित्वं तत्तद्धात्वर्थकर्मत्वम्"[861] इति। किन्तु अत्रापि लक्षणगतं दोषं भवानन्द: पश्यति यदनेन मल्ल: आत्मानं गच्छति अथवा मल्लो मल्लं गच्छति अस्यापि साधुत्वमुक्तं भवति तच्च अनिष्टमेव। स च तर्कयति यत् 'परसमवेतम्' इत्यपि अधिकमुच्यते चेत् निर्दुष्टं भवेत् इति।[862] अनेन परिष्कारेण सह भवानन्द: अनेकत्र उदाहरणेषु कर्मकारकं प्रस्तौति-विष्णुं यजते, घृतं जुहोति, गां विक्रीणीते।[863]

कर्मकारकस्य भेदान् विवृण्वान: असौ पूर्वै: स्वीकृतं भेदत्रयं प्रतिपाद्य तद्विशदयति।[864] प्राप्यकर्म प्राय: संयोगादिरूपेष्वेवोत्पद्यते इति तस्य मतम्।[865] विकार्यकर्मण: स्वरूपं सम्बद्धप्रयोगाणां निरूपणमपि उदाहरणै: अनेन कृतम्।[866] निवर्त्यकर्म प्राय: गौणकर्मरूपे एवोत्पद्यते इत्यपि सिद्धान्तितम् अनेन।[867] अस्य उत्पत्तौ प्राप्य-विकार्यकर्मणी इव फलं नोत्पन्नं (भौतिकं) शिष्यते।[868] उत्पन्नकर्मणां भौतिकम् अभौतिकम् इति द्विविधं विभाजनमपि अयमाचार्य: अकरोत्।[869]

सारमञ्जरीकार: जयकृष्णभट्टाचार्य: 'परसमवेतक्रियाजन्यफलशालित्वम्' इति कर्मण: कारकस्य लक्षणमुवाच। यद्यपि कारकचक्रकारेण इदं लक्षणं पूर्वमेव दूषितं, किन्तु

---

860 तत्रैव, पृ.२४

861 तत्रैव, पृ.१८

862 तत्रैव, पृ.२२

863 तत्रैव, पृ.२६-३०

864 तत्रैव, पृ.३७

865 तत्रैव, पृ.३८

866 तत्रैव, पृ.३८

867 तत्रैव, पृ.३८-३९

868 तत्रैव, पृ.३९

869 तत्रैव, पृ.३८

जयकृष्ण: फलशब्दं धातूक्तफलविशेषं मत्वा निर्दोषं स्व्यकरोत्।[870] असौ कर्मकारकस्य भेदानां विवरणे भेदत्रयं हरिप्रतिपादितमेव प्रतिपादितवान्- निर्वर्त्यं विकार्यं प्राप्यञ्च। किन्तु तत्रापि भूय: भेदान् अकरोत् मुख्य-गौणपरिगणनेन। तदनुसारं कर्मलक्षणं मुख्यतया प्राप्यं कर्म एव व्याप्नोति। निर्वर्त्य-विकार्यकर्मणोस्तु लक्षणानुसारं कर्मण: कारणे प्रभाव: उच्यते।[871] अत: तयो: लक्षणव्याप्ति: गौणतया स्वीक्रियेत।[872] भवानन्दस्तु प्राप्यविकार्यकर्मणी मुख्ये निर्वर्त्यकर्म च गौणं स्वीकरोति। अयं विशेष: उभयसिद्धान्तयो:।[873] जयकृष्ण: ईप्सितानीप्सितयो: अकथितकर्मण: भेदविवरणमपि प्रस्तौति स्पष्ततया।[874]

जगदीशतर्कालङ्कार: शब्दशक्तिप्रकाशिकायां न्यायशास्त्रीयपरम्पराया: भिन्नतया व्याचष्टे कर्मकारकम्। तदनुसारं कर्मवाच्ये क्रियापदेन उक्तं कर्मकारकं भवति।[875] तत्र सकर्मकधातुभि: व्यापार: फलञ्चोक्तं भवति। व्यापार: कर्तृसम्बद्ध: भवति फलञ्च कर्मणा सह। कर्मवाच्ये फलस्य कर्मणश्च मध्ये व्याप्त: सम्बन्ध: स्पष्टतयावगन्तुं शक्य:। भवानन्दानुकरणेन जगदीश: धातूनामर्थविश्लेषणेन तासां कर्मण सह सम्बन्धं निश्चिनोति। तत्र गम्-धातो संयोगानुकूलव्यापार:, त्यज्-धातोश्च वियोगानुकूलव्यापार: इति अर्थौ निष्पद्येते। केचित् गम्-धातोरर्थं वियोगानुकूलव्यापारं स्वीकुर्वन्ति तदस्यासम्मतम्।[876] ‘चैत्रो ग्रामं गच्छति’ इति वाक्ये चैत्रग्रामयोर्मध्ये संयोगरूपं फलं गम्-धातुना उक्तं भवति। तत्र व्यापाराश्रयत्वात् चैत्र: कर्ता ग्रामश्च कर्म भवति। तथैव ‘वृक्षं खगस्त्यजति’ इति वाक्ये वृक्षशब्देन वियोगस्य आश्रयभूतत्वात् वृक्ष: कर्म भवति त्यज्धातो: अर्थेन बुद्धम् इति।[877]

---

[870] तत्रैव, पृ.४४-४५

[871] एवं घटं करोतीत्यादौ..........मृत्पिण्डादौ लक्षणा, तत्रैव, पृ.४७

[872] एवं त्रिविधकर्मकारकमध्ये...........निर्वर्त्यं विकार्यञ्च गौणम् इति संक्षेप:, पृ.४९

[873] तत्रैव, पृ.१४८

[874] तत्रैव, पृ.४८

[875] यङन्ताद्धातोरर्थो यस्तिङ्स्वार्थेनुभाव्यते तत्रासौ कर्मता नाम कर्तृतेत्याह, शब्दशक्तिप्रकाशिका, कारिका, ७३

[876] ग्रामो गम्यते इत्यत्र...............संयोगे एवान्वयो, न तु-त्यजादाविव विभागादौ धात्वर्थावच्छेदकस्य इव फलस्य बोधने कर्मविहितप्रत्ययानां, धातुसाकाङ्क्षत्वात् अत: संयोग एव तत्र गतिक्रियाया: कर्मत्वेन विभागादि:.........। तत्रैव, पृ.३१८

[877] वृक्षं खगस्त्यजतीत्यादौ................तद्वान् खग इत्याकारकस्तत्र बोध: तत्रैव पृ.३२१

संयोग-वियोगयोराश्रयद्वयं भवति इति पूर्वमपि चिन्तित: प्रश्न:। किन्तु जगदीश: व्यापारफलयो: आश्रयौ पृथग्भवत: तच्च धात्वर्थादेव ज्ञेयमिति समस्यां निराकरोति।[878]

अन्ये ये लक्षणे परसमवेतादिपदसमावेशेन व्यापार-फलाश्रययो: विभागं काङ्क्षन्ते तदसम्मतं जगदीशस्य। तन्मतेन एतादृशं पदग्रहणं विभक्त्यर्थात् विपरीतमिति। यत: तिङ्विभक्त्यावचनलकारौ द्योत्येते-द्वितीयाविभक्त्या च कर्म द्योतते नान्यत्। अत: परसमवेताद्यर्थग्रहणं निराधारम्।[879] यद्यपि 'चैत्रेन गम्यते द्रव्यम्' चैत्रो द्रव्यं गच्छती'त्यादौ परसमवेतपदग्रहणेन सिद्धिर्भवति किन्तु तन्नावश्यकम् अन्यधातूनां पचति-यजते-आराधयति-जुहोतीत्यादीनाम् अर्थानां विश्लेषणेन जगदीश: कर्मकारकं सुतरां स्पष्टयति।[880] अकथितकर्मसमीक्षणेऽपि असौ गौणकर्मणां धातूक्तफलेन सह सम्बन्धं स्वीकरोति।[881]

गदाधरभट्टाचार्य: व्युत्पत्तिवादे 'क्रियाजन्यफलाश्रयत्वं कर्म' इति लक्षणयति कर्मकारकम्।[882] तदनुसारं फलव्यापारौ धातुना सूच्येते वाक्ये। कर्मकारकेण च 'आधेयता' सूच्यते।[883] कैश्चिदुक्तं लक्षणे परसमवेतादिपदसमावेशं नाङ्गीकरोति गदाधर: जगदीशस्य इव।[884] अकथितकर्मण: प्रतिपादनप्रसङ्गे असौ भाष्योक्तधातूनाम् दुह्याचादीनामर्थं

---

[878] ननु चैत्रकर्तृकगमनजन्यसंयोगस्य ग्राम इव चैत्रेऽपि सत्त्वात् चैत्रकर्तृकागतस्याश्रय-प्रतियोगित्वविशिष्टस्य संयोगस्य चैत्रे बोधात्, तत्रैव, पृ.३१८

[879] यत्तु फलमेव क्रियायाम् अन्वितम्। परसमवेतत्वमपि.................द्रव्यानसमवेतत्वस्य गत्यादेरप्रसिद्धत्वेन अयोग्यतापत्तेश्च। तत्रैव, पृ.३१९-३२०

[880] तण्डुलान् पचतीत्यत्र...........तत्र बोध:। पृ.३१५-३१७

[881] फलावच्छिन्नक्रियाहेतुव्यापारवाचित्वादेव द्विकर्मक:...........यद् वृक्षस्य विघट्टनं चलनं तद्वान् इत्येवं तत्र बोध:। तत्रैव, पृ.३३१-३३२

[882] व्युत्पत्तिवाद:, पृ.१८४

[883] द्वितीयादेराधेयत्वम् अर्थ:, फलावच्छिन्नव्यापारस्य धातोरित्येव युक्तम्, तत्रैव, १९१-१९२

[884] ग्रामं गच्छतीतिवत् स्वं गच्छतीति प्रयोगवारणाय परसमवेतत्वमपि द्वितीयार्थ इष्यते...........स्वनिष्ठसंयोगजनकक्रियायाम् अस्वभिन्नसमवेतत्वस्य बाधात् स्वात्मानं गच्छति इति न प्रयोग:, तत्रैव, पृ.२०७

युक्तियुक्तं विवेचयति।[885] कर्मकारकस्य भेदानां निरूपणं स हरे: अनुकरणेन करोति- निर्वर्त्यम्, विकार्यम्, प्राप्यम् इतिवत्।[886]

गागाभट्ट: भाट्टचिन्तामणौ कर्मलक्षणं प्रतिपादयति- 'क्रियाजन्यफलशालित्वं कर्मत्वमिति।[887] अत्र लक्षणे कृतं पूर्वचिन्तनं यथा लक्षणस्य अतिव्याप्ति: तत्र च जगदीश-गदाधरयो: समाधानम् अपि असौ समर्थयति।[888] कर्मकारकमसौ मुख्यतया भेदद्वये 'ईप्सितानीप्सितयो:' प्रतिपादयति। ईप्सितकर्मञ्च भेदचतुष्ट्यं वक्ति- उत्पाद्य-प्राप्य-विकार्य-संस्कार्यरूपम्। अनीप्सितकर्मविभागे गागाभट्ट: भर्तृहरिमनुसरति।[889]

## करणकारके दार्शनिकव्याख्यानम् –

भवानन्दतर्कवागीशानुसारं फलस्य उत्पत्तौ साक्षात् कारणं करणं भवति । करणमेव फलेन सह साक्षात् सम्बन्धं भवति अन्यकारकाणि न तथा । यथा वृक्षच्छेदने परशुना कृतः व्यापारः छिदां जनयति । यद्यपि व्यापारेण सह सम्बद्धत्वात् परशुः करणत्वेन उच्यते किन्तु गौणं करणं तत् ।[890] असौ करणकारकस्य लक्षणं वदति – 'व्यापारवत् कारणं करणम्'[891] इति । अत्र लक्षणे कर्तृभिन्नमिति पदमप्यूह्यते सम्भवतः हरेः प्रभावात् ।[892]

अस्यलक्षणस्य प्रवृत्तिं भवानन्दः प्रमाणानां व्याख्याने प्रस्तौति । अनुमाने परामर्शरूपव्यापारेण अनुमितिरूपं फलम् उत्पद्यते अतः परामर्शः करणमिति । तथैव व्याप्तिस्मृतिः साध्यं प्रतिकरणं भवति । प्रत्यक्षप्रमाणे चाक्षुषे प्रत्यक्षे इन्द्रियं करणम्, इन्द्रियार्थसंयोगरूपव्यापारेण सम्बध्यते । श्रावणप्रत्यक्षे असौ श्रवणेन्द्रियेण सह मनसः अपि संयोगं प्रतिपादयति श्रवणेन्द्रियशब्दयोः संयोगेन सह ।[893]

---

885 गां दोग्धि पय इत्यादौ ...........अजां ग्रामं नयतीत्यादौ, ग्रामं भारं वहतीत्यादौ च उत्तरदेशसंयोगावच्छिन्नक्रियानुकूलव्यापाररूपं प्रापणम् अर्थ:, तत्रैव, पृ.१९६-२००

886 तत्रैव, पृ.२३७-२४२

887 भाट्टचिन्तामणि, पृ.९६

888 अत्र नैय्यायिका: परसमवेतत्वं क्रियाविशेषणं धात्वर्थत्वावच्छेदकत्वं फलविशेषणं...........इत्याहु:। तत्रैव, पृ.९६

889 तत्रैव, पृ.९६

890 प्रयोगरत्नमाला, पृ. ३८६

891 व्यापारान्याव्यवहितम् फलानाश्रयकारकम्, तत्रैव, पृ. ३८६

892 तत्रैव, पृ. ३८६

893 करणत्वञ्च-कुठारादौ करणपदं गौणमेव, का.च. पृ. ४३-४४

सारमञ्जरीकारः जयकृष्णः करणकारकस्य पाणिनीयं लक्षणमेव स्वीकृत्य तद्व्याचष्टे यत् फलोत्पत्तौ साक्षात् कारणं करणमिति ।[894] अस्य मतं भवानन्देन उद्धृतस्य प्राचीनतार्किकमतेन समानम् अस्ति । उदाहरणद्वयेन असौ स्वीयां करणसंकल्पनां प्रकटयति – 'परशुना वृक्षं छिनत्ति' 'मनसा पाटलीपुत्रनगरं गच्छति' । तत्राद्यं बाह्यं करणम् अपरञ्च आन्तरिकम् ।[895] तृतीयाविभक्तेः प्रतिपाद्यं करणत्वं स्वीकरोति जयकृष्णः।[896]

जगदीशतर्कालंकारः शब्दशक्तिप्रकाशिकायां करणकारकं नूतनत्वेन प्रस्तौति ।[897] वाक्ये सविकरणेन क्रियापदेन सह तृतीयाविभक्त्या निर्देशस्य यः आशयः सः करणकारकं भवति।[898] अस्य स्पष्टीकरणम् उदाहरणद्वयेन करोति- दात्रेण छिनत्ति' 'घटत्वेन जानाति' इति । अत्र धातुनां सूचितं छेदारूपं कर्म तृतीयानिर्दिष्टफ़दात्रात् अस्य व्यापारेण उत्पाद्यते । अयमेव तृतीयायाः आशयः करणमिति । तथैव जानातिक्रियापद वाच्यं घटज्ञानरूपं फलं घटत्वरूपगुण (ज्ञानेन) उत्पद्यते अतः घटत्वं तृतीया विभक्तिनिर्दिष्टं तदेव च करणम् ।[899]

किन्तु 'चैत्रेण पक्वम्' इत्यत्र पच् धातुना सह शाब्दिकरणाभावे चैत्रेणेति पदे तृतीयार्थत्वेन करणं न ज्ञायते जगदीशमते ।[900] किन्तु नायं तर्क: सुष्ठु भाति यतः 'चैत्रेण दर्व्या पच्यते' अस्मिन् वाक्ये दर्व्याः करणत्वं तु सिद्धमेव विकरणाभावेऽपि ।

जगदीशः विकरणोक्तपदमेव लक्षणे स्वीकरोति न हि विकरणान्तपदम् । यतो हि विकरणं सर्वदा धातोरनन्तरं न युज्यते ।[901] पुनः घृतेन अत्ति 'घृतेन जुहोति' इति विकरणाभावेऽपि करणस्य अस्तित्वात् करणलक्षणं परिवर्तयति वृत्तौ यत् स्वव्यापारेण फलजनक करणमिति ।[902] इदं लक्षणं भवानन्दस्य लक्षणेन समानम् एव । जगदीशः अपि करणलक्षणेन अनुमितेः, चाक्षुप्रत्यक्षस्य श्रावणप्रत्यक्षस्य च करणं प्रमाणत्वेन स्थापयति । किन्तु इदम् अपि लक्षणम् 'आत्मना जुहोती'त्यादौ' न घटते करणे व्यापारस्य अभावात्

---

894 तत्रैव, पृ. ४६

895 तत्रैव, पृ. ४६

896 इत्थञ्चानुमितौ व्याप्ति स्मृतिः करणं...व्यापारः, तत्रैव, पृ. ४६

897 सारमञ्जरी पृ. ५०

898 तत्रैव, पृ. ५०

899 तत्रैव, पृ. ५०

900 योऽर्थो विकरणस्य धात्वर्थे तृतीयया बोध्यते करणं नाम कारकं तदिहोच्यते, शब्दशक्तिप्रकाशिका, कारिका, ७१

901 स विकरणस्य..कारकमुच्यते, तत्रैव, पृ. ३११

902 दात्रेण छिनत्ति...तत्र करणम्, तत्रैव, पृ. ३११-३१२

पुनः स 'अद्वितीयं फलोत्पादकं कारणं' करणमिति लक्षयति ।[903] अस्यापि कर्तरि अतिव्याप्तिम् आशङ्क्य असौ स्पष्टयति यत् 'आत्मना जानाति; इत्यादिषु आत्मनि कर्तृत्वं करणत्वञ्चोभयं सम्भवति इति ।[904] अन्यत्र च वाक्यद्वये करणत्वेन प्रयोगं दर्शयति 'पशुनां रूद्रं' यजते; 'दण्डेन घटः' अत्र जगदीशपरम्परा सम्मतमेव तर्कमुपस्थापयति यत् अत्र वाक्ये पशुः कर्म अस्ति विशेषनियमेन चात्र करणकारकम्, द्वितीये च दण्डः क्रियापदेन सम्बद्ध च स न हेतुरस्ति न तु करणमिति ।[905]

व्युत्पत्तिवादे गदाधरः कर्तृव्यापारभिन्नव्यापारवत् करणमिति लक्षयति करणकारकम् ।[906] अस्य लक्षणं भवानन्दस्य लक्षणसमानमेव । अस्य विवरणेऽपि गदाधरः भवानन्दजगदीशयोः तर्कान् आश्रयति । तत्र प्रमाणनिरूपणादिकं तयोरिव अनेन न कृतम्।[907] करणहेत्वो: भेदं स्पष्टयति अयमुदाहरणैः 'धनेन कुलम्' 'विद्यया यशः' इत्यादिभिः । तदनुसारं क्रियापदेन सह सम्बन्धाभावत् नैतानि करणोदाहरणानि अपितु हेतोरेव ।[908]

गागाभट्टः भाट्टचिन्तामणौ पाणिनीयं करणकारकलक्षणं स्वीकृत्य तत्र व्याचष्टे यत् साक्षात् फलजकव्यापारस्य आश्रयः करणमिति ।[909] इदं व्याख्यानं भर्तृहरेः व्याख्यानाधारितं प्रतीयते । किन्तु आत्मना जानाति इत्यादिप्रयोगसाधनाक्षमत्वात् पुनः व्याचष्टे यत् फलस्य उत्पादकं कारणं करणमिति ।[910] अनेन च अनुमित्यादीनां करणान्यपि सिध्यन्ते । कुठारेण छिन्नत्तीत्यादि प्रयोगानुरोधात् पुनः संशोधयति यत् कर्त्रा क्रियाफलावाप्तये व्यापारारोपितं तत्त्वं करणमिति ।[911]

## सम्प्रदानकारके दार्शनिकव्याख्यानम् –

भवानन्दः कारकचक्रे पाणिनीयं सम्प्रदानकारकलक्षणं सर्वथा निर्दुष्टं स्वीकरोति तत्र च युक्तियुक्तं विवरणमपि प्रस्तौति।[912] वृत्तिकारेण जिनेन्द्रबुद्धिना च उक्तं

---

[903] तत्रैव, पृ. ३१२

[904] तत्रैव, पृ. ३१२

[905] करणशब्दस्तु...वाचकः, तत्रैव, पृ. ३१२

[906] चाक्षुषादौ...वा तत्र व्यापारः , तत्रैव, पृ. ३१२-३१३

[907] फलयोगव्यापारावच्छिन्नं फलोपाधायकं वा कारणमेव करणं...इष्टत्वात्, तत्रैव, पृ. ३१३

[908] तत्रैव, पृ. ३१३

[909] तत्रैव, पृ. ३१४

[910] व्युत्पत्तिवादः, पृ. २६८

[911] तत्रैव, पृ. २६९

[912] कर्मणा यम् अभिप्रैति स सम्प्रदानम्........एवञ्च तत् क्रियाकारणीभूतकर्मजन्यफलभागित्वेनोद्देश्यत्वं सम्प्रदानत्वम्,

सम्प्रदानकारकव्याख्यानम् अस्य सम्मतम्। ‘सम्यक् प्रदीयते यस्मै स सम्प्रदानम्’ इति असौ सम्प्रदानस्वरूपं स्वीकरोति।[913] सम्यक् प्रदाने दात्रा स्वस्वामित्वं हित्वा अन्यस्वामित्वं प्रतिपाद्यते तत्र च प्रत्यावर्तनं न भवति।[914] यथा ‘विप्राय गां ददाती’त्यादौ दाता स्वामित्वत्यागानन्तरं गवि ब्राह्मणस्य स्वामित्वं स्थाप्यते।[915] अस्यां प्रक्रियायां गौ: वाक्ये कर्मत्वेन उक्तं करणं भवति क्रियाया: पूर्तये, ब्राह्मणश्च क्रियाया: लक्ष्यमस्ति तच्च उद्देश्यम् अपि क्रियाया: इति भवानन्द: सर्वतोऽपि सम्प्रदानतत्वानि विवृणोति।[916] ‘रजकस्य वस्त्रं ददातीत्यत्र’ भवानन्द: वस्त्राणां स्वच्छताया: कारणेन दीयमानत्वात् तत्र सम्प्रदानस्य अभावं स्वीकरोति, अपितु स्वच्छतातिरिक्तेषु उपहारत्वेन दीयमानवस्त्रेषु रजकस्य सम्प्रदानत्वं सिध्यते किन्तु स्वच्छताकारणेन दत्ते तु न इति।[917]

कारकचक्रकार: अन्यानि अपि कानिचन उदाहरणानि समीक्षते ‘वृक्षस्योदकं सिञ्चति’, ‘शत्रवे शस्त्रं मुञ्चति’, मित्राय दूतं प्रेरयति, अत्र कर्मण: स्वामित्वपरिवर्तनाभावे गौणतया सम्प्रदानप्रयोग: इति। श्राद्धदानादिष्वपि तथैव सम्प्रदानाभावात् नम:स्वस्तिस्वाहास्वधा इति पृथक् सम्प्रदाननिर्देश: तदनुसारम्।[918]

सारमञ्जर्यां पाणिनीयं सम्प्रदानलक्षणमुररीकृत्य भवानन्दस्य मतानुगुणं व्याख्यानं विधीयते।[919] भवानन्देन प्रदर्शितं सम्प्रदानस्य द्वैविध्यं जयकृष्णेन पुरोऽकारि।[920] असौ च ‘नारदाय रोचते कलह:’, ‘नृपाय श्लाघा’, ‘विप्राय शतं धारयते शूद्र:’ इत्यादि उदाहरणेषु चतुर्थ्यर्थप्रतिपाद्यत्वेन क्रमश: ‘संभावित्वं’ ‘विषयत्वं’ ‘सम्भावितत्वञ्च’ द्योत्यन्ते।

---

का. च. पृ. ६४.

[913] ग्रामं गच्छतीत्यादौ..........करणत्वाभावात्। पृ.६४.

[914] कर्मणा दानकर्मणा यम् अभिप्रैति.......स्वत्वभागित्वेनोद्देश्यीकरोति स सम्प्रदानम् इति। एवञ्च सम्प्रदीयते यस्मै इति व्युत्पत्या सम्प्रदानसंज्ञाप्यन्विताथैंव, तत्रैव, पृ.७०-७१

[915] अत एव शत्रवे अस्त्रं मुञ्चति........वार्तज्ञानादिफलशालित्वेनोद्देश्यत्वमेव गौणचतुर्थ्य:, तत्रैव, पृ.७१.

[916] श्राद्धादौ पित्रादेर्न स्वत्वभागित्वेनोद्देश्यत्वं किन्तु प्रीतिभागितेति......रूद्रादे: स्वत्वभागित्वेनोद्देश्यत्वम् इत्याह:, तत्रैव, पृ.७०.

[917] सम्प्रदानस्य कारकत्वम्.......उद्देश्यस्वरूपम् इत्याह, तत्रैव, पृ. ७३-७४.

[918] नारदाय रोचते कलह:......रूचिराख्यातेन विषयताभिधीयते, तत्रैव, पृ. ७३.

[919] सारमञ्जरी, पृ.५२.

[920] दाधातो: स्वस्वत्वध्वंसपरस्वत्वोत्पत्यावच्छिन्नत्याग: अथ उद्देश्यगतस्वामित्वसम्पादकत्यागोऽर्थ:, तत्रैव, पृ.५२.

'देवदत्ताय क्रुध्यति', 'पुत्राय स्पृह्यती'त्यादौ तु चतुर्थ्यर्थस्य कर्मत्वप्रतिपादनेषु न तत्र गौणतयापि सम्प्रदानमङ्गीकरोति जयकृष्ण:।[921]

शब्दशक्तिप्रकाशिकायां जगदीशतर्कालङ्कार: चतुर्थीविभक्ते: अर्थं विवृण्वान: 'चतुर्थ्या: विग्रहस्थस्ये' ति सम्प्रदानं प्रतिपादयति।[922] तदनुसारं 'ब्राह्मणाय दानं धनस्य' इति वाक्ये चतुर्थीविभक्ते: अर्थ: प्रतियोगित्वं वा धनवृत्तिस्वत्वं तज्जनक: त्याग:' इति। अत्र चतुर्थीविभक्तिबोधितं 'निरूपितत्वं', 'प्रतियोगित्वं' वा सम्प्रदानकारकम् इत्याशय:।[923]

दानेन जगदीश: वस्तुन: वास्तविकम् अन्तरं नाभिप्रैति अपितु दातु: संकल्पमात्रेण दानं सम्पद्यते इति तन्मतम्। यथा दूरगतेन पित्रा प्रेषितं धनं तन्मरणोत्तरमपि प्राप्तं पुत्रैर्दायरूपेण विभज्यते।[924] दानस्य द्वैविध्यं निरूपत्यसौ यत्तु एकेन धर्मलाभ: अपरेण च न तथा। यथा श्रमिकाय दत्तेन पारश्रमिकेन, दासाय च दत्तेन अन्नेन न धर्मप्रत्तिरितिवत्।[925] तथा हि विक्रयणे मूल्यं गृहित्वा वस्तु दानमपि मुख्यतया सम्प्रदानं भवति।[926]

दानविषये वस्तुन: स्वीकार: प्राप्तिर्वा स्याच्चेदेव दानं भवतीति शूलपाणिमतं नास्य स्वीकृतम्।[927] चतुर्थीविभक्ते: धात्वर्थसम्बन्धेऽपि सम्प्रदानं न मनुते जगदीश:। तत्र 'ग्रामाय गत:' इत्यादौ अपि तथैव। तादृशधातूनां विशेषं विवरणं जगदीशेन प्रत्यपादि। 'वृक्षस्य

---

[921] नारदाय रोचते कलह इत्यत्र सम्बन्धित्वम् अर्थ:.......ईप्सितकर्मत्वम् अर्थ:, तत्रैव, पृ.५४-५५

[922] गत्यादिभिन्ने धात्वर्थे चतुर्थ्या: विग्रहस्थस्य य: स्वार्थो बोधनीयस्तत् सम्प्रदानत्वमीरितम्, का.७०

[923] गत्यादिभिन्ने.........स्वत्वे ब्राह्मणादे: प्रतियोगित्वं निरूपितत्वं बोध्यत इति। तदेव तत्र सम्प्रदानत्वम्, तत्रैव, पृ. ३०६.

[924] सम्प्रदानशब्दस्तु स्वाश्रयगोचरत्यागजन्यस्वत्वं लब्ध्वा चाष्टगुणं फलम् इत्यादि स्मृते: प्रतिगृहीतद्रव्यदानस्य फलम् इत्यादिस्मृते: प्रतिगृहीतद्रव्यदानस्य फलविशेषं प्रति हेतुत्वेन तादृशदानसम्पत्यर्थमेव प्रतिग्रहस्य प्रयोगात्, तत्रैव, पृ.३०७.

[925] दासाय भिक्षां ददाति, भृतकाय वेतनं ददातीत्यादावपि स्वत्वजनकत्यागं प्रतिपादयन् ददातिर्मुख्य एव पुण्यजनकन्तु न तादृशं दानम् अवैधत्वात्। तत्रैव, पृ. ३००.

[926] मूल्यग्रहणपूर्वकं दानम् एव च विक्रय इति तत्रापि मुख्यमेव सम्प्रदानत्वम्........तत्रैव. पृ.३००

[927] यत्तु स्वीकारजन्यस्य स्वत्वस्य जनकस्त्यागो दानं ..........मैथिलैरुक्तं तन्न युक्तं लाघवेन स्वत्वजनकत्यागस्यैव ददात्यर्थात्। तत्रैव, पृ.३०८.

सेचक:’ इत्यत्र चतुर्थीप्रत्यय: तुमर्थक:, तथा फलाय याति’ अत्रापि। अनयोर्न सम्प्रदानमिति।[928] जयकृष्ण: भवानन्दाभ्यां न समर्थितं ‘मित्राय रोचते मोदक:’ ‘गुरवे गां धारयते’ ‘पुत्राय राध्यति’ इत्यादौ सम्प्रदानं जगदीशस्य वृत्या सिद्धं भवति।[929]

गदाधर: सम्प्रदानलक्षणसम्बद्धानि सर्वाणि पाणिने: प्रतिपादनानि यथावत् स्वीकरोति। तत्र मुख्यलक्षणे ‘अभिप्रैति’शब्देन ईप्सतीत्यर्थं गृह्णाति। तदनुसारं कर्ता यं कर्मगतफलेन सह क्रियया सम्बद्धुमिच्छति स सम्प्रदानं भवतीति।[930] यथा ‘ब्राह्मणाय गां ददाति’ इति वाक्ये गो: स्वामित्वं कर्तु: त्यागेन ब्राह्मणेन सह सम्बन्ध्यते। अत: ब्राह्मणोऽत्र सम्प्रदानम्।[931] त्यागमपि स्पष्टीकुर्वन् कर्तुस्त्यागेप्सायाा लक्ष्यभूतं सम्प्रदानं प्रतिपादयत्यसौ।[932] तत्र च ‘शत्रवे भयं ददाती’त्येनं गौणतया सम्प्रदानं निर्दिशति त्यागाभावे। ददातिपदं तु भयोत्पत्ते: बोधकम्।[933] ‘रजकस्य वस्त्रं ददाति’ ‘संवाहकाय चरणं ददाति’ अत्र च ददाते: मुख्यर्थाभावे न सम्प्रदानं प्रवर्तते।[934] क्वचित्तु अपवादा: अपि लक्ष्यन्तेऽस्य।

‘युद्धाय सन्नह्यते’ ‘पत्ये शेते’ इत्यादौ तु गदाधर: भाष्यकारविरोधेन सम्प्रदानं निराकरोति।[935] ‘नारदाय रोचते कलह:’, ‘पुष्पेभ्य: स्पृह्यति’, ‘पुत्राय क्रुध्यते’ इत्यादिषु पाणिने: नियमै: सम्प्रदानं स्वीकरोत्यसौ। किन्तु तेषाम् आश्रयत्वकर्मत्वादिष्वर्थेषु सम्प्रदानत्वं निरूपयति।[936]

---

[928] ग्रामाय गत इत्यादौ विग्रहस्थचतुर्थ्या...........संवर्धयितुम् अर्थो न विग्रहस्थायैति न प्रसंग:, तत्रैव, पृ. ३०९-३११.

[929] तत्रैव, पृ.३०९-३११.

[930] सम्प्रदानत्वञ्च........क्रियाजन्यफलभागित्वाय कर्तुरिच्छाविषयत्वं पर्यावसानम्, व्युत्पत्तिवाद:, पृ.२७९.

[931] कर्मणा यम् अभिप्रैति ...............त्यागरूपक्रियाजन्यगोनिष्ठस्वत्वभागितय दातुरिच्छाविषयो ब्राह्मण:, तत्रैव, पृ. २७०.

[932] तत्रैव, पृ.२८२.

[933] शत्रवे भयं ददातीत्यादौ जनयन्तीति भाक्तोऽर्थ:, एवञ्च स्वत्वादे: सम्प्रदानत्वम्, तत्रैव पृ.२९२.

[934] रजकस्य वस्त्रं ददातीत्यत्र ददातिर्न त्यागार्थकोऽपितु प्रायत्तिकरणार्थको गौण: एवञ्च, संवाहकस्य चरणं ददाति......तत्रैव, पृ.२८३.

[935] तत्रैव, पृ.२८३.

[936] तत्रैव, पृ.२८३-२८४.

गागाभट्टः भाट्टचिन्तामणौ 'धात्वर्थकर्मजन्यव्यापारोद्देश्यत्वं सम्प्रदानत्वम्'[937] इति सम्प्रदानकारकं परिभाषयति। स च पाणिनीयलक्षणस्य 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इत्यस्य व्याख्याभूतमेव स्वीकरोति। कर्तुः क्रियायाः उद्दिष्टमेव सम्प्रदानं विवृणोति। यथा 'विप्राय गां ददाति' इत्यत्र कर्त्रा दानक्रियया गोकर्मणः ब्राह्मणं प्रति धर्मार्जनहेतुकं स्वाम्यस्य अन्तरणं कृतं भवति। अत्र च ब्राह्मणः उद्देश्यं भवति सैव हि सम्प्रदानम्।

तत्र व्याख्याने असंगतिं संलक्ष्य पुनः लक्षयति सम्प्रदानं 'दानकर्मीभूतगवादिप्रतिगृहितृत्वं सम्प्रदानत्वम्' इति। तदनुसारं दानस्य प्राप्तं सम्प्रदानं भवति।[938] अस्यापि पाणिनीयलक्षणेन सह संगतिं प्रतिपादयति गागाभट्टः।[939] तथैव हि असौ मीमांसकसाम्प्रदायिकम् अन्यल्लक्षणं प्रस्तौति 'दृष्टद्वारकधात्वर्थोद्देश्यकत्वं सम्प्रदानत्वम्' इति। तन्मतेन इदं लक्षणं सम्प्रदानस्य सर्वान्नपि प्रयोगान् साधयति।[940] शेषशेषिणोः चर्चां कुर्वन्नसौ 'मैत्रावरूणाय दण्डं प्रयच्छति' इत्युदाहरणेन वाक्ये शेषित्वं दर्शयति।[941] 'रुच्यार्थानां प्रीयमाणः' इत्यादिसूत्राणाम् अपि युक्तियुक्तं विवरणं ददाति।[942] 'रजकाय वस्त्रं ददाति' इति वाक्यमपि साधुं स्वीकरोत्यसौ गौणतया।[943]

## अपादानकारके दार्शनिकव्याख्यानम् –

भवानन्दः कारकचक्रे पाणिनीयमपादानलक्षणं यथार्थं प्रतिपादयति। स हि भर्तृहरेः अनुकरणेन तद् व्याचक्षाणः तत्र पतञ्जलेः मानसापायसम्बन्धिविवरणं निरासयति। 'भीत्रार्थानां भयहेतु'रित्यादिसूत्रेषु अपायेतरार्थानां बोधं स्वीकरोति भवानन्दः।

---

[937] भाट्टचिन्तामणिः, पृ.९९-१००.

[938] एवञ्च दानकर्मीभूतगवादिप्रतिगृहीतृत्वं सम्प्रदानत्वम्, तत्रैव, पृ.१००.

[939] तत्रैव, पृ.१००.

[940] दृष्टद्वारकधात्वर्थत्वं सम्प्रदानत्वम्...............कृष्णाय रोचते भक्तिरित्यादौ मुख्यः प्रयोगः।

[941] तत्रैव, पृ.१००

[942] तत्रैव, पृ.१००

[943] तत्रैव, पृ.१००

भवानन्देन 'ध्रुवमपायेऽपादानं' सूत्रव्याख्याने भर्तृहरेः मतानुसारी अर्थः गृह्यते। अयञ्चार्थभट्टोजिदीक्षितकौण्डभट्टादिभिरपि स्वीकृतः। असौ 'परकीयक्रियाजन्यविभागाश्रयत्वम् अपादानत्वम्'।[944] इति रूपमपादानसूत्रार्थं स्वीकरोति। तन्मतेन अयमर्थं पूर्वाचार्याणाम् अपादानार्थः विवरणेन सह सङ्गच्छते।[945] भर्तृहरेरनुसारं विभागाश्रयरूपम् अपादानम् भवति। विभागे च क्रियायाः आश्रयः अपादानं न भवति। इदम् अयमाचार्यः अपि स्वीकरोति।[946] अनेन च चलस्य अपि वस्तुनः ध्रौव्यं सिद्धं भवति।[947] भर्तृहरेः नामोल्लेखं विना अयमाचार्यः तत्सम्मतसिद्धान्तैरेव 'ध्रुवमपायेऽपादानमि'ति सूत्रे व्याख्यानं प्रस्तौति।[948]

अस्य मतेन अपादानकारकं तत्रैव प्रवर्तते यत्र धात्वर्थेन विभागः न द्योत्यते। यथा 'वृक्षं त्यजति खगः' वाक्ये धात्वर्थादेव विभागग्रहणाद् वृक्षोऽपादानं न भवति।[949] तस्य लक्षणे 'परकीयक्रियाजन्य' इत्यादौ क्रियाशब्देन सकर्मकाः धातवः ग्राह्याः न हि अकर्मकाः इत्यसौ विवृणोति। अनेन च 'वृक्षात् पर्णं स्पन्दते' इत्यसाधुः प्रयोगः।[950] 'व्याघ्राद् बिभेतीत्यादौ च पञ्चम्या अपादानं नोच्यते इति भवानन्दस्य मतिः। तन्मतेन हेतुरत्र पञ्चम्यर्थ इति। 'अध्ययनात् पराजयते' 'अधर्माज्जुगुप्सते' एतयोश्च कर्मत्वं पञ्चम्यर्थः भवति। 'कूपाद् अन्धं वारयति' 'सविषान्नात् मित्रं वारयति' इत्यत्र क्रमशः पतनक्रिया, भक्षणक्रिया, तयोरूभयोः निषेधश्च पञ्चम्या उक्तौ भवतः। तथैव 'हिमवतः गंगा प्रभवति' वाक्ये गंगायाः भुवा सह संयोगः तदनु हिमालयादस्य वियोगः पञ्चम्यर्थौ। 'धर्मात् प्रमाद्यति' अत्र विषयत्वं पञ्चम्यर्थः। उपाध्यायाद् अन्तर्धत्ते' इत्यत्र पञ्चम्याः

---

944 कारकचक्रम्, पृ.७४

945 एवञ्च ग्रामादागच्छतीत्यादौ गमनादिजन्यविभागाश्रयत्वेन गामादेस्प्रधानत्वं……………..तद्विभागजनकक्रियाशून्यमित्यर्थः, तत्रैव, पृ.७६-७७

946 वस्तुतस्तु……….धावतोऽश्वात् पततीत्यादौ न काप्यनुपपत्तिः, तत्रैव, पृ.७६-७७

947 तत्रैव, पृ.७७

948 तत्रैव, पृ.७७

949 अत्र च वृक्षं त्यजति खग इत्यादौ वृक्षादेर्नापादानत्वम्, तत्रैव, पृ.७५.

950 न चैवं स्वस्माद् विभज्यते…………सकर्मकधात्वर्थस्य विवक्षितत्वात्।, तत्रैव, पृ.७८.

सम्बन्धविशेषस्य बोध: भवति इति भवानन्द: प्रतिपादयति।[951] अनेन विवरणेन अपादानकारके भवानन्दस्य स्वीकृतय: वैय्याकरणैरपेक्षया भिन्ना: सन्तीति वक्तुं पार्यते।

सारमञ्जरीकार: पाणिनीयमपादानलक्षणं सर्वथा साधु स्वीकरोति। कारकचक्रानुकरणेनैवासौ इदं लक्षणं विवृणोति।[952] पञ्चम्यर्थस्य ऊहापोहे 'हिमवतो गंगा प्रभवति', 'अध्ययनात् पराजयते' इत्याद्युदाहरणानां विश्लेषणं करोति किन्तु अस्मिन् विषये भवानन्दाद् भिन्नं मतमस्य।[953]

जगदीशतर्कालङ्कार: पञ्चम्यर्थम् अपादानं प्रतिपादयति शब्दशक्तिप्रकाशिकायाम्।[954] तत्र विभागस्य आश्रय एव अपादानं भवति न तु विभाजकव्यापाराश्रय: वैय्याकरणसमुदायप्रथितं सिद्धान्तं समर्थयति।[955] तदनुसारं 'वृक्षात् पर्णं पतती'त्यत्र पञ्चम्या अपाय: बोध्यते अयम् अपाय: 'पत्लृ'धात्वर्थीभूतपतनेन अभिसम्बद्ध्यते। अत: पञ्चम्यर्थप्रतिपादितस्यापायस्य विशेषणं 'पतति: क्रियापदम्'।[956] अनेन च 'वृक्षावधिकविभागानुकूलनिपतनकर्ता' इतिवत् वाक्यार्थ: उपपद्यते।

केचन विद्वांस: 'स्वस्मात् पतितश्चैत्र:' इत्यादिप्रयोगवारणाय अपादानलक्षणे 'क्रिया'शब्दात्पूर्वं 'परसमवेत' इति पदप्रयोगं निर्दिशति। किन्तु तादृशवाक्यार्थस्य असंभवात् अनावश्यकव्यापारासौ मनुते जगदीश:।[957]

---

[951] तत्रैव, पृ.७९-८२

[952] ध्रुवमपायेऽपादानमिति सूत्रम्..........परकीयक्रियाजन्यविभागाश्रयत्वम् अपादानत्वम् इति नैयायिकलक्षणम्, सारमञ्जरी, पृ.५५-५६

[953] (१) अध्ययनात् पराजयते बाल इत्यादौ पञ्चम्या: कर्मत्वं.अर्थात्, का.च.पृ.५९, cf. अध्ययनात् पराजयते बाल इत्यादौ पञ्चम्या: कर्मत्वं........अर्थात्, का. च.पृ.८९, (२) उपाध्यायात् अन्तर्धत्ते चैत्र इत्यत्रापि पञ्चम्या हेतुत्वम्, सारमञ्जरी, पृ.६२. cf. उपाध्यायात् अन्तर्धत्ते इत्यादौ....पञ्चम्या: सम्बन्धित्वम्. का.च.पृ.८९.

[954] शब्दशक्तिप्रकाशिका, कारिका.६९, क्रियाद्धात्वर्थादि:..........अपादानमुच्यते, तत्रैव, पृ.२९३.

[955] अपादानशब्दस्तु तत्तत्कर्मानधिकरणत्वे सति तत्तत्कर्मजन्यविभागाश्रये शक्त इति, तत्रैव, पृ.२९८-२९९

[956] तत्रैव, पृ.२९७-२९८.

[957] न च वृक्षादिवत्.........इष्टत्वात्, तत्रैव, पृ.२९८.

कारकचक्रकृदिव अपायार्थकधातोः प्रयोगे अपादानकारकं निराकरोति, यथा त्यजतीत्यादौ।[958] किन्तु अतादृशधातुप्रयोगे तु अपादानं भवति यथा 'वृक्षादपैति खगः' अत्र अपेति पात इत्यर्थे प्रयुक्तः।[959] किन्तु भवानन्दस्य अन्यां स्थापनां जगदीशः निराकरोति यत् अपादानं सकर्मकधातुप्रयोगे एव भवतीति। तन्मतेन अकर्मकधातुयोगेऽपि अपादानं भवति। यथा 'वृक्षाच्चलति' इत्ययं प्रयोगः साधुः। तथा च 'वृक्षात्स्पन्दते' इत्यपि।[960] भवानन्दोक्तं 'व्याघ्राद् बिभेति' इत्यत्र हेतुरूपं पञ्चम्यर्थं जगदीशः न समर्थयति अपितु वैय्याकरणा इव अपादानं स्वीकरोति।[961] किन्तु अन्यत्र 'व्याघ्राद् बिभेति' 'व्याघ्रात् त्रस्यति' इत्यादौ पञ्चम्या अपादानेन सम्बद्धोऽर्थः बोध्यते इत्यपि स्वीकरोति। तथैव 'पापान्निवर्तते', 'अधर्माद् विरमति', 'रणात् पराजयते' एषु उदाहरणे द्वेष्यं पञ्चमीनिरपितं निर्धारयति। 'बल्मीकाग्रात्प्रभवति धुष्खण्डमाखण्डलस्य' इति कालिदासोक्तौ आधारं पञ्चम्यर्थं वदति जगदीशः। तथैव 'पापाज्जुगुप्सते' वाक्ये विषयत्वमसौ पञ्चम्यर्थं विवृणोति'।[962]

गदाधरभट्टाचार्यः अपादानलक्षणं प्रस्तुवन् 'स्वनिष्ठभेदप्रतियोगितावच्छेदकीभूतक्रियाजन्यविभागाश्रयत्वम्'[963] अपादानमिति प्रतिपादयति। किन्तु अत्र सत्वं नाप्नोति। उदाहरणद्वयेन विशदयति च (१) वृक्षात् पर्णं पतति न भूतलात्, (२) वृक्षात् पर्णं पतति न पर्णात् इतिवत्।[964] पुनरस्यां दृष्टिं प्रतिपादयन् विभागे अवधिभूतः एव पञ्चम्यर्थः इति वैय्याकरणसम्मतं मतं प्रस्तौति। तदनुसारं विभक्त्या निरूपितत्वसम्बन्धेन विभागस्य जनकत्वमुच्यते।[965] अपादाने पतञ्जलेः विमर्शः नोच्यतेऽमुना।

---

958 तत्रैव, पृ.२९९.

959 तत्रैव, पृ. २९९

960 तत्रैव, पृ.३००

961 तत्रैव, पृ.३००

962 तत्रैव, पृ.३००-३०१

963 व्युत्पत्तिवादः, पृ.१७७

964 व्युत्पत्तिवादः, पृ.१७७

965 विभागो जनकत्वञ्च पञ्चम्यर्थः..........निरूपितविशेषसम्बन्धेन जनकत्वान्वयः, पृ.१७७.

गागाभट्ट: अपादानकारकं लक्षयति 'परसमवेतक्रियाजन्यविभागाश्रयत्वमि'ति। तदनुसारमपादानस्य अयमर्थ: पाणिने: सूत्रानुसारी। तत्र 'वृक्षात् पर्णं पतती'ति वाक्ये धातोरर्थद्वयं गम्यते। कदाचिदसौ व्यापार: येन विभाग: उत्पाद्यते। कदाचिच्च स व्यापार: येन विभक्तस्य अन्यदेशसंयोग:।

गागाभट्ट: धातूक्तं द्वितीयव्यापारं वाक्यार्थे स्वीकुर्वन् विभागस्य फलाश्रयम् अपादानं प्रतिपादयति। तदनुसारमिदं हि पाणिनेरभिप्रैतम्।[966] असौ हि भाष्यकारोक्तं मानसापायं नाङ्गीकरोति।[967] न चास्य गौणेऽपादाने क्वचित् स्वीकृति:।

नैय्यायिकमीमांसकयोर्भेदविशेषं प्रदर्शयन्नसौ वदति यत् 'अरण्यात् बिभेति' इति प्रयोग: असम्मत: मीमांसकानाम्' नैय्यायिकाश्च 'व्याघ्राद् बिभेती'त्यत्र गौणतयाऽपादानं मन्वतेऽथवा उपपदपञ्चमीं स्वीकुर्वते।[968]

## अधिकरणकारके दार्शनिकव्याख्यानम् –

कारकचक्रे भवानन्दसिद्धान्तवागीश: आधाराधेयसम्बन्धं नवीनतया व्याचष्टे। तदनुसारम् अयं संबन्ध: संयोगसमवाययोरन्यतम: भवति। तत्र वैय्याकरणानां मतं समीक्षमाणोऽसौ उदाहरति यत् बदरीफलं पात्रे स्थाप्यते चेत् आधाराधेयसम्बन्ध: उभयनिष्ठ: भवति।[969] तदा च बदरीफलेऽपि अधिकरणत्वं प्राप्यते इति। तथैव हि समवायसमवायिगत: न कश्चित् सम्बन्ध: संभवति सम्बन्धस्य वस्तुद्वये सत्त्वात्।[970] यथा 'भूतले घटाभाव:' इत्यादौ। वैयाकरणानाम् अपेक्षणीयत्वेन प्रतिपादयन्ति। अपेक्षणीयत्वं वस्तुजातस्य उत्पत्तौ, स्थितौ, ज्ञाने सर्वथा आवश्यकं भवति। भवानन्द: स्पष्टयति यत् कस्यचिदुत्पत्तौ तस्य समवायिकारणम् आवश्यकं भवति। यथा घटस्य स्थितये भूतलमावश्यकम्। विश्वस्य ज्ञानाय भूमि: आवश्यकी। अभावसमवाययो: सम्बन्धज्ञानाय

---

[966] अपादानत्वञ्च..........चेति निष्कर्ष:। भाट्टचिन्तामणि: १०४

[967] एवं चोराद् व्याघ्राद् बिभेति.........मुख्यमेवापादानत्वम्, तत्रैव, पृ.१०४

[968] तत्रैव, पृ.१०४

[969] अधिकरणत्वञ्च.........कुण्डाधारतापत्ते:। का. च. पृ.७५-७६

[970] तत्रैव, पृ.७७

स्वरूपम् आवश्यकं भवति। अतः उक्तप्रकरणेषु प्रतिपादितम् अपेक्षणीयम् भवति। अतः उक्तप्रकरणेषु प्रतिपादितम् अपेक्षणीयम् अधिकरणं भवति।

अन्ये केचन विद्वांसः अधिकरणं वस्तुनः अन्यवस्तुसम्बन्धेन पतनाद् रक्षकं स्वीकुर्वते। भवानन्दः एतान् तर्कान् निरसयति यतः प्रथमतर्कानुसारं भिन्नोदाहरणेषु भिन्नगुणानां प्रदर्शना तत्र अधिकरणस्य सामान्या परिभाषा न प्राप्यते। द्वितीयतर्केण च अधिकरणे समवायाभावयोः ग्रहणं न भवति।[971] भवानन्दानुसारम् आधाराधेययोः स्वरूपसम्बन्धः भवति। अनेनैव च सम्बन्धेन अधिकरणत्वम् आधेयत्वं च स्पष्टतया ज्ञातुं शक्येते।[972] तन्मतेन पूर्वेषाम् अधिकरणसम्बन्धीनि विधानानि एतत्सम्बन्धालोके युक्ततया स्थापितानि भवन्ति इति। यथा 'भूतले घटो विद्यते' भूतले घटाभावो विद्यते' चेत्यनयोः भूतलस्य घटाधिकरणत्वं अथवा घटाभावाधिकरणत्वं न समवायसम्बन्धेन सिध्यते न च संयोगसम्बन्धेन किन्तु स्वरूपसम्बन्धेनैव भूतले अधिकरणत्वम् आधेयत्वं वा ज्ञायते। यदा च घटः जले, नागदन्ते, कुड्यां वा स्थापितः स्यात् तदा तेषु एव स्वरूपसम्बन्धेन तस्य आधेयत्वं तथैव च तदभावस्यापि।

स्वरूपसम्बन्धस्य आधेयगते स्वीकृते एव अधिकरणस्य स्पष्टं विवरणं कर्तुं शक्यते। तस्य च उभयनिष्ठत्वे तु अन्योन्याश्रयदोषात् अधिकरणस्य निरूपणं न शक्येत।[973]

सारमञ्जरीकारः 'आधारोऽधिकरणमि'त्यत्र वाक्यपदीये व्याख्यातम् अधिकरणकारकं समर्थयति। तच्च नैय्यायिकमुख्यैरपि स्वीकृतम्।[974]

जगदीशतर्कालंकारः अधिकरणकारकप्रतिपादने भवानन्दस्य तर्कान् स्वीकुर्वाणः अधिकरणत्वं स्वरूपसम्बन्धमेव व्याचष्टे। तदनुसारं धात्वर्थसम्बन्धायाः सप्तमीविभक्तेः वाच्यम् अधिकरणकारकं भवति। 'ग्रामे गन्ता' इति वाक्ये ग्रामे इति पदे वर्तमाना सप्तमी गन्ता इति पदस्थगम्लृधातोरर्थेन सह सम्बध्यते। अनेन स्पष्टं भवति यत् ग्रामः

---

971 नापि उपपद्यते द्वितीये……..कुण्डाधारापत्तेः………..गौरवात् अननुगतत्वाच्च, तत्रैव, पृ.७७

972 किन्तु ……..स्वरूपसम्बन्धविशेषः। तत्रैव, पृ.७८

973 स्वाधेयताञ्च यद्………अन्योन्याश्रयः। तत्रैव, पृ.७६

974 तत्र पाणिनिसूत्रम् आधारोऽधिकरणम्…………इति नैयायिकाः सारमञ्जरी, पृ.६३

गच्छतिक्रियाया: आश्रय: इति। तस्माच्च धात्वर्थसम्बन्धात् ग्रामोऽधिकरणम्।[975] एतत्सम्बन्धविषये जगदीश: स्पष्टयति यत् नायं सम्बन्ध: संयोग: नापि च समवाय इति। 'स्पन्दे गच्छतीत्यादिप्रयोगाणाम् अदर्शनात् नायं कालसम्बन्ध: अपि। अत: अयं सम्बन्ध: स्वरूपसम्बन्ध: तदेव च अधिकरणत्वम्।[976] पूर्वै: वैय्याकरणै: प्रतिपादितम् अधिकरणकारकम् भवानन्दजगदीशाभ्यां न्यायशैल्यां स्पष्टतया उदीरितम्। सुषेणातिरिक्तै: वैय्याकरणै: अधिकरणकारकसन्दर्भे पदार्थक्रियादीनां विवेचनं क्रियते। अभावस्य आधारत्वम् आधेयत्वं वा तेषां विवरणेन न सिद्ध्यति। सम्बन्धस्य संयोगसमवायविषयतादिरूपत्वात्। अभावे पदार्थगुणादीनां च आधारे आधेये वा सति ईदृशसम्बन्ध: न शक्य:। अत: जगदीश: भवानन्दश्च अधिकरणत्वं स्वरूपसम्बन्धं स्वीकुरुत;।

गदाधरभट्टाचार्य: व्युत्पत्तिवादे वैय्याकरणसम्मतं क्रियाया: परम्परितमाधारम् अधिकरणकारकं स्वीकरोति।[977] तदनुसारं प्रातिपदिकेन सह लग्ना सप्तमी आधेयत्वं बोधयति। उदाहरणद्वयेनासौ स्पष्टयति यत् क्रिया परम्परया अधिकरणे आश्रिता भवति।[978] 'कुण्डे बदरम् अस्ति' अत्र कुण्डबदरयो: संयोग: कुण्डे आधारत्वं निर्धारयति। तथैव 'पटे रूपम्' अत्र पटरूपयो: समवाय: पटे आधारत्वं निर्धारयति। एवं संयोगसमवायादिभि: अधिकरणत्वस्य निर्धार: गदाधरस्य सम्मत: किन्तु भवानन्दोक्ता: आक्षेपा: तत्र उपतिष्ठन्ति।[979] गदाधर: समाधत्ते यत् कुण्डबदरगत: संयोग: बदररूपस्य आधेयस्य प्रतियोगी अस्ति आधारश्च कुण्डस्य अनुयोगी। तथैव हि 'पटे रूपम्' अत्र अधिकरणत्वस्य निर्धार:।[980]

---

[975] क्रियाधात्वर्थ:...........अधिकरणकारकम्, शब्दशक्तिप्रकाशिका, पृ.३१४

[976] यद्यपि चैत्रादिनिष्ठाया: गते: समवायादिना ग्रामवृत्तित्वं बोधितं कालिकादिना..........स्वरूपसम्बन्धाविशेषेण तथात्वं बोध्यम्। तत्रैव, पृ.१८७

[977] व्युत्पत्तिवाद:, पृ.१८८

[978] तत्रैव, पृ.१८७

[979] तत्रैव, पृ.१८७

[980] तत्रैव, पृ.१८७

‘भूतले घटः वर्तते’ अत्रापि धातुना आधारत्वम् उच्यते गदाधरानुसारम् अधिकरणत्वेन उक्तोऽर्थः कर्तृमाध्यमेन क्रियया सम्बध्यते।[981]

गागाभट्टः ‘आधारोऽधिकरणमि’ति सूत्रस्य प्रतिपाद्यम् अधिकरणं क्रियायाः परम्परितमाधारमेव स्वीकरोति। तत्र कर्तृकर्मणोरन्यतमः माध्यमः भवति।[982] पतञ्जलिना प्रतिपादितमधिकरणस्य त्रैविध्यमपि असौ समर्थयति।[983]

- बौद्धशास्त्रीयशाब्दबोधे कारकार्थः

कारकपदं सामान्येन क्रियानिर्वतकं द्योतयति[984]। इदं व्याकरणदृशा वाक्यगतक्रियायाः तस्याः साधयितृणाञ्च सम्बधं बोधयति। सद्दनिति कारकपदम् इत्थं व्याचष्टे- “क्रियाभिसम्बन्धलक्खणं कारकम्”[985]

कारकस्य परिभाषा व्याकरणैः न लिख्यते। कच्चायनः द्वितीयाध्याये षष्ठं काण्डं ‘कारकप्प’ इत्यभिधानं करोति।[986] मोग्गलानः कारकसंज्ञां प्रयुनक्ति किन्तु न व्याचष्टे। अग्गवंसः सद्दनीतौ कारकप्प इति प्रकरणस्य प्रारम्भे एव कारकव्याख्यानं करोति-

इतो परं ससम्बन्ध विभत्तिप्पभावं चधा।
काराकं विभाजितवान पवक्खामि, सुणाथ मे॥[987]

अर्थात् अग्रतः अहं कारकव्याख्यानं प्रस्तौमि, इदं विभक्तीनां विधायकं भवति, सम्बन्धान् च ज्ञापयति मां शृणुत इति।

अस्या टीकायाम् एतदुच्यते- कारणां विभाजनमुच्यते, ते कर्मादयः, तत्र च बहुवचनैकवचनत्वेन विभक्तयः भवन्ति।[988] अत्र विभक्तयः कारकाणां विभाजिकाः उच्यन्ते। इदं मतं पाणिनेः कारकप्रतिपादनादनानि अन्यस्य इव प्रतीयते।

---

981 भूतले वर्तते घटः.............निरूपितत्वम् एव घटादेस्तत्कर्तृत्वम्, तत्रैव, पृ.१८७

982 अधिकरणत्वञ्चाधारत्वम् परम्पराकर्तृकर्माश्रयद्वारा, भाट्टचिन्तामणिः, पृ.१०५

983 तत्रैव, पृ.१०५

984 २६६/सद्द. 445

985 सद्द. ५४७

986 कच्चा. २७३, २७४, २७५

987 सद्द. आरम्भकारिका

अग्गवंसः कारकं व्याचष्टे- क्रियानिमित्तं कारकम्।[989] कातन्त्रवृत्तिपञ्जिका अपि कातन्त्रवृत्तिव्याख्याने[990] 'कारकं हि क्रियानिमित्तमि'ति समानं प्रतिपादयति। कारकस्य निमित्तरूपव्याख्यानं हेलाराजः वाक्यपदीये करोति- कारकं क्रियायाः कारणभूतं क्रियाशब्देन निर्दिष्टं भवति[991]। काशिकानुसारं: कारकं च निमित्तपर्यायः। कारकहेत्वादिशब्देषु न कश्चिदर्थभेदः। कस्य हेतुः? क्रियायाः।[992]

अग्गवंसः वदति- येन शब्देन क्रियायाः प्रथमिकं द्वितीयकं वा कारणं द्योतते, क्रियाकारित्वात् तत् कारकं भवतीति[993]। तत्रासौ इदं विभाजनं 'मुख्यावसेन वा उपचारवसेन वा' इतिवत् स्पष्टयति। अन्ततः यः करोति सः कारकः इत्येव स्थापितं भवति।

प्राथमिकद्वितीयककारकविभाजनं कात्यायनः स्ववार्तिके[994] पतञ्जलिरपि इमां चर्चां (agent and agency) तत्रैव प्रसङ्गे विषदयति।

अग्गवंसः कारकान् षट्संख्याकान्प्रतिपादयति[995]- कत्तु-कम्म-करण-सम्पदान-ओकास[996] इतिवत्। एतत्प्रतिपादिपादनं संस्कृतव्याकरणैः सह समानतां भजते[997]। पदमालायां तु असौ त्रीणि हि कारकाणि वक्ति : कत्तर, कम्म,भाव इतिवत्।[998]

अन्येन केनचित् भावेन सह सप्त कारकाणि प्रतिपादयन्ति- भाव, कत्तर, कम्म, करण, अपादान, अधिकरणं च। इमानि साधनेन (सम्पदानेन) सह सप्त भवन्ति।[999]

अग्गवंसः त्रिविध कारकविभाजनं क्रियायाः तेषां साक्षात् सम्बन्धेन सह सम्बध्नाति[1000]। पालिवैय्याकरणाः कारकार्थे साधनपदमपि प्रयुञ्जते-

---

988 कम्मादयो वाब कारके एकवचन-बहुवचनवेसेन विभजती ति विभत्तिः। पदमाला, १५/४

989 सद्द. ५४७

990 कातन्त्रवृत्तिपञ्जिका २/४/१

991 यत् तु क्रियापदोपात्तायाः क्रियाया निमित्तं तत् कारकम् एव (वा.प. ३/७/२४ हेला. २५१, २-३)

992 कारकशब्दश्च निमित्तपर्यायः। कारकम् हेतुरित्यर्थान्तरम्। कस्य हेतुः? क्रियायाः। काशिकावृत्तिः १/४/२३

993 यं साधनसभावत्ता मुख्यवसेन वा उपचारवसेन वा क्रियाभिनिप्पत्तिया निमित्तम् तं वत्थु कारकं नाम भवति; मुख्योपचारवसेन हि किरियं करोतीति कारकम्। सद्द. ५४७

994 वार्तिकम् ६,७. पा. सू. १/४/२३ इत्यत्र

995 कम्मं कत्ता च भावो इञ्च कारका तिधा।

996 सद्द. ५४७

997 कर्ता कर्म च करणं सम्प्रदानं तथैव च। अपादानाधिकरणम् इत्याहुः कारकाणि षट्॥

998 सद्द. २०, ३७

999 एवम् एत्था भाकत्तुकम्मकरणापादाधिकरकरणवसेन च साधनानि पकासितानि, सम्पदासाधनेन सत्तविधानि भवन्ति।

बुद्धं ञानसम्बुद्धं सब्बञ्ञं लोकहेतुखिन्नमतिम्।

वन्दित्वा पुब्बमहं वक्खामि सुसाधनं कितकप्पम्[1001]॥

मुखमत्तदीपनी-कच्चायनवण्णना एतयोरपि भर्तृहरेः कारकविधानसम्बन्धिनः साधसमुद्देशादपि सिद्धान्तानि स्वीकृतानि।

कारकशब्दः वाक्यगतसम्बन्धविशेषार्थे पाणिनीयशास्त्रे ऐदम्प्राथम्येन उपयुक्तोऽस्ति। प्रातिशाख्यादिषु अयं शब्दः नोपलभ्यते व्याकरणस्य तत्वप्रतिपादकम्। पाणिनिः अपि एनं साक्षादुपयुनक्ति अधिकारसूत्ररूपेण[1002] व्याख्याविशेषं विनैव। कारके इति सूत्रव्याख्याने पतञ्जलिः कारकं साधकं प्रतिपादयति, यत्र क्रिया आश्रिता भवति अथवा यत् क्रियां निवर्तयति। येन वा किञ्चित् सम्पाद्यते[1003]। इदमेव पतञ्जलिः करोतीति कारकमिति व्याचष्टे[1004]। चन्द्रगोमी अपि व्याख्यां विनैव घञ् कारके चेति सूत्रे कारकशब्दं प्रयुनक्ति[1005]।

कत्तर-

कत्तरशब्दस्यार्थः कर्त्ता भवति। व्याकरणस्य परिभाषात्वेन इदं किञ्चिद्विधायकं तत्त्वविशेषं भवति।[1006] कच्चायनो इदं परिभाषयन्नाह- यः करोति स कत्ता[1007]। अग्गवंसश्च- यो कुरुते यो वा जायति सो कत्ता इति तद्विषदं करोति[1008]। यो वा जायति इदं भर्तृहरेः अनुकरणं भाति[1009]। अत्र भर्तृहरिः कर्त्तुः स्वरूपं विषदयति। यतः जन्म पूर्वमविद्यमानस्य कर्तृत्वं ज्ञापयति। हेलाराज अस्यां कारिकायां वृत्तौ अस्य विषयस्य विस्तरं करोति। अत्र अग्गवंसः वदति- यत् क्रियायाः प्रवृत्तौ सर्वेभ्यो मुख्यं भवति गमनपाकादिकां क्रियां च सम्पादयति अथवा उत्पद्यते तत् कारकं कर्त्ता भवति[1010]। तत्र 'अत्तापधानो हुत्वा' इति कथनेन

---

1000 एवं निरुत्तिनयं निस्साय वुत्तं भावकारकान् च् द्वे च कम्मकत्तुकरकारकानी ति कारकत्तयम् भवति तद्दीपकञ् चाख्यातिकपदण् तिकारकम्। (सद्द. १०/१९-३१) कच्चायनवण्णनेऽपि आख्यातकप्पे- यन्तिकालं तिपुरिसं क्रियावाची तिकारकम्। अत्तिलिङ्गं द्विवचनं तदाख्यातं ति वुच्चति।॥

1001 किब्बिधानकप्प, कच्चा. आरंभकारिका

1002 पा.सू. १/४/२३

1003 साधकं निवर्तकं कारकसंज्ञम् भवतीति वक्तव्यम्।

1004 महाभाष्य १/३२४

1005 चा.व्या.१/३/७

1006 विनयाट्ठकथा 97

1007 कच्चा. २८३

1008 सद्द. ५४८

1009 उत्पत्तेः प्राग् असम्भावो बुद्ध्यवस्थानिबन्धनः। अविशिष्टः सतान्येन कर्ता भवति जन्मनः॥ वा.प. ३/७/१०५

1010 यो अत्तापधानो हुत्वा गमन-पचनादिकं किरियं कुरुते। यो वा जायति। सो कारको कत्ता नाम भवति।

अन्यकारकाणां निवृत्तिः उच्यते। कच्चायनवण्णने इदं स्पष्टीक्रियते- 'अत्तापधानो हुत्वा क्रियां करोतीति कत्ता। इमिना सुत्तेन पुरिसो गच्छतीत्यादिसु उत्ताकत्तूसु पि आञ्ञकारकसञ्ञानिवत्तावत्थं कत्तुसञ्ञा कतब्बा। कस्मा विञ्ञायतीति? यो करोति स कत्ता ति सामञ्ञवसेन[1011]।

अग्गवंसस्य व्याख्यानं कर्तृकारकस्य पाणिनेः व्याख्यायाः प्रभावितमस्ति। पाणिनेः स्वतन्त्रः कर्त्ता[1012] इत्यत्र स्वतन्त्रः पदं पतञ्जलिना प्रधानमिति व्याख्यातम्। काशिकान्यासाभ्यां पातञ्जलमतमेवादृतमत्र। हरदत्तहेलाराजयोः स्वतन्त्रपदव्याख्यानं अग्गवंसेन साम्यं भजते- 'स्व आत्म तन्त्रं प्रधानमस्य'[1013]। तथा च कैय्यटोऽपि- 'स्वशब्द आत्मवाची स्व आत्मा तन्त्रम् प्रधानं यस्य स प्रधानम् उच्यते'[1014]। अग्गवंसः कर्तृव्याख्यानचर्चामिमां तनोति भासमानेषु कल्पितेषु च पदार्थेष्वपि कर्तृत्वं निरूपयति- 'असन्तं सन्तं वा कप्पीयति, तञ्च....ससविसानं तिठ्ठति, उदुम्बरपुप्फं विकसति।[1015] भर्तृहरिः कारकत्वं व्याकरणशास्त्रीयं बुद्धिव्यवसायं वदति-

साधनव्यवहारश्च बुध्यावस्थानिबन्धनः।
सन्नसन् वार्थरूपेषु भेदो बुध्या प्रकल्प्यते॥[1016]

मोग्गलानः कत्तरकारकविधानं करोति न व्याचष्टे- कत्तुकरणेसु ततिया, कत्तरि ल्तुणका[1017]।

कत्तरभेदाः-

अग्गवंसः त्रिविधं कत्तरभेदं वक्ति सद्दनीतौ- शुद्ध-हेतु-कर्मकर्तृ (कम्मकत्ता)[1018] इतिवत्। शुद्धकर्ता सः अस्ति यः स्वयमेव क्रियां सम्पादयति। हेतुः यथा देवदत्त यज्ञदत्तं गमयति।[1019]

---

1011 कच्चा. वण्णना. २८३

1012 पा. सू. १/४/५४

1013 काशिकापदमञ्जरी 583, हेलाराज 312.2 (deokar P 271/2)

1014 महाभाष्यप्रदीपः 2:436

1015 अभिनिप्फादनलक्खणं कत्तुकारकम्

1016 वा. प. ३/७/३

1017 मोग्ग. सू २/१८, २/३३

1018 सद्द ५४८

1019 यो स्यामेव किरियं करोति स सुद्धकत्ता नाम, तं यथा- पुरिसो मग्गं गच्छति..... यो अञ्ञं कम्माणि योजेति, सो हेतुकत्ता नाम,... यञ्ञादत्तो देवदत्तं गमयति।

कच्चायनः प्रेरककर्तारं व्याचष्टे 'यो कारेति स हेतु'[1020]। अग्गवंसः तद्व्याख्यानं विषदयति- 'यो कारेति यो वा उपट्ठापयति, सो हेतु'[1021]। तथैव कच्चायनवण्णनेऽपि-'अञ्ञब्यापारं पटिच्च गमनादिकं क्रियं हिनोति पवत्ततीति हेतु।

कर्मकर्तृविषये अग्गवंसः वदति यत् कर्म यदा कर्तृवद् उपस्थाप्यते यथा तदेव क्रियाया: निर्वाहकः स कर्मकर्ता इति[1022]। अग्गवंसः कत्तरभेदं इतोऽप्यधिकतरं विषदयितुकामः तत् पञ्चधा विभनक्ति। असौ अभिहित कत्ता, अनभिहित कत्ता इतिवद् भेदद्वयमधिकमुपस्थापयति।[1023]

संस्कृते कर्त्ताशब्दः ऋग्वेदादिभ्यः उपलभ्यते। व्याकरणे तु पारिभाषाशब्दत्वेन पाणिनिनैव प्रथमं प्रयुक्तः स्वतन्त्रः कर्तेति। काशिकायामेतत्स्पष्टीकृतम्- वक्ता वाक्ये यस्य स्वातन्त्र्यं निरूपयति स इति[1024]। शर्ववर्म्ममतेन यः कर्तृरूपेण कार्यं सम्पादयति सः कर्त्ता भवति। 'यः करोति स कर्ता[1025]। संस्कृतव्याकरणपरम्परायामपि हेतुकर्ता, कर्मकर्ता च विवृतौ। पाणिनेः मतेन प्रेरकः कर्ता भवति- तत्प्रयोजको हेतुश्च[1026]। शर्वश्च- 'कारयति यः स हेतुश्च' इति ख्यापयति। इयं परिभाषा कच्चायनस्य परिभाषया सह साम्यं भजते[1027]।

संस्कृतव्याकरणानि अपि कर्त्तुरन्यं भेदद्वयं वदन्ति- हेतुकर्त्ता, कर्मकर्ता च। पाणिनिः प्रेरकं हेतुकर्त्तारं वदति- 'तत्प्रयोजको हेतुश्च'[1028]। शर्वमतेन- 'कारयति यः स हेतुश्च'। यः अन्य कार्यं कर्तुं प्रेरयति सः अपि कर्ता भवति[1029]। तत्र दुर्गसिंहकृतायां कातन्त्रवृत्तौ कच्चायनवुत्तावपि इदं प्रतिपाद्यते-

तमेव कर्तारं यः कारयति स हेतुसंज्ञो भवति चकारात् कर्तृसंज्ञा च[1030]।

यो कत्तारं कारेति सो हेतुसञ्ञो होति कत्ता च[1031]।

---

[1020] कच्चा २८४

[1021] सद्द. ५५०

[1022] यो पन परस्स किरियं पटिच्च कम्मभूतो पि सुकरत्ति सयम् एव सिज्झन्ति विया होति। सो कम्मकत्ता नाम... सयमेव कटो कारयति। (सद्द. ५४८)

[1023] २७२ देवकर

[1024] स्वतन्त्र इति प्रधानभूत उच्यते (काशिका १/४/५४)

[1025] कात्यायन २/४/१४

[1026] पा.सू. १/४/५५

[1027] कच्चा. २८३

[1028] पा.सू. १/४/५५

[1029] कात्या. २/४/१५

[1030] कातन्त्र दुर्गसिंहवृत्ति 2/4/15

पाणिनिः कर्मकर्तृसंज्ञां अचः कर्मकर्तरि[1032] इति सूत्रे प्रयुनक्ति। अस्या व्याख्यानम् अनेन कर्मवत् कर्मणा तुल्यक्रियः[1033] इत्यत्र व्यधायि। अग्गवंसेन कृतं व्याख्यानं महाभाष्येऽपि उपलभ्यते[1034]।

कम्म

कम्म कार्ये कृत्ये वाप्यर्थे भवति। व्याकरणे पारिभाषिकसंज्ञा रूपेण इदं प्रयुज्यते। अठ्ठकथासु अस्य स्थाने उपयोग इति संज्ञा प्रयुक्ता अस्ति। उपयोगस्य अर्थः संयोगः, समानता, व्यापारः, प्रवर्तनम् इत्यादि भवति। जैनेन्द्रव्याकरणे (JV) अपि कर्मार्थे उपयोगसंज्ञा प्रयुक्ता[1035]। कच्चायन कम्मसंज्ञां व्याचष्टे- 'यं करोति तं कम्मम्'[1036] इति। कात्यायनः स्पष्टयति- यत् क्रियते तत् कर्म। यत्किमपि केनचित्सम्पाद्यते तत् कर्म इति[1037]। सद्दनीतेः अनुसरम्- 'यं कुरुते यं वा पस्सति, तं कम्मम्'[1038]। अग्गवंसः इदं स्पष्टयति यत् क्रियते (करीयते) तत् कर्म। यत् किमपि क्रियायाः विषयभूतं क्रियया वा यत् विषयीकृतं तत् कर्म भवति[1039]। पाणिनेः कर्मपरिषाया: समीपम् अस्ति एषा परिभाषा। पाणिन्यनुसारं क्रियया कर्त्तुः अभीप्सिततमं कर्म भवति- 'कर्तुरिप्सिततमं कर्म'[1040]। काशिकानुसारं- क्रियया कर्त्रा सम्बद्धुमभीष्टं कर्म भवति।[1041]

मोग्गलानः कम्मसंज्ञामेतेषु सूत्रेषु प्रयुनक्ति- कम्मे दुतीया[1042], तस्स च भावकम्मेसु त्ततात्तण्यनियणिया[1043], क्यो भावकम्मेस्वपरोक्खेसु मानन्तत्यादिसु[1044] इत्यादिषु संज्ञायाः व्याख्यानं विनैव। मोग्गलानवुत्तौ अस्याः व्याख्यानमस्ति- 'करीयति कत्तुक्रियायाभिसम्बन्धीयतीति कम्मम्'। कर्त्रा क्रिययाभिसम्बद्धुमभीष्टतमं कर्म भवति।

---

1031 कच्चा वु २४८

1032 पा.सू. ३/१/२

1033 पा सू ३/१/८७

1034 महाभाष्यम् ३/१/८७

1035 जैनेन्द्रव्याकरणम् 214

1036 कच्चा. २८२

1037 यो वा करोति यं पस्सति, सुनाति तं कारकं कम्मसञ्ञं होति। कच्चा. वु. २८२

1038 सद्द. ५५१

1039 करीयते तं किरियाय पापुणीयते ति कम्मम्। किरियापत्तिलक्खणं कम्मकारकम्। सद्द. ५५१

1040 पा.सू. १/४/४९

1041 कर्तुः क्रियया यदासुमीप्सिततमं तत्कारकं कर्मसंज्ञं भवति। काशिकावृत्तिः १/४/४९

1042 मोग्ग. २/२

1043 मोग्ग. ४/५९

1044 मोग्ग. ५/१७

कम्मभेदाः-

अग्गवंसः कम्मभेदान् त्रिधा सप्तधापि व्याकरोति। प्रथमं यथा-

१. निब्बातनीयम् – उत्पादनीयं कर्म्म

२. विकरणीयम् – विकारेण परिवर्तनीयं कर्म्म

३. पापणीयम् – प्राप्तव्यं कर्म्म

अपरं च यथा-

१. इच्छितकम्म – वाञ्छितं कर्म्म

२. अनिच्छितकम्म – अवाञ्छितं कर्म्म

३. नेविच्छितनानिच्छितकम्म – न वा वाञ्छितं न अवाञ्छितं कर्म्म

४. अकथितकम्म, कथितकम्म – अनभिव्यक्तं, व्यक्तं वा कर्म्म

५. कत्तुकम्म – कर्तृकर्म्म

६. अभिहितकम्म – क्रियया (आख्यातेन) अभिहितं कर्म्म

७. अनभिहितकम्म – क्रियया (आख्यातेन) अनभिहितं कर्म्म[1045]

ई. खर्स इति विदुषोऽनुसारं अस्य विभाजनस्य स्रोतः भर्तृहरेः वाक्यपदीयमस्ति। तत्र इदं व्याख्यातम्-

निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम्।
तत्रेप्सितमं कर्म चतुर्धान्यत्तु कल्पितम्॥
औदासिन्यं यत् प्राप्यं यच् च कर्तुरनीप्सीतम्।
संज्ञानतरैनाख्यातं यद् यच्चाप्यनयपूर्वकम्॥[1046]

अग्गवंसमतेन रथं करोति, सुखं जनयतीत्यादीनि निब्बतनीय-कम्म अस्य उदाहरणानि। विकारणीय-कम्मस्य अयं भेदद्वयं करोति-

- परिच्चत्तकारण कम्म – येन उपादानकारणस्य रूपं परित्यक्तम्।
- अपरिच्चत्तकरण कम्म – येन उपादानकारणस्य रूपं न परित्यक्तम्।

---

[1045] Kahrs E., Exploring the Saddanlti, a monograph on Saddanlti' s Karakakappa, 1992 p. 42

[1046] वा.प. ३/७/४५-४६

तत्र प्रथमे कर्म कारणस्यलोपेन उद्भूतं भवति। यथा काष्ठस्य लोपेन अङ्गारकाः उद्भवन्ति। ते हि परिच्चत्तकारणकम्मभूताः। अपरे च उपादानकारणस्य लोपः न सन् आकृतिमात्रं परिवर्त्यते। यथा सुवर्णतत्वम् अक्षुण्णं सत् आभरणानि तस्मादाभरणानि कृतानि भवन्ति। तानि च अपरिच्चत्तकारणकम्मभूतानि।

पापणीयकम्म तु क्रियया क्रियाविषयभूतवस्तौ अपरिवर्तने भवति। इदञ्च वाक्यपदीयविवरणेन[1047] ज्ञातं भवति-

यद् असज्जायते सद् वा जन्मनि यत् प्रकाश्यते।
तन्निवर्त्यं विकार्यम् च कर्म्म द्वेधा व्यवस्थितं॥
प्रकृत्युच्छेदसम्भूतं किञ्चित्काष्ठादिभस्मवत्।
किञ्चिद्गुणान्तरोत्पत्या सुवर्णादिविकारवत्॥
क्रियाकृता विशेषणं सिद्धिर्यत्र न गम्यते।
दर्शनादनुमानाद्वा तत् प्राप्यमिति कथ्यते[1048]॥

ई. खर्स इति विद्वान् अग्गवंसः कर्मभेदान् व्याख्यानं विना प्रतिपादितवान् इति स्थापयति। तदनुसारं भर्तृहरिणा इव अग्गवंसोपि इदं व्याख्यातुमशक्नोत्। भर्तृहरिणा निवर्त्यं विकार्यं कर्मभेदौ[1049] वाक्यपदीये व्याख्यातौ-

सति वा विद्यमाना वा प्रकृतिः परिणामिनी।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वम् प्रचक्षते॥
प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा।
निर्वर्त्यं च विकार्यं च कर्म शास्त्रे प्रदर्शितम्॥

अस्येदमपि कारणं शक्यते यद् अग्गवंसस्य कर्मभेदव्याख्यानं पूर्णतया वाक्यदीपये आश्रितं न सत् दुर्गसिंहस्य टीकायाम् आश्रितं स्यात्[1050]।

कर्मशब्दः क्रियार्थकः ऋग्वेदेऽपि उपलभ्यते। तस्य प्रयोगेऽपि पाणिनिना प्रतिपादितनियमानानुकूल एव। व्याकरणस्य परिभाषात्वेन अस्य प्रथमः प्रयोक्ता

[1047] वाक्यपदीयम् ३/७/४९-५१

[1048] वा.प. ३/७/ ४९-५१

[1049] वाक्यपदीयम् ३/७/४७-४८

[1050] देवकर म. अ. पृ. २७७

पाणिनिरेव- ‘कर्तुरिप्सिततमं कर्म’[1051]। क्रियया कर्ता यदिच्छति तत्कर्म इति। कातन्त्रानुसारं यत् क्रियते तत्कर्म इति।[1052]

तत्र आप्यमिति तु जैनेन्द्रस्य (J) चिन्तनम्। ‘कर्त्राप्यं कर्म’[1053]। इदमपि तेन चान्द्रव्याकरणात् स्वीकृतमिति भाति। चन्द्रगोमी भावकर्मणोः[1054] इति सूत्रस्थाने ‘भावाप्ययोः’ सूत्रे आप्यशब्दं कर्मणोऽर्थे पठति[1055]। असौ हि कर्मन् शब्दं सकृदेव पठति शास्त्रे- अभावकर्मणोरानो ये[1056]। कर्मार्थे असौ कदाचिद् आप्यशब्दं कदाचिच्च व्याप्यशब्दं पठति। यथा- ‘वेह शब्दाप्यात्’[1057], अवप्यात्[1058], कर्तृस्थमूर्ताप्यात्[1059]।

कर्मभेदाः-

पाणिनेः परम्परा कर्म निवर्त्य, विकार्य, प्राप्य एतद्वत् विभनक्ति। वार्तिककारः व्याचष्टे- ‘कर्माणि निर्वर्त्यमानविक्रियमाणे चेद् वेदाध्यनादीनाम् उपसंख्यानम्’[1060]। तथा हि ईप्सितानीप्सितोदासीनाकथितादय: कर्मभेदा पाणिनेः सूत्रेषूपलभ्यन्ते।[1061] भर्तृहरिः अकथितकर्म अपि स्पष्टयति- ‘संज्ञान्तरारैरनाख्यातम्’ इत्यादिकारिकया। अर्थात् कारकान्तरे यन्न निर्दिष्टं तदपि कर्म (करकम्) भवति।

अग्गवंसनिर्दिष्टं कत्तुकम्म पाणिनीयपरम्परायां नोपलभ्यते। तथा हि ‘अन्यपूर्वक’ अर्थात् पूर्वमन्यत् कारकं ततः किञ्चिदन्यत् (कर्म) इदं सद्दनीतावनुपलब्धम्।

करणकारकम्

करणशब्दः कारणार्थः निर्माणार्थकः करणार्थकः (क्रियार्थकः) अस्ति, व्याकरणे च अस्य पारिभाषिकः प्रयोगः कारकविशेषसंज्ञायाम्[1062]।

---

1051 पा.सू.१/४/४९

1052 कतन्त्र ४/४/१३

1053 जैनेन्द्र व्या. 1/2/145

1054 पा.सू. १/३/१३

1055 चा. व्या १/१/७८, ५/३/७३

1056 चा. व्या ५/३/१६८

1057 चा. व्या. १/४/८०

1058 चा. व्या. १/४/८१

1059 चा. व्या. १/४/८३

1060 कात्या. वा. ३/२/१ (कर्मण्यण् इत्यत्र)

1061 पा. सू. १/४/४९-५१

1062 पेतवत्थु-अट्ठकथा 33; विनयाट्ठकथा 25. 53; J 3.98: V.444; विनयाट्ठकथा 304 Dhs A 48

कच्चयनानुसारम् 'येन वा करीयते तं करणम्' इति व्याख्यातम्। अथवा यत् कार्ये साधकं भवति तत् करणम्[1063]। वुत्तावप्यस्य स्पष्टीकरणं क्रियते- येन साधनेन कश्चित् करोति, येन साधनेन कश्चित् पश्यति, येन साधनेन कश्चित् शृणोति, तत् करणं भवति[1064]। इदं कात्यायनः अपि स्वशास्त्रे व्याकरोति[1065]।

सद्दनीतौ[1066] अपि कातन्त्रेण[1067] साम्यं दृश्यते। तत्र वुत्तावपि इदं पठ्यते- 'येन कुरुते वा पस्सति, तम् पि करणम्'[1068]।

अग्गवंसः व्याचष्टे येन किञ्चित् कार्यं सम्पादितं भावति अथवा यस्य साहाय्येन किञ्चित् कार्यं सम्पाद्यते तत् करणं भवति।[1069] अग्गवंसः कच्चायनस्य व्याख्यानं पाणिनीयव्याख्यानेन 'साधकतमं कारणमित्यनेन'[1070] सह सम्बध्नाति। अग्गलानानुसारं यतः कारकाणि सर्वाण्येव क्रियायाः साधकानि भवन्ति तेषु यत् अधिकतमं साधकं भवति तत् कारकं करणं भवति।[1071] इदमेव कारणं यत् पाणिनिना अत्र तमप्प्रत्ययेन व्याख्या कृता। काशिकाऽपि इदं स्पष्टयति[1072] यत् क्रियायाः साधनेषु यत् साधनं सर्वाधिकमहत्त्वपूर्णं भवति तत् करणम्[1073]। महाभाष्येऽपि अस्य प्रथमं चर्चा उपस्थापिता[1074]। करणशब्दं प्रयुञ्जानो मोग्गलानः सूत्रयति 'कत्तुकरणेसु ततीया'[1075]। वुत्तौ इमा संज्ञा व्याख्यानं विनैव प्रयुज्यते- 'बहुलाधिकारा करणादिसु पि भवन्ति'[1076]।

करणभेदाः-

अग्गवंसः करणस्य द्विधा विभाजनं करोति- अज्झातिकं, बाहिरं च। इदं विभाजनं दुर्गसिंहटीका, कातन्त्रवृत्तिपञ्जिका कातन्त्रे (Kt. 2/4/12) एष्वपि उपलभ्यते-

---

1063 कच्चा. २८१

1064 येन वा करीयति, येन वा पस्सति येन वा सुणाति, तं कारकं करणसञ्ञं होति। कच्चा. वु. २८१

1065 कात्या. वा. २/४/१२

1066 सद्दनीति ५५२

1067 कच्चा २८१

1068 कच्चा. वुत्ति २८१

1069 कारियति किरियं जनेति अनेन कत्तुनो उपकरणभूतेन वत्थुना ति करणम्।

1070 पा. सू. १/४/४२

1071 एत्था च, सति पि सब्बकारकानं किरियासाधकत्ते। येन कुरुते ति आदि विसेसेत्वा वचनं कत्तुपरणभूतेसु साधनेसु साधकतमस्सेव गहणत्थं करणकारकम्।

1072 क्रियासिद्धौ यत् प्रकृष्टोपाकरणं विवक्षितं साधकतमं करणकारकम्।

1073 काशिकावृत्तिः १/४/४२

1074 महाभाष्यम् १/२/४२

1075 मोग्ग. २/१८

1076 मोग्ग. वु. ५/२७

तं दुविधम् अज्झतिकबाहिरवसेन[1077]।

तच्च करणं द्विविधम् बाह्यम् आभ्यान्तरं च[1078]।

आज्झतिक-बाह्यशब्दौ बौद्धसाहित्ये उपलभ्यतः स्कन्ध-आयतन-धातूनांविवरणप्रसङ्गे।

करणशब्दः क्रियार्थकः ऋग्वेदे अस्ति। व्याकरणसम्प्रदायेषु अपि सर्वेषु अयं संज्ञाविशेषत्वेन प्रयुज्यते। मुग्धबोध मध्ये अयं नास्ति तत्र 'धा' संज्ञा क्रियते।

शर्वः करणं व्याचष्टे- 'येन क्रियते तत् करणम्'[1079]। चन्द्रगोमी करणसंज्ञामेव करणार्थे प्रयुनक्ति।[1080]

सम्पदानं-

सपदानं अठ्ठकथासु उल्लिखितं नास्ति। किन्तु व्याकरणे इदं कारकविशेषस्य संज्ञात्वेन प्रयुज्यते।[1081] अग्गवंसः इदं स्पष्टयति यथा- सम्प्रदानक्रियायां यस्मै दीयते तत् सम्प्रदानम्[1082]। मोग्गलानवुत्तौ स्पष्टीक्रियते- 'यस्मा सम्मा पदीयते'[1083]। कच्चायनवण्णनायां- 'सम्मा दीयते अस्सा ति सम्पदानम्'[1084]। काशिकावृत्तेर्न्यासटीकायामपि 'सम्यक् प्रकर्षेण दीयते'[1085] इत्येव समर्थयति। कच्चायनः सम्प्रदानं व्याचष्टे- 'यस्स दातुकामो रोचते धारयते वा तं सम्पदानम्'[1086]। कात्यायनः पुनर्पिस्पष्टयति- 'यस्मै दित्सा रोचते धारयते वा तत् सम्प्रदानम्'[1087]। अत्र कच्चायनः दित्सां दातुकमो इत्येतद्वत् प्रयुनक्ति। अग्गवंसश्च रोचते इति पदं रुच्चति इतिवत् प्रयुनक्ति धारयति इति पदं च अपाकरोति। सद्दनीतौ एतत् पठ्यते- 'यस्स दातुकामो यस्स यस्स वा रुच्चति तं सम्पदानं'[1088]। अन्यथाप्यसौ विकल्पं वक्ति- 'यस्स दातुकामो यस्स वा रुच्चति

---

1077 सद्द. ५५२

1078 दुर्गसिंहटीका, कातन्त्रवृत्तिपञ्जिका (DT, KVP) 2/4/12

1079 कात्या. वा. २/४/१२

1080 चा.व्या. २/१/६३

1081 उपयोगत्थे। जै.व्या. २१४, करणत्थे। जै. व्या. २३७

1082 सम्मा प्रकारेण अस्सा ददाति ति सम्पदान पटिग्गाहको। सद्द. ५५३

1083 मोग्ग. वु. २/२६

1084 कच्चायनवण्णना 278 तथा रूपसिद्धिः 581: सम्मा पकारेण ददाति अस्सा ति सम्पदानम्।

1085 काशिकावृत्तौ न्यासःKasiN 1:546

1086 कच्चा. २७८

1087 कात्या. वा. २/४/१०

1088 सद्द. ५५३

यस्स वा खमति यस्स वा धारयते, तं कारकं सम्पदानं होति'[1089]। मोग्गलानः व्याख्यानं विनैव 'चतुत्थी सम्पदाने'[1090] इति सूत्रं करोति।

सम्पदानभेदाः- अग्गवंसः सम्पदानं त्रिषु भेदेषु विभनक्ति-

- अनिराकरणं सम्पदानं
- अज्झेषणं सम्पदानं
- अनुमति सम्पदानं

विभाजनमिदं वाक्यपदीयोक्तवर्णनसमानमेव[1091]। तत्रोच्यते सम्प्रदानं तद् भवति यदा कर्ता क्रियया किञ्चित् दानेन वस्तु आदिकम् अन्यस्मै प्रापयति[1092]। अज्झेसन इत्यर्थे 'प्रेरण'संज्ञायाः प्रयोगः प्राप्यते कात्यायानस्य शास्त्रे[1093]। तदनुसारं सम्प्रदानं तदेव भवति यत् दत्तवस्तुनः अस्वीकारं न करोति अथवा दानक्रियायाः कारणभूतं सत् दानेन सह अस्य सहमतिः भवति[1094]।

सम्प्रदानसंज्ञायाः प्रयोगः पाणिनेः शास्त्रे प्रथमतया दृश्यते। वाजसनेयप्रातिशाख्ये (VP) परम्परायाः वृध्यर्थम् अयं शब्दः अस्ति। कौषितकी उपनिषदि अपि उपहार (gift) इत्यर्थे अयं शब्दः अस्ति। मुग्धबोधव्याकरणे (Mu) अस्याः स्थाने 'भा' संज्ञा क्रियते। अन्यव्याकरणेषु तु सम्प्रदानमेव।

पाणिनेः शास्त्रे सम्प्रदानस्य व्याख्या क्रियते- 'कर्मणा यमभिप्रैति स सम्प्रदानम्'[1095]। अर्थात् क्रियया कर्ता यं लक्ष्यीकरोति स संप्रदानं भवति। महाभाष्यकारः अत्र वदति- 'क्रियाग्रहणमपि कर्तव्यम्'[1096]। शर्ववर्मा सम्प्रदानमधिकृत्य वक्ति- 'यस्मै दित्सा रोचते

---

1089 सद्द.५५३

1090 मोग्ग २/२६

1091 वा.प. ३/७१२९

1092 अनिराकरणात् कर्तुस्त्यागाङ्गं सम्प्रदानकारकम्।

1093 कातन्त्रे दुर्गसिंहटीका कातन्त्रवित्तिप्रकाशिका च 2/4/10

1094 अनुमन्त्रनिराकर्तृप्रेरकं त्यागकारणम्। व्याप्येनाप्तं ददातेसु सम्प्रदानम् प्रकृतितम्॥ कातन्त्रे २/४/१०

1095 पा. सू. १/४/३२

1096 महाभाष्यम् १/३३०

धारयते वा तत् सम्प्रदानम्’[1097]। चन्द्रगोमी सम्प्रदानस्य व्याख्यानं विनैव ‘सम्प्रदाने चतुर्थी’[1098] इति शास्ति।

अपादानं-

अप+आ+दा इत्यस्मात् अपादानशब्दः निष्पद्यते। अस्य अर्थः नीत्वा गमनं अथवा नयनं भवति। अयं शब्दः तिपिटके नास्ति। व्याकरणे संज्ञारूपेण प्रथमं कच्चायनेन अयं प्रयुक्तः। अठ्ठकथासु अस्मिन्नर्थे निस्सक्क इतिशब्दः प्रयुज्यते[1099]। अपादानस्य अर्थः बहिर्गमनं इति भवति। शर्ववर्मा अपादानं व्याख्याति- ‘यस्मादपेति भयमादत्ते वा तदपादानम्’[1100]। इदं व्याख्यानं कात्यायनीयव्याख्यानेन साम्यं भजते[1101] कच्चायनवुत्तौ दुर्गसिंहवृत्तौ च साम्यं द्रष्टुं शक्यते-

‘यस्मा वा अपेति, यस्मा वा भयं जायते, यस्मा वा आदत्ते, तं कारकम् अपादासञ्ञं होति’[1102]।

‘यस्मादपैति, यस्माद् भयम् भवति, यस्माद् आदत्ते वा, तत् कारकम् अपादानसंज्ञम् भवति’[1103]।

अग्गवंसः कच्चायनस्य व्याख्यां परिवर्तनेन प्रस्तौति- ‘यतो अपेति यतो वा आगच्छति. तत् अपादानम्’[1104]। अर्थात् कश्चित् यतः गच्छति अथवा यतः आगच्छति तत् अपादानं भवति। अग्गवंसः अपादानं भौतिकमानसिकरूपं निरूपयति।[1105] रूपसिद्धौ व्याख्यायते- अपेच्च एतस्मा आददाति ति अपादानम्[1106]। कच्चायनमुकुर्वाणः मोग्गलानः अपि अपादानस्थाने अवधि इति संज्ञां प्रयुनक्ति- ‘पञ्चम्यवधिस्मा’[1107]। ‘अनो’[1108] इत्यत्र मोग्गलानः अपादानं कारकं प्रतिपादयति।

---

1097 कातन्त्रम्. २/४/१०

1098 चा. व्या. २/१/७३

1099 जै.व्या. ४९८, विनयाट्ठकथा 152, 154, 180, 311, पेतवत्थु-अट्ठकथा 147, 221

1100 कच्चा. २७३

1101 कातन्त्रे २/४/८

1102 कच्चा. वु. २७२

1103 दुर्गसिंहवृत्तिः 2/4/8

1104 सद्द. ५५५

1105 अपेच्च इतो आददाति ति अपादानम्, इतो वत्थुतो कायवसेन चित्तवसेन वा अपगन्त्वा अञ्ञं गह्णाती ति अत्थो। सद्द. ५५५

1106 रूपसिद्धिः ५८१

1107 मोग्ग. २/२८

अपादानभेदाः-

अग्गवंसः अपादानस्य बहून भेदान् प्रतिपादयति। भौतिकमानसिकपदार्थनधिकृत्य द्विविधमपादानं भवति। तथा अपादानं स्थिरं गतिशीलं वेति त्रिविधं भवति। वाक्ये च अपादानं उक्तं वा अनुमितं वेति चास्य भेदद्वयं भवति[1109]।

दुर्गसिंहटीकायाम् अस्य द्वौ भेदौ प्रतिपादितौ[1110]। स्थिरात् गतिशीलाद् वा वस्तुनः पृथग्भावः अपादानस्य प्रकृतिं निर्धारयति। अपादानत्वं तु उभयत्र भवति[1111]।

अपादानस्य त्रयः भेदाः निर्धार्यन्ते-

- निद्दिट्ठविसयम्
- उपात्तविसयम्
- अनुमेयविसयम्

एषां सन्दर्भः वाक्यपदीये उपलभ्यते।[1112] क्रियाभिहितः आरम्भबिन्दुः गत्याः अपादानमिति[1113]।

अपादानसंज्ञा वैयाकरणैः स्वभाषिकसिद्धान्तानां पुष्टये आविष्कृता स्यात्। अष्टाध्याय्याम् एषा प्राथम्येन उपलभ्यते। अनुवर्तिभिरपि संप्रदायैरेषा स्वीकृता। मुग्धबोधे (Mu.) अस्याः स्थाने 'जा' संज्ञां करोति।

पाणिनिः 'ध्रुवमपायेऽपादानमिति' संज्ञामिमां परिभाषयति[1114]। अर्थात् पृथगभावे अस्य आरम्भबिन्दुः अपादानं भवति। शर्ववर्मा- 'यतोऽपैति भयमादात्ते वा तदपादानम्' अस्य इव व्याचष्टे[1115]। अर्थात् यतः किञ्चित् दूरं याति अथवा यस्मात् भयं भवति तत्

---

[1108] मोग्ग ५/४८

[1109] तम् पन अपादानं दुविधं-
कायसंगपुब्बकचित्तसंयोग-पुब्बकागमवसेन, तथा चलावधीनिच्चलावसेन; अथ वा पन तिविधं चलावधिनिच्चलावधिनेवच्चलावधिननिच्चलावधिवसेन। सद्द. ५५५

[1110] दुर्गसिंहटीका 2/4/8

[1111] न हि कायप्राप्तावेवपायः, किं तर्हीं, चित्तप्राप्तावपि संयोगनिवृत्तिर्यथैव हि चलस्याचलतो विश्लेषः एवमचलस्यापि चलतः, सोऽयम् उभयोः समानविश्लेषकारकभावः।

[1112] वाक्य. ३/७/१३६

[1113] निर्दिष्टविषयं किं चिद् उपात्तविषयं तथा। अपेक्षितक्रियं चेति त्रिधापादानमुच्यते॥ वा. प.

[1114] पा.सू. १/४/२४

[1115] कातन्त्रे 2/4/8

अपादानसंज्ञं भवति। चन्द्रगोमी अपादानस्यार्थे 'अवधि'संज्ञां पठति[1116]। 'अवधेः पञ्चमी' इत्यादौ।

ओकासकारकम्

ओकासशब्दः आकाशार्थवाची[1117] व्याकरणे संज्ञात्वेन अयं अधिकरणेऽर्थे प्रयुज्यते। कच्चायनस्य व्याकरणे अयं शब्दः प्रथमतया प्रयुक्तः। अठ्ठकथासु तु अस्मिन्नर्थे 'भुम्मा' इति संज्ञा उपलभ्यते।[1118] भुम्माशब्दः भूमीतिवैदिकशब्दः 'भूम्या'शब्दस्य प्राकृतरूपम्। भूमिवत् आधारभूतमित्यर्थः। कच्चायनः अग्गवंसश्च ओकाससंज्ञां व्याख्यातवान्- 'योधारो तमोकासम्' इति। यः आधारः तस्य ओकाससंज्ञा इति।[1119] कात्यायनस्य व्याख्यायाः अत्र किञ्चित् परिवर्तनम् अस्ति। अधिकरणस्थाने प्रयुक्तायाः ओकाससंज्ञायाः व्याख्यानं कुर्वन् अग्गवंसः वदति यत् क्रियायाः अन्यकारकाणां च आधारतत्वं अधिकरणं भवति इति[1120]। अत्र आधारः कारकं स्यान्न वेति चर्चा वाक्यपदीये कृता अस्ति[1121]। वाक्यपदीये इमा कारिका पठ्यते-

कर्तृकर्मव्यवविहितम् असाक्षाद्धारयत् क्रियाम्।
उपकुर्वत् क्रियासिन्धु शास्त्रेऽधिकरणं स्मृतम्॥

साक्षात् परोक्षं वा क्रियायाः अन्यकारकाणां वा धारणेन क्रियायाः यत् सहाय्यं भवति तत् व्याकरणशास्त्रे अधिकरणं कारकं भवति।

दुर्गसिंहः अस्मिन् विषये स्वग्रन्थे चर्चां करोति[1122]। अग्गवंसः आधारं ओकासम् इति संज्ञाकरणार्थं स्पष्टीकरणं करोति यत् देशकालयोरवकाशेषु काचित् क्रिया सम्पाद्यते अत एव अत्र ओकास इति संज्ञा।

कच्चायनः मोग्गलानश्च आधार इति संज्ञां कुरुतः अधिकरणस्थाने- 'सत्तम्याधारे'[1123] इतिवत्। वुत्तौ 'गमनत्थाकम्मकाधारे च'[1124]। इत्यत्र- 'क्रियाधारभूतकत्तुकम्मानं धारणेन

---

[1116] चा. व्या. २/१/८१

[1117] दीघनिकाये १/३४, विसुद्धिमग्गे १८४

[1118] खुद्दक अट्ठकथा १०६, १११, २२४. संयुत्त अट्ठकथा १४०, २१०, ३२१, ४३३. पेतवत्थु-अट्ठकथा 33.

[1119] कच्चा. २८०, सद्द. ५७२

[1120] यो कत्तुकम्मसवेतानं निसज्जपचनादिकिरियानम्। आधारकट्ठेन आधारो, तं कारकम् ओकाससञ्ञं होति॥

[1121] याक्यपदीयम् ३/७/१४८

[1122] दुर्गसिंहटीका 2/4/11

[1123] मोग्ग. २/३४

[1124] मोग्ग. ५/५९

यो क्रियायाधारो तस्मिन्’[1125]। मोग्गलानवुत्तौ च अधिकरणसंज्ञायाः अपि प्रयोगः अस्ति- ‘अधिसिठासानम् पयोगेधिकरणे कम्मवचनिच्छा अक्खेसु दिब्बतीति कम्मकरणाधिकरणवचनिच्छा’[1126]। अग्गवंसः सद्दनीतौ अधकरणसंज्ञां प्रयुनक्ति- ‘कत्तुकरणाधिकरणेषु च’[1127]। कच्चायनः ‘कत्तुकरणप्पदेसेसु’[1128] इत्यत्र पदेसशब्दः अपि प्रयुक्तः अस्ति।

ओकासभेदाः-

कच्चायनवुत्तौ[1129], सद्दनीतौ[1130], मोग्गलानवुत्तौ[1131] च आधारस्य चत्वारः भेदाः क्रियते- ब्यापिका (pervading), ओपदेसिका (caused by close cantact), वेसयिक (belonging to a particular domin), सामीपिक (caused by nearness) इतिवत्।

तिलेसु तेलम् इदं ब्यापिक आधारस्य उदाहरणम् अस्ति। मोग्गलावुत्तौ इदं स्पष्टीक्रियते-

आसाने उपविट्ठो **संघो** अयं ओपसिलेसिक आधारः।
भूमिसु मनुस्सा चरन्ति अयं वेसयिक आधारः।
वने हत्थिनो चरन्ति इति च सामीपिक आधारः।
व्यापिनो तिलदध्यादि कटो ओपसिलेसिको।
समीपिको तु गङ्गादि, आकासो विसयो मतो॥[1132]

संस्कृतवैय्याकरणा अधिकरणस्य त्रिधा विभाजनं कुर्वन्ति सामीप्यं विहाय। पतञ्जलिः स्पष्टयति[1133]- आधिकरणं व्यापकम्, औपश्लेषिकम्, वैषयिकं च त्रिविधं भवति[1134]। इमं च विभाजनं पदमञ्जरी, न्यास,सिद्धान्तकौमुदी, बालमनोरमा, तत्त्वबोधिनीप्रभृतयः

---

1125 मोग्ग. वुत्ति २/३४

1126 मोग्ग. वु. २/२

1127 सद्द. ११३४

1128 कच्चा. ५५०

1129 कच्चा. वु. २८०

1130 सद्द. ५७२

1131 मोग्ग. वुत्ति १/१४

1132 मोग्ग. वु. १/१४

1133 अधिकरणं नाम त्रिप्रकारकं व्यापकम् औपश्लेषिकं वैषयिकम् इति। महाभाष्यम् ६/१/७२

1134 महाभाष्यम् ६/१/७२

व्याकरणग्रन्थाः अनुसरन्ति। रामचन्द्रकृता प्रक्रियाकौमुदी इदं विभाजनं चतुर्धा करोति- औपश्लेषिक-सामीपिको-विषयो-व्याप्तो इत्याधारो चतुर्धा।[1135] अग्गवंसपूर्वं सिंहलविद्वान् धर्मकीर्तिः अपि चतुर्विधम् अधिकरणविभाजनं समर्थयति[1136]। असौ हि सामीप्यस्थाने प्रत्यासत्तिशब्दं प्रयुनक्ति। तदनुसारम् अधिकरणम् औपश्लेषिकम्, वैषयिकम्, व्यापकम् प्रत्यासत्तिश्च[1137]। इदं च स्पष्टयति- 'प्रत्यासत्तिः सामीप्यम्-गङ्गायां घोषः' इत्युदाहरणेन[1138]। अत्र सप्तम्या घोषस्य गङ्गायाः सामीप्यं ज्ञायते।

अग्गवंसस्य अधिकरणविभाजनं दुर्गसिंहः व्याचष्टे कातन्त्रे[1139] दुर्गसिंहः स्पष्टयति-

'*स आधारश्चतुर्विधः- औपश्लेषिकः, अभिव्यापकः, वैषयिकः, सामीपिकश्चेति*'।

संस्कृतव्याकरणे ओकाससंज्ञा न प्रयुज्यते। तत्र अधिकरणसंज्ञायाः प्रयोगोस्ति। अस्यार्थः कस्यचिदुपरि क्रियायाः सम्पादनमिति। अस्याः प्रथमं प्रयोगः पाणिनेः अष्टाध्याय्याम् अस्ति। पाणिनिः अधिकरणं व्याख्याति- 'आधारोऽधिकरणमिति'[1140]। अर्थात् क्रियादीनामाधारः अधिकरणं भवति। शर्वश्च- 'य आधारस्तमधिकरणम्' इति अधिकरणव्याख्यानं करोति।[1141] अर्थात् देशकालयोः क्रियाया आधारौ अधिकरणं भवतः।

चन्द्रगोमी आधारशब्दं प्रयुनक्ति अधिकरणस्थाने- 'सप्तम्याधारे'[1142] इति।

सामी/सम्बन्धः-

कारकाणां विवेचने कच्चायनः अग्गवंसश्च वाक्यगतसंबन्धविवेचनाय सामी इति सम्बन्ध इति वा संज्ञामुपस्थापयतः। सामीशब्दस्यार्थः स्वामी-शासकः-प्रभुः इत्यादिकं भवति[1143]। व्याकरणे तु स्वाम्य-स्वामीसम्बन्धबोधकोऽयं शब्दः। कच्चायनः इदं व्याख्याति- 'यस्स वा

---

[1135] प्रक्रियाकौमुदी (PK) 80

[1136] Rup. M Rangacharya ed. 1916: 162, 12-13

[1137] स आधारः औपश्लेषिक-वैषयिक-व्यापक-प्रत्यासत्ति-भेदवत् चतुर्विधः।

[1138] रूपावतारः १६२, १७-१८

[1139] कातन्त्रे 2.4.11

[1140] पा.सू. १/४/४५

[1141] कात्या. १/४/११

[1142] चान्द्र व्या. २/१/८८

[1143] विनय. १/३०१, सयुंत्त. ८३, महावंस (Mhvs) ३७

पतिग्गहो तं सामी’[1144]। अर्थात् यः प्रतिग्रहं (अधिकारम्) करोति स स्वामी इति। पतञ्जलिः राज्ञः पुरुषः इत्युदाहरणेन इमं स्वाम्य-स्वाम्यसम्बन्धं स्पष्टयति[1145]। कात्यायनश्च ‘स्वाम्यादि’शब्दप्रयोगेण[1146] सम्बन्धं स्पष्टयति। अग्गवंसानुसारं ‘यस्स सं यस्स वा पति, तं सामी’[1147]। यः सम्पत्तेः स्वामी यस्य वा कश्चित् स्वामी तत्रायं सम्बन्धः अंशाशीनां चापि बोधः। अस्य च परिभाषायां वा शब्दः इतोऽप्यधिकसम्बन्धानां ज्ञापनाय स्वीक्रियते[1148]। सामि शब्देषु अनेकविधसम्बन्धान् बोधयति।

पारम्परिकवैय्याकरणाः सामि इत्यस्य कारकत्वं नाङ्गीकुर्वन्ति-

‘क्रियाभिसम्बधाभावा न्न एसा कारकता सम्भवति’।

अग्गवंसः सामि इत्येनं कारकत्वेन क्वचित् प्रसङ्गे कारकत्वेन गणयति- ‘पितुस्स सरति’, ‘पितुस्स इच्छति’ इत्यादिषु[1149]।

अग्गवंसः ‘सम्बन्धद्वयाधारे’ सूत्रे सामि इत्यर्थे सम्बन्धसंज्ञां प्रयुनक्ति[1150]। असौ द्विविधं सम्बन्धं वदति- ‘विसेसन-विसेसितब्बानं वा सम्बन्धानं सम्बन्धो’। अर्थात् सम्बन्धः विशेषणविशेष्ययोः आश्रितः भवति[1151]।

इयं व्याख्या वाक्यपदीयस्य व्याख्यया सम्बद्धुं शक्यते तत्र दुर्गसिंहः[1152] इदं स्पष्टयति। शब्दानां विशिष्टं सम्बन्धः द्योतयितुं अंशभावं विशेषणभावं वा संबन्धविधानं क्रियते व्याकरणे[1153] इति।

मोग्गलानः तमनुसरन् स्वशास्त्रे सम्बन्धसंज्ञां करोति सामिस्थाने- ‘छट्ठी सम्बन्धे’[1154] इति। अर्थात् नामसु सम्बन्धबोधाय षष्ठीविभक्तिः भवति। इदं सूत्रं चन्द्रगोमिनः ‘षष्ठी

---

1144 कच्चा. २८५

1145 महाभाष्यम् २/३/५०

1146 कात्या. २/४/१९

1147 सद्द. ५७५

1148 तत्रैव वृत्ति- यस्स अत्थजातस्स धनं यस्स वा पति सामि, यस्स वा समूहो यस्स वा अवयवो, तम् अत्थजातं सामिसञ्ञं होति, इधा पि वासद्दो विकप्पनत्थो, तेन अञ्ञे पि अत्था योजेतब्बा।

1149 सद्द. ५७५

1150 सद्द. ६१४

1151 सद्द. ६१३

1152 कातन्त्रे 2/4/19

1153 सामान्यवाचका हि शब्दाः प्रकरणमन्तरेण विशेषे वर्तितुं नोत्सहन्ते इति। परतस्तु भेद्यादन्तरङ्गत्वाल्लिङ्गार्थमात्रे प्रथमा अस्तीति भेदकात् षष्ठी भवति।- तयैवोभयगतसम्बन्धस्योन्योन्यमिष्यते। द्विष्ठो यद्यपि सम्बन्धः षष्ठ्युत्पत्तिस्तु भेदकात्॥ वा. प. ३/७/१५६

संबन्धे'[1155] इतिसूत्रेण प्रभावित: प्रतीयते। मोग्गलानवुत्तेः अनुसारं क्रियासाधकानां नाम्नां सम्बन्धः षष्ठ्या विभक्त्याः द्योतते[1156]।

अग्गवंसानुसारं षष्ठीविभक्तिः क्रियायाः कारकाणां सम्बन्धान् निश्चिनोति[1157]। इदं हि सद्दनीतौ व्याख्यायते[1158]। अग्गवंसः मोग्गलानश्च वाक्यपदीयमतमेव पुरस्कुरुत:[1159]। दुर्गसिंहः सम्बन्धं स्पष्टयति- अस्येदं= भावरूपस्वस्वाम्यादिलक्षणः सम्बन्धः[1160] इति।

पाणिनि अष्टाध्याय्यां शेषसंज्ञया प्रतिपादयति- 'शेषे षष्ठी' इति सूत्रेण। कारकाणां क्रियया सह अवशिष्टसम्बन्धमात्रबोधनाय षष्ठी विभक्तिः प्रयुज्यते[1161]। शेषव्याख्याने काशिकाकारः वदति यत् शेषशब्देन स्वाम्यस्वाम्यादयः सम्बन्धाः अवबुध्यन्ते[1162]।

शर्वः स्वाम्यादि इत्येनं स्पष्टयति- 'शेषः कर्मकरणसम्प्रदानापानस्वम्याद्यधिकरणेषु'[1163]।

चन्द्रगोमी कारकसम्बन्धः षष्ठीप्रतिपाद्यं विवृणोति 'षष्ठी सम्बन्धे'[1164] इत्यनेन।

कच्चायनः शर्वानुकरणेन कारकाणां अग्गवंससमर्थितं विभक्तिमूलकत्वं निराकरोति। अग्गवसस्य भावकारकप्रतिपादनं सद्दनीतेः पदमालायां व्याख्यातम् तच्च संस्कृतकारकविवेचनात् स्वतन्त्रम् अस्ति। यद्यपि अग्गवंसः कच्चायनस्य (K) समर्थने हि कारकविवरणं प्रस्तौति। स विभिन्नस्रोतेभ्यः अधिकं विवरणं वर्धयति। अस्य स्रोतसाम् अधिकानि दुर्गसिंहतः स्वीकृतानि। अग्गवंसस्य संस्कृतवैय्याकरणानां पतञ्जलि-भर्तृहरि-हेलाराजादीन् प्रति आधमर्ण्यं स्पष्टमस्ति। किन्तु मोग्गलानः कारकविवरणे मुख्यतः चन्द्रगोमिनम् अनुसरति।

विभत्ती

---

1154 मोग्ग. २/४१

1155 चा.व्या. २/१/९५

1156 क्रियाकारकसञ्जातो अस्सेदम्भावहेतुको सम्बन्धो नाम तस्मिन् छट्ठी विभत्ती होति। मोग्ग. वु. २/४१

1157 किरियाकजाते अस्सेदम् इति भावहेतुम्हि

1158 सद्द. ६१०

1159 ६१, वाक्य. ३/७/१५७

1160 कातन्त्रे 2/4/19

1161 पा. सू. ४/२/९२

1162 कर्मादिभ्योऽन्यः प्रातिपदिकार्थव्यतिरेकः स्वस्वामिभावसम्बन्धादिः शेषः।

1163 कात्या. वा. २/४/१९

1164 चा. व्या. २/१/९५

विभत्ति (विभक्तिः) अयं शब्दः 'वि' उपसर्गपूर्वकात् भजधातुरुत्पद्यते। अयं विभाजनादिषु अर्थेषु वर्तते।[1165] व्याकरणे विभक्तिसंज्ञा नामशब्देषु धातुषु अन्येषु च प्रत्ययविशेषविधायकः।

अग्गवंसः विभक्तिः व्याख्याति- 'कम्मादिवसेन एकत्तादिवसेन च विविधा भाजियन्ती ति विभत्तयो'[1166]। अर्थात् कर्मादिषु एकत्वादिषु च याः विभक्ताः इति विभक्तयः। पदमालायां[1167] च कर्मादयः कारकाः एकत्वादिभिः वचनैः यैर्विभज्यन्ते ताः विभक्तयः।[1168] इदमेव कच्चायनवण्णना[1169] विशदयति यत् विभक्तयः कम्मादिकराकाणां वाक्यगतसम्बन्धेन वचनादिना च विभागं कुर्वन्ति इति ताः विभक्तयः सन्ति[1170]।

मोग्गल्लानोऽपि विभक्तिसंज्ञां विभाजनेन सह सम्बध्नाति- 'एतानि सत्त दुकानि सत्तविभत्तियो, सत्त विभत्ति कत्वा'[1171]। चान्द्रवृत्तौ 'तान्येतानि सप्त विभक्तयो भवन्ति विभागो विभक्तिरिति कृत्वा' इति तत्समर्थयति।[1172]

अग्गवंसः विभक्तीनां कार्यं वचनस्य लिङ्गस्य द्योतनम् इति वक्ति- 'संखालिङ्गत्थविकरणात्थम् उपपत्ति विभत्तीनाम्'[1173]।

मोग्गालानः नामशब्दानां कृते *सि* इत्यादिनां प्रत्ययानां विभक्तिसंज्ञां वक्ति। धातुषु कृतानां *ति* इत्यादिनां कृते संज्ञा अस्ति न वा इत्यसौ मौनः एव। कच्चायनः अग्गवंसश्च स्यादीनां त्यादीनामपि प्रत्ययानां विभक्तिसंज्ञां स्वीकुरुतः[1174]। कच्चायनवण्णना एतयोः नामानि नामविभत्ति आख्यातविभत्ति इति करोति।[1175] एते वैय्याकरणाः- *तो, त्र, था, धि, वा, हिम्, हम्, हिञ्चनाम्, ह, धा, दा, दाञ्चनाम्, दानि, रहि, धुना* एषामपि प्रत्ययानां विभत्तिसंज्ञां कुर्वन्ति।

---

1165 जै.व्या. १/४३२, नेत्तिप्पकरण i sq, 105, मिलिन्दपन्ह १०२,३८१, विसुद्धिमग्ग ३५२, पेतवत्थु-अट्ठकथा 199, 282

1166 सद्द. १९८

1167 पदमाला १५,४

1168 कम्मादयो वा कारके एकावचन-बहुवचनवसेन विभजती ति विभत्ति। पदमाला १५/४

1169 कच्चा. वण्णना ५४

1170 कम्मादिवसेन च एकत्तादिवसेन च विभजती ति विभत्तियो, अथ वा विभज्जते पातिपदिकत्थो एताया ति विभत्तियो।

1171 मोग्ग. २/१

1172 चा वृ 2/1/1

1173 सद्द. ६६३

1174 ततो च विभत्तियो (कच्चा ५४) धातुपच्चयैः विभत्तियो (कच्चा ४५७), स्यादयो च विभत्तियो (सद्द. १९८)

1175 एत्थ च पच्चयगहणेन स्यानामविभत्तियो च त्यादि आख्यातविभत्तियो च सङ्गण्हन्ति।

संस्कृतव्याकरणे विभक्तिसंज्ञायाः विभक्तिप्रत्ययत्वेन प्रयोगः सर्वप्रथमं गोपथब्राह्मणे उपलभ्यते[1176]। न्यासमतेन च एकविंशतिः सुपः प्रातिपदिकानां वाक्यगतसम्बन्धान् विभज्य प्रतिपादयन्ति। [1177]

पाणिनिः प्रातिपदिकेषु धातुषु विहितान् सुपां तिङां च विभक्तिसंज्ञां करोति विभक्तिश्च इति[1178]। शर्वः विभक्तिसंज्ञां व्याख्यानं विनैव प्रयुनक्ति कातन्त्रे- 'तस्मात् परा विभक्तयः'[1179] इतिवत्। दुर्गसिंहः स्ववृत्तौ वदति यत् प्रातिपदिकात् उत्तरं प्रयुक्ताः प्रत्ययाः विभाजकत्वात् अर्थानां विभाजकाः विभक्तयः भवन्ति[1180]। कातन्त्रानुसारं कालादिषु कृताः प्रत्ययाः अपि विभक्तयः भवन्ति- 'सम्प्रति काले वर्तमाना विभक्तिर्भवति'।[1181] पाणिनिशर्ववर्माणौ तद्धितेष्वपि केषुचित् विभक्तिसंज्ञां वितनुतः- तस् त्र हा धा र्हि अधुना दानिम् था थम् अस्तात् अतस् इत्यादिषु। अनेन च एषु विभक्तिकार्याणि कृतानि भवन्ति[1182]।

चान्द्रव्याकरणे विभक्तयः व्याख्यायन्ते- 'तान्येतानि सप्त त्रयाणि सप्तविभक्तयो भवन्ति विभागो विभक्तिरिति कृत्वा'[1183]। अर्थात् इमानि सप्त त्रिकाणि सप्त विभक्तयः भवन्ति। इमाः विभाजिकाः भवन्ति।

पालिवैयाकरणेषु कच्चायन-अग्गवंसयोः विभत्तिवर्णनं शर्ववर्मणः वर्णनमनुकरोति। मोग्गल्लानस्य च पाणिनेः वर्णनम्।

वचनम्

वचनशब्दस्यार्थः शब्दाभिव्यक्तिः भवति। पालिभाषायां वचनशब्दः उक्तेः उच्चारणार्थकः। व्याकरणसंज्ञासु समासे अयं शब्दः व्याकरणसंज्ञानामभिव्यक्तिं करोति। यथा- पच्चत्तवचन (nominative case)(SnA 303) वत्तमानवचन (present tense) (SnA 16, 23) सम्पदानवचन (Dative relation) (SnA 317) .

---

1176 का विभक्तिः गोपथ ब्रा. १/१/२४

1177 विभक्तिशब्दः सुपां वाचकः। विभागवनो वा। कारकशक्तिविभागः। विभज्यते प्रातिपदिकार्थोऽनेनेति कृत्वा। काशिकावृत्तौ न्यासः १/२/४४

1178 पा.सू. १/४/१०४

1179 कातन्त्रे २/१/२

1180 तस्मात् लिङ्गात् पराः स्यादयो विभक्तयो भवन्ति... अर्थस्य विभाजनाद् विभक्तयः।

1181 कातन्त्रे दुर्गसिंहवृत्तिः १/३/११

1182 प्राग्दिशो विभक्तिः पा. सू. ५/३/१, विभक्तिसंज्ञा विज्ञेया वक्ष्यन्तेऽतः परं तु ये। अद्व्यादेः सर्वनाम्नस्ते बहोश्चैव परः स्मृतः॥ कातन्त्रे २/६/२४

1183 चान्द्रव्याकरणे २/१/१ वृत्तिः

मोग्गल्लानवुत्तौ सद्दनीतौ च वचनशब्दः संख्याप्रतिपादकप्रत्ययार्थकः अस्ति- 'सब्बादितो नं वचनस्स एनादेसो होति'[1184] 'गोसद्दतो नंवचनस्स अंआदेसो होति'[1185]। मोग्गल्लानवुत्तौ 'मायोगे ई-आ-आदि, द्विवचन'[1186] अत्र द्विवचनशब्दः द्विः वचनमित्यर्थकः। यथा- 'लुनाहि लुनाहित्येवायं लुनाहि, लुनुस्सु लुनुस्सु-त्वायं लुनातीति आदिनमेवेतम् मज्झिमपुरिसेकवनानम् आभिक्खञ्ञे द्विवचनम्। संयुत्तनिकायाट्ठकथा[1187] वचनशब्दं लिङ्गेन संख्यया सह सम्बध्नाति यथा एकवचनम् द्विवचनम् इत्यादि। साद्दनीतौ 'लिङ्ग-विभत्ति-वचन-काल-पुरिस-अक्खरानां विपल्लासो'[1188] इत्यत्र वचनसंज्ञा सामान्येन प्रयुज्यते। बहुवचनशब्दः बहुत्वे एव जैनेन्द्रव्याकरणे[1189] पेतवत्थु-अट्ठकथा इत्युभययोः प्रयुज्यते। एक-बहुशब्दौ सामान्येन पूर्वाचार्यैः प्रयुक्तौ (generic) एव प्रयुज्येते।

कच्चायनः अग्गवंसश्च एकवचनशब्दम् एकत्वे बहुवचनशब्दः च बहुत्वे उपयुञ्जतः- 'संसास्वेकवचनेसु च'[1190], 'तेमेकचवने'[1191], 'ना दुतियेकवचने'[1192], 'संसास्वेकवचनेसु थियम्'[1193], बहुवचनेसु वो नो[1194], 'वो नो बहुवचने'[1195] इत्यादिषु।

मोग्गल्लानश्च एकत्वे बहुत्वे च एक-अनेक शब्दौ प्रयुनक्ति- 'पुब्बपरचक्कानमेकानेकेसु तुम्हाम्हसेसेसु द्वे द्वे मज्झिमुत्तपठमा'[1196]। 'घपतेकस्मिं नादीनं ययां'[1197] पालिवैय्याकरणाः एकवचनेऽर्थे एकत्तम्[1198] बहुवचनेऽर्थे च बहुशब्दं[1199] प्रयुञ्जते।

---

1184 मोग्गल्लानवुत्ति २/१०२, २/११०

1185 सद्द. २२७

1186 मोग्गल्लानवुत्ति ६/१३

1187 संयुत्तनिकायाट्ठकथा 397

1188 सद्द. ६७२

1189 जैनेन्द्रव्याकरणे 4/173, पेतवत्थु-अट्ठकथा 163

1190 कच्चा. ६२

1191 कच्चा. १४८

1192 सद्द. ३२७

1193 सद्द. २०९

1194 कच्चा. १५१

1195 सद्द. ३२९

1196 मोग्ग. ६/१६

1197 मोग्ग.२/४७

1198 दिगुस्सेकत्तम् (कच्चा. ३२३) एकत्तं दिगुस्स (सद्द. ६९९) एकवचेकत्तञ्च छट्ठिया (मोग्ग. ३/२२)

अग्गवंसश्च ‘भन्ते भद्दे ति एकपुत्थवचनन्तम् अव्ययम्’[1200] इत्यत्र बहुवचनार्थे पुत्थवचनशब्दं प्रयुनक्ति।

सद्दनीतौ एकवचनं बहुवचनं च व्याख्यातौ- ‘द्वीसु द्वीसु पठमम् पठमम् एकवचनम्, पच्छिमम् पच्छिमम् बहुवचनम्’[1201] अर्थात् तत्र युगलेषु प्रत्येकं क्रमशः एकवचनम् द्विवचनम् च भवतः।

एकवचनं बहुवचनं च प्रथमं शथपथब्राह्मणे[1202] प्राप्नुतः- ‘नेद् एकवचनेन बहुवचनं व्यवयाम’[1203]। द्विवचनशब्दः प्रथमतया यास्ककाले उपलभ्यते- ‘अपि वा मेदाश्च पशोश्च। सात्त्वं द्विवचनं स्यात् यत्र एकवचनार्थ: प्रसिद्धं तद् भवति’[1204]।

एकवत्, द्विवत्, बहुवत् इति शब्दाः एक-द्वित्व-बहुत्वेऽर्थेषु बृहद्देवतायां पठ्यन्ते[1205]। तत्र सूक्ते प्रवादाः द्विवत्, बहुवत्, एकवत् भवन्तीति व्याख्यायते[1206]। ऋक्प्रातिशाख्ये द्विवचनेऽर्थे द्विवचन: इति शब्दः पठ्यते।[1207] बृहद्देवतायां वचनशब्दः भेदेऽर्थे उक्तः[1208]- ‘भेदे वचनलिङ्गयोः’[1209]।

पाणिनिः पूर्वाचार्यान् अनुकुर्वाणः स्वशास्त्रे एकवचन-द्विवचन-बहुवचनसंज्ञाः उपयुङ्क्ते- ‘तान्येकवचनद्विवचनबहुवचनान्येकशः’[1210]। असौ ‘प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा’[1211] इत्यत्रापि वचनशब्दं पठति। शर्ववर्मा एकवचने नियमं करोति- ‘क्रियासमभिहारे सर्वकालेषु मध्यमैकवचनम् पञ्चम्याः’[1212]। अथापि ‘इजात्मनेपदे प्रथमैकवचने’[1213]।

---

1199 बहुषु वा। मोग्ग. २/२३४

1200 सद्द. ४८२

1201 सद्द. २०१

1202 श.ब्रा. १३/५/१/१८

1203 एकवचनं बहुवचनं तिरस्करोतीत्यर्थः। देवकर (२३०)

1204 अथवा द्विवचनं सदपि एकवत् प्रयुज्येत। निरुक्ति. (Nir.) 6/16

1205 बृहद्देवता (BD) ४/१०७

1206 प्रवादस्तत्र दृश्यते द्विवत् बहुवत् एकवत्।

1207 ऋक्प्रातिशाख्ये 1/71

1208 लिंगवचनानां भेदान्तरे सति।

1209 बृहद्देवतायाम् 1/43

1210 पा. सू. १/४/१०२

1211 पा. सू. २/३/४६

1212 कातन्त्रे ३/१/२१

1213 कातन्त्रे ३/२/२९

असौ प्रथमाध्याये द्विवचनं बहुवचनं च शास्ति- 'द्विवचनम् अनौ[1214]' 'बहुवचनम् अमि'[1215] इति। अग्रिम अध्यायेषु च असौ एकत्व-द्वित्व-बहुत्वशब्दानामुपयोगं करोति- 'वां नौ द्वित्वे'[1216], त्वन्मदोरेकत्वे ते मे'[1217] इतिवत्। एकत्र च द्विवाचिन् शब्दं प्रायुञ्जत- 'युवावौ द्विवाचिषु'[1218] इति। 'ब्रुवः इड् वचनादिः'[1219] अत्र हि वचनशब्दं प्रत्ययेऽर्थे प्रयुक्तवान्।

चन्द्रगोमी एकवचन-द्विवचन-बहुवचनसंज्ञाः करोति स्वशास्त्रे- 'एकवचनस्य ते मे'[1220] 'इदुदेद्विवचनम्' 'बहुवचनस्य वस्नसौ'[1221] इतिवत्। एकशब्दमपि एकत्वे प्रयुङ्क्ते- 'त्वामौ एकस्मिन्'[1222]।

पालिभाषायाः एकवचनबहुवचनसंज्ञे अट्ठकथासाहित्येपि प्रयुक्ते स्तः। उत्तरकाले पालिवैयाकरणैरपि इमे तेषां व्याकरणैः प्रयुक्ते। ते च कातन्त्रादधिकं पाणिनेः चन्द्रगोमिनश्च शास्त्राभ्याम् अधिकरं समानमस्ति।

विभक्तयः

यथा उपरि वर्णितं प्रातिपदिकेषु क्रियाशब्देषु विहिताः प्रत्ययाः विभत्ति (विभक्तिः) इत्युच्यन्ते। प्रातिपदिकेषु विहिताः प्रत्ययाः सप्तधा विभज्यन्ते। ते नामविभक्तयः (nominal cases) उच्यन्ते।

पालिभाषा-अट्ठकथासु विशिष्टाः संज्ञाः प्रयुज्यन्ते विभक्त्यर्थेषु तत्र तासां काचन पालिवैय्याकरणैः स्वशास्त्रेषु आदृताः। अट्ठकथासु प्रयुक्ता? विभक्तयः एवं सन्ति-

| अट्ठकथाः | पालिव्याकरणम् | संस्कृतम् | आङ्ग्लभाषा |
|---|---|---|---|

1214 कातन्त्रे १/३/२

1215 कातन्त्रे १/३/३

1216 कातन्त्रे २/३/२

1217 कातन्त्रे २/३/३

1218 कातन्त्रे २/३/७

1219 कातन्त्रे ४/२/८८

1220 चान्द्र व्याकरणे ६/३/१७-१८

1221 चान्द्र व्याकरणे ५/१/१२५

1222 चान्द्रव्याकरणे५/४/६३

| | | | |
|---|---|---|---|
| पच्चत्तवचन[1223] | पठमा[1224] | प्रथमा[1225] | |
| उपयोगवचन[1226] | दुतीया[1227] | द्वितीया[1228] | |
| करणवचन[1229] | ततीया[1230] | तृतीया[1231] | |
| सम्पदानवचन[1232] | चतुत्थी[1233] | चतुर्थी[1234] | |
| निस्सक्कवचन[1235] | पञ्चमी[1236] | पञ्चमी[1237] | |
| सामिवचन[1238] | छट्ठी[1239] | षष्ठी[1240] | |
| भुम्मवचन[1241] | सत्तमी[1242] | सप्तमी[1243] | |
| आमन्तणवचन[1244] | आलपनवचन | संबोधनम् | |

[1223] संयुत्तनिकाय अट्ठकथा ३०३, विनयाट्ठकथा २८१, पेतवत्थु-अट्ठकथा 30, 35

[1224] कच्चा. २८६, सद्द. ५७७, मोग्ग. २/३९

[1225] पा. सू. २/३/४६६, कातन्त्रे २/४/१७, चा. व्या. २/१/९३

[1226] संयुत्तनिकाय अट्ठकथा ३८६, खुद्दक निकाय अट्ठकथा २३६, पेतवत्थु-अट्ठकथा

[1227] कच्चा. २९९, सद्द. ५८०, मोग्ग. २/२

[1228] कच्चा. २८८, सद्द. ५९१, मोग्ग. २/१८

[1229] संयुत्त निकाय अट्ठकथा १४८

[1230] कच्चा. २८८, सद्द. ५९१, मोग्ग. २/१८

[1231] पा.सू. २/३/१८, कातन्त्रे २/४/२, चा. व्या. २/१/७३

[1232] जै. व्या. २१४, संयुत्त. अट्ठकथा३१७, ४९९

[1233] कच्चा. २९५, सद्द. ६०५, मोग्ग. २/२६

[1234] पा.सू. २/३/१३, कानन्त्रे २/४/२६, चा.व्या. २/१/७३

[1235] जै. व्या. ४९८

[1236] कच्चा. २९७, सद्द. ६०७, मोग्ग. २/२६

[1237] पा.सू. २/३/२८, कातन्त्रे २/४/२०

[1238] सयुत्त. अट्ठकथा १२७, पेतवत्थु-अट्ठकथा १०२, जै. व्या. १/१८५, ३/९८ (उपयोगत्थे), ५/४२ (कारकत्थे), ४४४, विनय. अट्ठकथा ३०४, संयुत्त अट्ठकथा २०४ (उपयोगार्थे)

[1239] कच्चा. १०३, सद्द. ६०९, मोग्ग. २/४१

[1240] पा.सू. २/३/५०, कातन्त्रे २/४/३७, चा. व्या. २/१/९५

[1241] संयुत्त अट्ठकथा १४०, खुद्दक अट्ठकथा ११६

[1242] कच्चा ३०४, सद्द. ६३०, मोग्ग. २/३४

[1243] पा.सू. २/३/३६, कातन्त्रे २/४/२, चा. व्या. २/१/८८

[1244] खुद्दक. अट्ठकथा १६७, सयुत्त. अट्ठकथा४३५

संस्कृतमिवपालिभाषायामपि सप्तविभक्तयः सन्ति ते च संख्यावाचिशब्दैः संज्ञिताः सन्ति यथा उपरि प्रस्तुतम् अस्ति। अष्टमीविभक्तिश्च संबोधननाम्ना उच्यते। उत्तरवर्तिव्याकरणेषु अस्याः नामकरणं न कृतम्। अग्गवंसः सद्दनीतौ अस्याः नाम अट्ठमी इत्यस्ति-

'इदमेत्था निरुत्तिलेखनणं दट्ठबन्-पच्चत-वचने पठमा विभत्ति, उपयोगवचने दुतीया विभत्ति भवति, करणवचने ततिया भवति, सम्पदानवचने चतुत्थी विभत्ति भवति, निस्सकवचने पञ्चमी..... सामिवचने छट्ठमी... भुम्मवचने सत्तमी.... आमन्तणवचने अट्ठमी विभत्ति'। तत्र उद्दानम्-

पच्चत्तमुपयोगवञ्च करणं सम्पदानम्
निस्सक्कं सामिवचनम् भुम्मालपनमट्ठमम्॥[1245]

एषा परम्परा प्राचीनेषु संस्कृतवैय्याकरणेषु दृश्यते। K. C. Chatterji महोदयस्य मतेन यास्कः पाणिनिश्च संबोधनं पृथक् विभक्तित्वेन न स्वीकुरुतः (K.C.Chatterji1964:388)। बृहद्देवता (BD) अष्टविभक्तीः प्रतिपादयति- 'अष्टौ प्रयुज्यन्ते यत्र नानार्थेषु विभक्तयः'[1246]। महाभाष्यकारोऽपि अत्र चर्चां करोति- 'चित्रा यस्य गावश्चित्रगुस्तिष्ठति...चित्रा यस्य गावश्चित्रगु निधेहि। चित्रा यस्य गावो हे चित्रगो इति'[1247]।

संबोधनविषये शास्त्रकारैः विस्तृता चर्चा प्रतिपादिता।

पालिव्याकरणैरपि संस्कृतवैय्याकरणैरिव सम्बोधनस्य पृथग्विभक्तित्वं न स्वीकृतम्। अपितु प्रथमाविभक्तिरेव अत्र प्रयुक्ता अस्ति। उभयैः वैय्याकरणैः च अत्र पृथक् नामे कल्पिते।

---

[1245] देवकरः म. अ. द्वितीयाध्याये पादटिप्पण्यां लिखति २/१०५ "Here one should consider this rule from the Niruttipitaka. First case suffixes are to be added in the sense of the nominative, second case suffixes in the sense of an accusative, third case suffixes in the sense of the instrumental, fourth case suffixes in the sense of the dative, fifth case suffixes in the sense of the ablative, the sixth case suffixes in the sense of the genitive, the seventh case suffixes in the sense of the locative, and the eighth case suffixes in the sense of the vocative. In this regard here is the summarizing verse: Nominative, Accusative, Instrumental, Dative, Ablative, Genitive, Locative and eighth is the Vocative".

[1246] अष्टौ विभक्तयः विभिन्नेषु अर्थेषु प्रोक्ताः इत्यर्थः।

[1247] महाभाष्ये-

पालिव्याकरणे संबोधनस्य कृते आलपनसंज्ञायाः प्रयोगः क्रियते[1248]। आलपनस्य अर्थः मिथः संभाषणम् इति भवति[1249]। आङ्उपसर्गपूर्वकात् लप्धातोः संबोधनं भवति। खुद्दकनिकायाट्ठकाथायां (KhA167) संयुत्तनिकायाट्ठकथायां च (SnA 435) इत्युभयोः संबोधनस्य कृते आमन्तणवचन इति क्रियते। मोग्गल्लानव्याकरणे[1250] अस्य नाम आमन्त्रणम् इति क्रियते[1251]।

अग्गवंसमोग्गल्लानोक्ता आमन्तणसंज्ञा संबोधनस्य अकुशलोपायः (non technical) अस्ति[1252]। आमन्तणसंज्ञाया अर्थः संबोधनम्, आह्वानम्, आमन्त्रणम्, अभिवादनम् इत्यस्ति[1253]।

आ उपसर्गपूर्वकं मन्त धातोः अर्थः आह्वानम् इति अग्गवंसः व्याख्याति- 'यम् आलपति, तद् आमन्तणम्'[1254]।

मोग्गलानवुत्तौ[1255] अपि आमन्तणस्य अर्थः ध्यानाकर्षणमिति प्रतिपाद्यते। देवनन्दी[1256] दुर्गसिंहटीका[1257] चास्य समर्थनं कुरुतः।

संस्कृतभाषायां संबोधनेऽर्थे आमन्त्रितशब्दस्य प्रयोगः उपलभ्यते। इदं प्रथमतया प्रातिशाख्येषु अष्टाध्याय्यां च उपलभ्यते[1258]।

सामन्त्रितम्[1259] इति सूत्रे आमन्त्रितसंज्ञा उपयुक्ता अत्र च प्रथमाविभक्तेः प्रयोगः भवति।

---

1248 अकतरस्सा लतो व्यालपनस्स वे वो (कच्चा. ११६), अमालपनेवचने (कच्चा.१५३), रस्स लतो व्यालपनस वे वो (सद्द. २९१) मतन्तरे पुमस्स अम् आलपनेकवचने (सद्द. ३३३)

1249 विनय. ३/७३/३३, जै. व्या. २५३, विसुद्धिमग्गे २३, संयुत्त. अट्ठकथायाम् ३९६, पेतवत्थु-अट्ठकथा 131

1250 मोग्ग. २/२४१

1251 आमन्तणं पुब्बमसन्तं वा. मोग्ग. २/२४१

1252 आमन्तणे सि गसञ्ञो। सद्द. २०४, आमन्तणे। मोग्ग. २/४०

1253 संयुत्त. ४०, खुद्दक. अट्ठकथा १६७

1254 सद्द. ५७६

1255 मोग्गलानवुत्ति २/४०

1256 देवनन्दी 2/1/5

1257 दुर्गसिंहटीका 2/4/18

1258 ओकार आमन्त्रितजः प्रगृह्यः। ऋक्प्राति. १/६८, पदपूर्वम् आमन्त्रितम् अनानार्थे पादादौ। VP 2/17, आमन्त्रिते चेतावनार्षे। चा. व्या. १/८१, आमन्त्रितादाद्युदात्ताख्यातं न निहन्यते। AP 1/1/23

1259 पा.सू. २/३/४८

शर्ववर्मा आमन्त्रितसंज्ञां[1260]- 'आमन्त्रिते सिः सम्बुद्धिः'[1261] इति सूत्रे प्रयुनक्ति। आमन्त्रितशब्दस्य व्याख्यां देवनन्दी करोति[1262]- आमन्त्रितं ध्यानाकर्षणार्थकम्[1263]। इत्यत्र दुर्गः आमन्त्रितमधिकृत्य पाणिनेः 'आमन्त्रितम् पूर्वमविद्यमानवत्' अस्य समानम् एव व्याचष्टे[1264]।

चन्द्रगोमी इदं सूत्रं किञ्चित् भेदेन वक्ति- 'आमन्त्रित पूर्वम् असद्वत्'[1265] शर्वभाष्ये....'अम्बेति वै योषया आमन्त्रणम्'[1266]।

शर्ववर्मा आमन्त्रणशब्दं 'आमन्त्रणे च'[1267] इति सम्बोधनेऽर्थे प्रतिपादयति। दुर्गसिंहटीका अत्र व्याख्याति- 'सिद्धस्याभिमुखीभावम् आमन्त्रणम्'।

पालि अट्ठकथासु प्रयुक्ता विभक्तिसम्बद्धाः पारिभाषिकशब्दाः पालिव्याकरणेषु स्थानं तथा नालभन्त। संस्कृतवैय्याकरणानाम् अत्यधिकप्रभावो लक्ष्यते। आलपनविभत्ति अत्र अपवादः।

सम्बुद्धि/ग

संस्कृतवैय्याकरणाः पालिवैय्याकरणाः अपि सप्तविभक्तयः प्रतिपादयन्ति संबोधनं च विभक्तित्वेन न गणयन्ति। सम्बोधने प्रथमाविभक्तिः प्रतिपाद्यते। संबोधने एकवचने भिन्नरूपमुच्यते संस्कृते पालिभाषायाञ्च। पालिभाषायां तत्र किञ्चित् पृथक् परिभाषा ग कल्प्यन्ते। ते एकवचने 'सि'प्रत्ययं वदन्ति- 'आलपने सि गसञ्ञो'[1268]; 'आमन्तणे सि गसञ्ञो'[1269]। अर्थात् सम्बोधने 'सि'प्रत्ययः भवति। मोग्गलानव्याकरणे अपि 'गो स्यापलने'[1270] इति सूत्रायते।

---

[1260] कातन्त्रे २/१/५

[1261] सम्बुद्ध्या 'सि' प्रत्ययः आह्वानार्थकः बोध्यः।

[1262] सिद्धस्याभिमुखीकरणम् आमन्त्रणम्।

[1263] देवनन्दी 2/1/5

[1264] दुर्गसिंहटीका 2/3/4

[1265] चान्द्रव्याकरणम् ६/३/२४

[1266] कातन्त्रभाष्यम् ६/२/५

[1267] कातन्त्रे २/४/१८

[1268] कच्चा. ५७

[1269] सद्द. २०४

[1270] मोग्ग १/१२

अत्र कातन्त्रस्यापि प्रभावः लक्ष्यते। शर्ववर्मा अत्र वदति- 'आमन्त्रिते सि सम्बुद्धौ'[1271]। अत्र 'गा'संज्ञायाः उपयोगः स्वातन्त्र्यार्थं कृतः स्यात् पालिवैयाकरणैः। कच्चायनः अग्गवंसोऽपि गा स्थाने आलपनमेकवचनं इति शब्दं प्रयुञ्जतः- 'आलपनमेकवचने'[1272], 'मतान्तरे पुमस्स अम् आलपनेकवचने'[1273]। तथैव चरियापिटकात्थकथा (CA) एकमन्त्रितं शाकटायनश्च एकमन्त्रणं प्रयुञ्जतः सम्बुद्धावर्थे[1274]।

पाणिनिशर्ववर्माणौ संबोधनैकवचनार्थं सम्बुद्धिसंज्ञां कुरुतः- 'एकवचनं सम्बुद्धिः' इति। कातन्त्रे अत्र सि प्रत्ययविधानम् अस्ति[1275]।

सम्बोधनं सम्बुद्धिश्च समानार्थकौ। लघुत्वात् संबुद्धिप्रयोगः आश्रितः आभ्यां वैय्याकरणाभ्याम् (पाणिनिशर्ववर्मभ्याम्)।

चन्द्रश्च सम्बोधने सु[1276] इति सु प्रत्ययं विधत्ते सम्बुद्धौ। 'न सम्बुद्धौ' इति चासौ सम्बुद्धिपदमपि प्रयुनक्ति।

संस्कृतवैय्याकरणप्रयुक्ते संबुद्धिशब्दस्य स्थाने पालिवैय्याकरणाः गा इति पदं प्रयुञ्जते।

---

1271 कातन्त्रे २/१/५

1272 कच्चा. १५३

1273 सद्द. ३३३

1274 एकामन्त्रिते रौद्विवचनान्तस्य (CA 2/47) वीशनोशनन्नघोभगोभोस्समश्चैकामन्त्रणे। शा. व्या. १/२/१२१

1275 कातन्त्रे २/१/५

1276 चान्द्रव्याकरणम् ६/२/४४

षष्ठोऽध्यायः

# संस्कृतपालिव्याकरणोपनिबद्धकारकाणां विभक्तीनां च तुलना

उभयोः भाषयोः कारकेषु जायमानपरिवर्तनस्य कारणानि-

- सामाजिककारणानि
- भाषिककारणानि
- दार्शनिककारणानि
- धार्मिककारणानि

प्राचीनकाले वैदिकवाङ्गमयात् भारतस्य संस्कृतिः साहित्यं च लोके विकासपदवीमभजत। वैदिकाख्यानानि लौकिकसाहित्यरूपेण सामाजिकेषु रसोद्रेकेण तान् सुखिनः चक्रुः । तथैव वैदिकीभाषा अपि समाजे साहित्ये च विलसन्ति अन्यभाषाणां विकासाय भुवं प्रददौ । तस्याः विस्तृतकेलवरस्य अंशानां नियमनेन नवीनभाषाणाम् आरम्भः अभवत् । क्रैस्तपूर्वे प्रथमसहस्राब्दे उत्तरभारते तिस्रः भाषाः मुख्यतया नित्यव्यवहारे प्रयुज्यमानाः आसन् । १. औदिच्या, २. मध्यदेशीया, ३. प्राच्या चेति ।[1277] तत्र प्रथमा छान्दसभाषाया अनतिभिन्ना तृतीया च अधिकं भिन्नतामाप्नोत् । अध्ययनादिव्यवहारे प्रामुख्येण छान्दसभाषा एष प्रयुक्ता आसीत् तदा । तस्याः स्वस्वरूपात् च्यवनं मा भूत् इति दृशाः पाणिनिना भाषायाः संस्कारः आरब्धः । शिष्टानां व्यवहाराय पाणिनीयं व्याकरणं निर्ममे । इमं प्रसंगं भाष्यकारः स्फुटतरं विवृणोति- पृषोदरादीनि यथोपदिष्टमिति भाष्यव्याख्याने....कैः पुनरूपदिष्टा? शिष्टैः! के पुनः शिष्टा? वैय्याकरणाः ।....शिष्टज्ञानार्थाष्टाध्यायी । कथं पुनरष्टाध्याय्या शिष्टाः शक्या: विज्ञातुम्? अष्टाध्यायीमधीयनोऽन्यं पश्यत्यनधीयानं येऽत्र विहिताः शब्दास्तान्प्रयुञ्जानम् । स पश्यति । नूनमस्य दैवानुग्रहः स्वभावो वा योऽयं न चाष्टाध्यायीमधीते ये चात्र विहिताः शब्दास्तान्प्रयुक्ते । अयं नूनमन्यानापि जानाति । एवमेव शिष्टज्ञानार्थष्टाध्यायी ।[1278] पाणिनेः औदिच्यदेशजत्वात् तत्र विकसन्ती भाषा प्राचीनभाषया सह सामीप्यं समरक्षत । सा भाषा अक्षुण्णतया प्राज्ञैः प्रयुक्तायाः छान्दसभाषायाः स्वरूपात् न च्युता इति तस्याः माहात्म्यं गीतपूर्वं ब्राह्मणग्रन्थेष्वपि ।[1279]

---

[1277] भा.आ.हि. पृ. ६४

[1278] महाभाष्यम् ६/३/१०९

[1279] तस्माद् उदीच्याम् प्राज्ञतरा वाग् उद्यते; उदञ्च उ एव यान्ति वाचम् शिक्षिताम्; यो वा तत् आगच्छति, तस्य वा शुश्रूषन्त इति । कौषितकी ब्राह्मण, ७.६

पाणिनेः व्याकरणादुत्तरं संस्कृतभाषायाः स्वरूपे नियमनात् संकोचः स्थिरता च उत्पन्ना । छान्दसभाषायां व्यापकतया उपयुक्ताः स्वराघाताः लोपमाप्नुवन् । पूर्वतः प्रयुक्तानि शब्दस्य एकाधिकानि रूपाणि विलुप्य तत्र ऐक्यं समागतम् । यथा देवासः, देवेभिः, अश्विना आदीनि शब्दरूपाणि परित्यक्तानि । धातुरूपाणामपि तथैव नियमनं जातम् । क्रियाजात-विशेषणानाम् असमापिकापदानां च बहूनां परित्यागः केषाञ्चन च स्वीकारः अभवत् । उपसर्गाणां स्वतन्त्रः प्रयोगः समाप्तः । अनेन भाषायाः प्रयोगे सौष्ठवं सरूपता च उत्पन्ने । तद्विरूद्धं प्राच्यदेशे प्रचलितभाषा उच्छृंखला: सन्ती प्रयोगे रूपवैविध्यमभजन्त । अत्र सन्दर्भे प्राच्यभाषायाः प्रयोगे कृते दुरुक्तताबोधः अपि अन्वभूयत अन्यैः । ब्राह्मणे एतत् सन्दर्भितम्- 'अदुरुक्तवाक्यं दुरुक्तमाहुः' इति ।[1280] इयमपि भाषा स्वस्वरूपं परिवर्तन्ती अन्यभाषात्वं प्राप्नोत् । तत्र प्राचीनभाषायाः ऋ लृ ऐ औ इत्येताः ध्वनयः नष्टाः अपितु ए ओ इतिद्वयं शिष्टम् । अय्-अव् एतयोरपि स्थाने एकारौकायोः प्रयोगः प्राचलत् । पदान्तः म् इतिव्यञ्जनं विनश्य तत्स्थाने अनुस्वारस्य प्रयोगे प्रवृत्तिरभूत । आद्यानां त्रयाणामूष्मव्यञ्जनानां स्थाने एक एवावशिष्यत । तत् मागधभाषायां तालव्यम् अन्यत्र दन्त्यमितिवत् । संयुक्तव्यञ्जनेषु ध्वनिसमीकरणेन प्रयत्नम् उदपद्यत । अजन्तहलन्तप्रातिपदिकानाम् अकारान्तवत् प्रयोगेण शब्दरूपेषु तथैव धातुरूपेष्वपि तत्र रूपेषु साम्यमजन्यत । यथाहि अश्व-मुनि-साधु-पित्रादिशब्दानां भिन्नस्वरान्तत्वात् प्राचीनभाषायामेषां षष्ठ्यां रूपाणि अश्वस्य मुनेः साधोः पितुः इतिवत् भिन्नतया भवन्ति स्म किन्तु नूतनभाषायामिमानि अस्सस्स, मुनिस्स, पितुस्स इति समानतया प्राचर्तत्त । नामभि: सह सर्वनामसम्बन्धिप्रत्ययानामुपयोगः आरब्धः । यथा घरस्मि इति प्रयोगः गृहे इत्यस्यस्थाने । धातूनां सनन्तयन्तादिरूपाणां प्रयोगे न्यूनतायाता ।

अनया प्रवृत्या प्राच्यभाषापालिभाषायाः रूपेण मध्यभारतीय-आर्यभाषायाः प्रारम्भिकी अभवत् । मुपश्च गच्छता कालेन भिन्नाभिः दैशिकप्रवृत्तिभिः अन्याः प्राकृतभेदाः अपभ्रंशाश्च विचकासुः ।[1281] आसां विकासे देशकालयोः सह सामाजिकधार्मिकपरिस्थितेरपि प्रभावः समजायत । बुद्धादारभ्य त्रिपिटकरूपेण बौद्धवाङ्गमयस्य परम्परा अशोकस्य कालं यावत् अष्टादशसम्प्रदायेषु विकसिता इति श्रीलघुकालचक्रतन्त्रराजस्य विमकप्रभा टीकायामुलिख्यते । तदनुसारं तेषां भाषाः इमाः आसन्, मागधी सिन्धुदेशस्य भाषा, संस्कृतम्, प्राकृतम्, अपभ्रंशः, शबराद्याः मलेच्छ भाषाः, भोटभाषा, चीनभाषा, महाचीनभाषा, पारसिक भाषा, चम्पक भाषा, वानर

---

[1280] ताण्ड्यब्राह्मणम्, १७/४

[1281] कच्चायनव्याकरणस्य भूमिकायां, लक्ष्मीनारायण तिवारी, पृ. १८

भाषा, सुवर्णाख्य भाषा, रुह्न भाषा, सुरस्मा भाषा इत्यादयः आसन् ।[1282] अशोकस्य काले मोग्गलिपुत्त-तिस्सेन तृतीयायाः बौद्धसंगीतेः अध्यक्षत्वं निरूढम् । तत्रामुना 'कथावत्थु' नामग्रन्थः विरचितः । अयमेवः पालिभाषायाः उपलब्धस्वरूपस्य निर्धारणकालः आसीत् । तदनु च स्थविरवादिभिः सिंहलराज्ञः 'वट्टगामिनी अभयस्य' नेतृत्वे पालित्रिपिटकस्य लिपिबन्धनं कृतम् ।

पालिभाषायाः वैय्याकरणैः अस्याः भाषायाः 'मागधी' इति नाम बहुधा अंगीकृतम् । बालावतारस्य टीकाकारः सुमंगल महाथेरः इमां मागधीनाम्नैव व्याकरोति । बुद्धघोषः अपि 'मागधिकाय सब्बसतानं मूलभासाय'[1283] 'सकानिरूत्ति नाम सम्मासमबुद्धेन वुत्तप्पकारो मागधको वोहारो'[1284] 'देसभासानाम एक सतवोहारकुसलता विसेसेन पन मागधिके कोसलं' ।[1285]

मोग्गल्लानः अपि वैय्याकरणो मंगलकारिकायां मागधीशब्दोल्लेखेन पालिव्याकरणस्य आरम्भं करोति –

'सिद्धमिद्धगुणं साधु नमास्सित्वा तथागतं ।
सद्धम्मंघ भासिस्सं मागधं सद्दलक्खलं ॥'[1286]

पञ्चिकायां च विवृणोति 'इधायं सुत्तकारो मागधिक सद्दलक्खणं विरचयितुकामो...। तथा 'सद्दलक्खणस्सा पि सक्कतादिभेदेन बहुविधत्ता सकं सद्दलक्खणं विसेसयितुमाह मागधं ति । मगधेसु विदिता मागधा सद्दा तेसविदं लक्खणं मागधं, इदं वुत्तं होति मागधं सद्दलक्खणं ति ।

कच्चायनसारेऽपि इदमेवं प्रतिपाद्यते –

मागधिकाय बालानं बुद्धिया सद्दसासने ।
वक्खं कच्चायनसारं निस्साय जंगदासकं ॥[1287]

द्वादशशतके (११५० A.D.) सारत्थदीपन्यां विनयाट्ठकथायां प्रारम्भे सारिपुत्त संघराजः मागधीशब्दं प्रयुनक्ति पालिभाषार्थे –

---

[1282] द्र. तत्रैव, पृ. १९

[1283] विसु. पृ. ३४

[1284] समन्त., पृ. १२१५

[1285] विसु., पृ. ३०८

[1286] मोग्ग. मंगलकारिका

[1287] कच्चायन सारः, कारिका २२

मागधिकाय भासाय आरभित्वा पि केनचि ।

भासन्तरेहि साम्मिरसं लिखितं किञ्चिदेव च ॥

संघरक्खितथेर (1300 A.D.) वुत्तोदयनामके छन्दशास्त्रस्य ग्रन्थे मंगलाचरणे इत्थं लिखति –

पिंगलाथरियादीहि छन्दं यमुदितं पुरा ।

सुद्धमागधिकानं तं साधेति यथिच्छितं ॥

ततो मागधभासाय मत्तावण्णविभेदेनं ।

लक्खलक्खणसंयुत्तं पसन्नत्थपदक्कमं ॥

किन्तु क्रैस्तस्य एकोनविंशे शतके (१८६१) सासनवंसनामके ग्रन्थे पालिभाषा इति शब्दः उपलभ्यते –'इच्चेवं पाळिभाषाय परियत्तिं परिवत्तित्वा पच्छा अचरियपरम्परा सिस्सानिसिस्सवसेहि सिहळदीपे जिनचक्कं मज्झन्तिक सुमालि विय अतिदिव्वति ।[1288] सहैवासौ मागधीभाषेतिशब्दमपि प्रयुनक्ति- 'बुद्धघोसथेरो च सीहळदीपं पत्वा पठमं संघपालथेरं पस्सित्वा पिटकतयं मागधभाक्खरेन परिवत्तेतु आगतोम्हीति कारणं आरोचेत्वा"[1289] इति ।

वस्तुतः पालिशब्दः भाषायाः अर्थे प्रथमतया केन उपयोग: आनीतः इति निश्चयेन नोच्येते विद्वद्भिः । तत्र केचन पाश्चात्यविदुषः तदर्थं तर्कयन्ति अन्ये च सिंहल-बर्मास्यामदेशीयेषु अन्यतरदेशीयान् इति विमलाचरणलाहा प्रतिपादयति ।[1290] उनविंशे क्रैस्ताब्दे विद्वद्भिरत्र विषये ऊहापोह: कृतः किन्तु कश्चित् निश्चयः न लब्धः । अट्ठकथाकारैः पालिशब्दः पङ्क्त्यर्थे मूलपाठादिषु अन्येषु वा अर्थेषु तत्र-तत्र प्रयुक्तः किन्तु भाषार्थे अयं अर्वाचीनः एव ।

पालिभाषायां त्रिपिटकाणां संकलनानन्तरं स्थविरवादिभिः अस्या: भाषायाः प्रयोगः शास्त्रीयभाषात्वेन आरब्धः । तदनु च पालि-अर्थात् पिटकसाहित्यादनन्तरम् अनुपालि-अर्थात् अनुपिटक साहित्यमस्तित्वमायात् । तत्र अट्ठकथाः तासां टीकाः अनुटीकाश्च रचिताः । अस्मिन् क्रमे विदुषां कृते कावुअ-व्याकरणादिशास्त्राणामावश्यकता समुपस्थिता

---

1288 सासनवंस, पृ. २९

1289 तत्रैव, पृ. २८

1290 History of Pali Literature, P. ix

। कच्चायनः स्वव्याकरणारम्भे मंगलगाथार्थमेव इदं तथ्यं विवृणुते यत् शास्तुः उपदेशस्य सम्यक् अवबोधाय अहम् अस्य व्याकरणस्य व्याख्यानं करोमि । यतो हि ज्ञानिनः बुद्धस्य उपदिष्टेण मार्गेण श्रेयः प्राप्नुवन्ति । तच्च तस्य वचनाववबोधेन सम्भवः अस्ति अर्थज्ञाने अक्षपदानां ज्ञानस्य कारणभूतत्वात् इति ।

संस्कृतव्याकरणानाम् आलोके पालिवैय्याकरणैः अपि रक्षोहागमलघ्वसन्देहमूलकं व्याकरणं ग्रथितुं यतितम् –

सद्दानिसासनस्स किं पयोजनं ति चे वदे ।

रक्खोहागमलहुपायासन्देहत्यमेव च ॥[1291]

पालिवैय्याकरणैः संस्कृतवैय्याकरणानां पारिभाषिक-पदावलिरपि आश्रिता आदृता च । कच्चायनः इमां स्वशास्त्रे संज्ञाकरणपुरस्सरं प्रयुनक्ति अन्ये च मोग्गल्लानप्रभृतयः पदरूपेण एव व्युत्पत्तिलभ्यार्थेन सह तां प्रयुञ्जते । यथा- अक्खर, अघोस, अज्जतनी, अतिसग्ग, अत्तनोपद, अपादान, अब्भास, अव्ययीभाव, आख्यात, आगम, आदेस, उत्तमपुरिस, उपसग्गा, कम्मधारय, कारक, कारित, किच्च, कित, गणनामानि, घटादि, तद्धित, धातु, तप्पुरिस, नाम, पाटिपदिक, बहुव्वीहि, व्यञ्जन, भविस्सन्ती, योगविभाग, लिंग, विभत्ति, विभासा, बुद्धि, सब्बधातुक, सब्बनाम, समास, सम्पदान, हीयत्तनी इत्यादीनि पदानि ।

संस्कृतवैय्याकरणानामर्थं स्मरन् 'परसमञ्ञापयोगे'[1292] इति सूत्रं करोति । वृत्तौ च स्पष्टयति यत् संस्कृतग्रन्थेषु प्रयुक्ताः घोष-अघोषादय संज्ञा: प्रयुक्ताः सत्य: अत्रापि तथैव गृह्णीयेरन् इति ।[1293] तत्र च न्यासकारोऽपि स्पष्टयति – 'परेसं समञ्ञा परसमञ्ञा, वेय्याकरणानं समञ्ञा ति अत्थो; परस्मिं वा समञ्ञा परसमञ्ञा, सक्कतगन्थे समञ्ञा ति अत्थो ।[1294] वण्णनायां च विवरणेनेदं प्रतिपाद्यते-परमसञ्ञा नाम घोसाघोसलोपसवण्ण-समानसंयोगलिंगपदनिपातोपसग्ग पच्चयादयौ ।[1295]

पालिव्याकरणस्य विधिकारैः सह व्याख्याकाराः परिभाषाकाराः अपि संस्कृतव्याकरणपरम्परायाः सिद्धान्तान् स्वीकुर्वन्ति । बहूत्र शब्दशः अपि ईदृशाः सन्दर्भाः

---

[1291] कच्चायन व्याकरण, भूमिका, पृ. २२

[1292] कच्चा. सू. १/१/९

[1293] तत्रैव, वुत्ति, पृ. ११

[1294] तत्रैव, न्यास, पृ. ११

[1295] तत्रैव, वण्णना, पृ. ११

प्रस्तुताः भवन्ति । यथा कच्चायनः समासविधौ ‘नामानं समासः युत्तत्थो’[1296] इति सूत्रं करोति । न्यासकारः अपि महाभाष्ये समासवृत्तौ कृतां चर्चां तत्र प्रस्तौति । इदं सूत्रं कच्चायनसदृशमेव करोति शर्वकातन्त्रे- ‘नाम्ना समासो युक्तार्थः’[1297] । न्यासकारः विवृणोति- किं तेसं युतवत्थभावमुपगच्छन्ता पजहित्वावत्तनो अत्थे युतत्थभावमुपगच्छेय्युं,‘राजपुरिस मानेही’ति वुत्ते पुरिसमत्तस्सेवानयनं भवेय्य, तथा वसिट्ठमाने ही ति वुत्ते अपच्चमत्तस्सेवानयनं । अथ अप्पजहित्त्वावत्तनो अत्थे युत्तत्थभावमुपगच्छेयुं उभिन्नमत्थद्वयस्स विज्जमानता बहुवचनं सिया ति किमेत्थ साधेय्युं...एवं हि लोके दिस्सति-पुरिसो परकम्मनि पवत्तमानो सकं कम्मं पजहती ति; तद्यथा-तच्छको रजककम्मनि पवत्तमाने सकं तच्छककम्मं पजहति....अथवा अन्वयतो विसेसनं भवति...अथ यथा पुप्फादीसु तेहि च अपनीतेसु पि विसेसनं अन्वयतो सम्भवति; एवमिहापि ति न दोसो.....एवमनेन युत्तत्थग्गहणेन ‘भिन्नत्थानामेकत्थीभवो समासलक्खणं ति वुत्तं होति’[1298] ।

मोग्गल्लानः अपि अत्र विषये ‘स्यादि स्यादिनेकत्थं’ इति सूत्रयति ।[1299] पञ्चिकायामसौ लिखति-‘ननु च जहमानकत्थायं वुत्तियमुपादियमानायं राजपुरिसमानयेति वुत्ते पुरिसमत्तस्सानयनम्पीति न कदाचि राजविसित्ठस्स? नेदमत्थि । जहन्तो पि राजसद्दो सकत्थं नाच्चन्ताय जहातिः तं यथाथपति राजकम्मे पवत्तमानो सकं तच्छककम्मं राजकम्मविरोद्धं (जहाति नाविरोद्धं) हसितकम्मं, तथा राजपुरिसमानयेति वुत्ते पुरिसमत्तस्सानयनं न कदाचि राजविसिट्ठस्स? नेदमत्थि । जहन्तो पि राजसद्दो सकत्थं नाच्चन्ताय जहाति; तं यथा थपाति राजकम्मे पवत्तमानो सकं तच्छकम्मविरोद्धं (जहाति नाविरोद्धं) हसितकम्मं, तथा राजसद्दो पि विसेसत्थ वुत्ति विरोद्धमत्थं जहाति न पन विसेसनं । अथ वान्वयतो राजविसिट्ठस्स गहणं, तं यथा- चम्पकपुटो, मल्लिकापुटो ति निट्ठितेसु पि कुसुमेसु व्यपदेसान्वयतो भवति तथेहापि तेन राजविट्ठिस्स आनयनं न पुरुसमत्तस्स ।[1300]

सद्दनीतिकारस्य शैल्यां भाषायां विवेचने च संस्कृतव्याकरणस्य अत्यधिकः प्रभावः विद्यते। संस्कृतव्याकरणस्य सिद्धान्ताः अस्य पदमालायां, धातुमालायां, सुत्तमालायां व्याप्ताः सन्ति ।

---

1296 तत्रैव, सू. २/७/१

1297 कातन्त्रे, २/५/१

1298 कच्चा. २/७/१ सूत्रे न्यासः

1299 मोग्ग. ३/१

1300 तत्रैव, पञ्चिका, पृ. ११६

असौ च मुख्यतया तत्र तत्र संस्कृतव्याकरणस्य प्रभावं स्वीकरोति। काव्यशब्दस्य व्युत्पत्तिं दर्शयन् असौ आह्- 'केचि तु काव्यं ति सद्दरूपं इच्छन्ति, न तं पावचने पमाणं, सक्कटभासाभावतोः सकटभासातो पि हि आचरिया नयं गण्हन्ति।[1301] तथैव 'खा' धातोः 'ख्या' धातोश्च स्वाखात-स्वाक्खात-स्वाख्यातशब्दानां व्युतपत्तावपि पुनराह- 'केचिपन स्वाखातो ति च स्वाक्खातो ति च स्वाख्यातो ति च पदमिच्छन्ति। तत्थ पच्छिमानि सक्कटभासातो नयं ह्गेत्वा वुत्तानि, इतरं यथा ठितरूपनिप्फत्तिवसेन।[1302] एव त्रयाणामपि पालिव्याकरण-सम्प्रदायानां सूत्ररचनातद्व्याख्यानभाषाशैलीत्यादिषु संस्कृतव्याकरणस्य प्रभावः अवगन्तुं शक्यः।

अट्ठकथाकारेष्वपि प्राचीनानानां संस्कृतवैय्यकरणानां नैरूक्तानामपि सिद्धान्ताः आदृताः दृश्यन्ते। इद्रियट्ठ शब्दं व्याख्ययन् बुद्धघोसः लिखति – 'को पन नेसं इद्रियट्ठो नामा ति? इन्दलिंगट्ठो इन्द्रियट्ठो, इन्ददेसितट्ठो इन्द्रियट्ठो, इन्दादिट्ठट्ठो इन्द्रियट्ठो, इन्दसिट्ठट्ठो, इन्द्रियट्ठो, इन्दजुट्ठट्ठो इन्द्रियट्ठो।[1303] पाणिनिः अपि ईदृशमेकं सूत्रं प्राणिनाथ अष्टाध्याय्यां- इन्द्रियमिन्द्रलिंगमिन्द्रदृष्टमिन्द्रसृष्टमिद्र जुष्टमिन्द्रदत्तमिति वा।[1304] पृषोदरादीनि यथोदिष्टम्[1305] इत्यपि सूत्रं सन्दर्भितं सुत्तनिपाताट्ठकथायाम् – 'तत्थ वण्णागमो वण्णविकारलोपो ति एतं निरूत्तिलक्खणं गहेत्वा, सद्दनयेन वा पिसोदरादिपक्खे लक्खणं, गहेत्वा, यस्मा लोकियलोकुत्तरसुखाभिनिब्बत्तकं दानसीलादिपारमितासागरपारप्पत्तं भाग्यमस्स अत्थि, तस्मा भाग्यवा ति वत्तब्बे भगवा ति वुच्चती ति ञातब्बं।[1306]

अट्ठकथासु कारकनाम्नां विभक्तिनाम्नां च विशिष्टः उल्लेखः प्राप्तः भवति। इमानि नामानि निरुक्तिलब्धानीव भान्ति। तथा – पत्तवचनं[1307], उपयोगवचनं,[1308] करणवचनं,[1309] सम्पदानवचनं[1310], निस्सकवचनं[1311], सामिवचनं,[1312] भुम्मकामं,[1313] आमन्तणवचनं[1314]

---

1301 सद्दनीति, भा. २, धातुसंख्या ३

1302 तत्रैव, धातुसंख्या ३५

1303 विसुद्धिमग्गो, पृ. ४९१-४९२

1304 पा.सू. ५/२/९३

1305 पा. सू. ६/३/९३

1306 सु.नि. अ. भा. १, पृ. १०७

1307 तत्रैव, पृ. ३०३

1308 तत्रैव, भा. २, ३८६

1309 पेत, अ. पृ. ३३

1310 सु.नि. अ. भा. २, पृ. ४९९

1311 जा.अ.भा.५, पृ. ४९८

च । एषामुल्लेख: पश्चाद्वर्तिषु व्याकरणेषु नोपलभ्यते अपितु इमानि काञ्चन पूर्वस्याः परम्परायाः इंगितं कुर्वन्ति । इति लक्ष्मीनारायणतिवारेः चिन्तनम् ।[1315] यद्यपि पालिव्याकरणानां टीकासु इमे शब्दाः प्रकारान्तरेण प्रयुज्यन्ते । अट्ठकथानां कानिचन व्याख्यानानि विशेषतः उल्लेखनीयानि सन्ति । भुम्मवचने सप्तम्यर्थत्वेन अनेके अर्थास्तत्र प्रदर्शिताः - अधिकरणत्थे[1316], समीपत्थे[1317], निद्धारणे[1318], भावेन भावलक्खणे,[1319] करणे[1320], निमित्तत्थे[1321] इत्यादयः । दीघनिकायादौ ब्रह्मजालसुत्तस्य 'एकं समयं भगवा... ' इत्यारम्भिकपंक्तेः व्याख्यायां बुद्धघोषः वदति – 'एक समयं' अस्यार्थम् – 'कस्मा पनेत्थ यथा अभिधम्मे 'यस्मिं समये कामवचरं' ति च, इतो अञ्ञेसु सुत्तपदेसु 'यस्मिं समयं, भिक्खवे, भिक्खु, विविच्चेव कामे'हि ति च भुम्मवचनेन निद्देसो कतो; विनये च 'तेन समयेन बुद्धो भगवा' ति करणवचनेन, तथा अकत्वा एकं समयं ति उपयोगवचनेन निद्देसो कतो ति? तत्थ तथा च इध च अञ्ञथा अत्थसम्भव्तो....इध पन अञ्ञस्मिञ्च एवंजातिके अच्चन्तसंयोगत्थो सम्भवति । यंहि समयं भगवा इमं अञ्ञं वा सुत्तन्तं देसेसि अच्चन्तमेव तं समयं करूणा-विहारेन विहासि, तस्मा तदत्थ-जोतनत्थं इध उपयोग-वचन-निद्देसो कतो ति । तेनेदं वुच्चति –

तं तं अत्थमवेक्खित्वा भुम्मेन करणेन च ।

अञ्ञत्र समयो वुत्तो उपयोगेन सो इधा ति ॥

पोराणां पन वण्णयति- तस्मिं समये ति वा, तेन समयेना ति वा, तं समयं ति वा अभिलापमत्तभेदी एस, सब्बत्थ भुम्ममेव अत्थो ति । तस्मा एकं समयं ति वुत्ते पि एकस्मिं समये ति अत्थो वेदितब्बो ।[1322]

---

1312 तत्रैव, भा. १, पृ. १८५

1313 सु. नि. अ. भा. १, पृ. १४०

1314 तत्रैव, भा. २, पृ. ४३५

1315 तत्रैव, भा. १, पृ. २१०

1316 तत्रैव, भा. १, पृ. २११

1317 तत्रैव, भा. १, पृ. १११

1318 तत्रैव, भा. १, पृ. २२४

1319 तत्रैव, भा. १, पृ. २२४

1320 तत्रैव, भा. १, पृ. २१०

1321 तत्रैव, भा. १, पृ. ३२१

1322 दी. नि. अ. भा. पृ. ३३

कारविषये उपर्युक्तानामट्ठकथाप्रयुक्तानां एकस्याः 'सामी'[1323] इति संज्ञाया: प्रयोगं कच्चायनः करोति । तत्र च सामिस्मिं छट्ठीति षष्ठीविभक्तिविधानमपि ।[1324] कातन्त्रेऽपि इमां सज्ञां स्वामीतिरूपेण प्रयुक्ता अस्ति । पुनः पाणिने: सूत्रेषु उक्तेषु वार्तिकेष्वपि प्रत्ययात्मवचनम् उपयोगवचनमिति[1325] शब्दद्वयं प्रयुक्तं कात्यायनेन । वर्नेलमहाभागः अट्ठाकासु इमाकारकसंज्ञाः कारकसंज्ञात्वेन न स्वीकरोति, अपितु एतान् शब्दान् पदयोजनाग-सम्बन्धस्य (Syntactical Relation)वाचकान् मनुते ।[1326]

सद्दनीतिकारः एषां विषये विस्तृतां चर्चां विदधाति- 'इदमेत्थ निरूत्तिलक्खणं दट्ठब्बं- पच्चत्तवचने पठमा विभत्ति भवति, उपयोगवचने दुतिया विभत्ति भवति, करणवचने ततिया विभत्ति भवति, सम्पदानवचने चतुत्थी विभत्ति भवति, निस्सकवचने पञ्चमी विभत्ति भवति, सामिवचने छट्ठी विभत्ति भवति, भुम्मवचने सत्तमी विभत्ति भवति, आमन्तणवचने अट्ठमी विभत्ति भवति । तत्र उद्दानं –

पच्चतमुपयोगञ्च करणं सम्पदानियं ।

निस्सक्कं सामिवचनं भुम्मापनमट्ठमं ॥

तत्र पच्चत्तवचनं नाम तिविधलिंगववत्थानं इत्थि-पुम-नपुंसकानं पच्चतसभावनिद्देसत्थो, उपयोगवचनं नाम यो यं करोति तेन तदुपयुत्तपरिदीपनत्थो,करणवचनं नाम तञ्अपकनिब्बत्तकपरिदीपनत्थो, सम्पदानवचनं नाम तदनुप्पदानपरिदीपनत्थो, निस्सक्कवचनं नाम तन्निस्सततदपगमपरिदीपनत्थो, सामिवचनं नाम तदिस्सस्परिदीपनत्थो, भुम्मवचनं नाम तप्पतिट्ठापरिदीपत्थो, आमन्त्रणवचनं नाम तदामन्त्रणपरिदीपनत्थो। एवं ञत्वा पयोगानि असमुय्हन्तेन योजेतब्बानि।[1327]

तत्र एके विद्वांस: ये पालिव्याकरणं संस्कृतव्याकरणस्य आधारं पूर्वपीठं वा स्वीकुर्वन्ति ते सूत्राणां स्वरूपं पुरत: उपस्थाप्य तथा तर्कयन्ति।[1328] जेम्स एल्विस् इति विद्वान् कारकप्रकरणस्य पाणिनिकच्चायनयो: सूत्राणि तत्र प्रदर्शयति-

येन वादस्सनं।[1329] अन्तर्धौ येनादर्शनमिच्छति।[1330]

---

[1323] यस्स वा परिग्गहो तं सामि, कच्चा. सू. २/६/१३

[1324] तत्रैव, सू, २/६/३१

[1325] पा.सू. १/१/५० इत्यत्र वार्तिकम्, १/४/२९ इत्यत्र च द्वितीयं वार्तिकम्

[1326] द्र. A.C. Bernel, On the Aindra School of Sanskrit Grammarians, p. 61

[1327] सद्द. पदमाला,परि. ४

[1328] Jems Alwis, Introduction to Kaccayana`s Grammar, forward of kaccayanabheda, ११

येनङ्गविकारो।[1331] येनाविकार:।[1332]

सम्पदाने चतुत्थी।[1333] चतुर्थी सम्प्रदाने।[1334]

अपादाने पञ्चमी।[1335] अपादाने पञ्चमी।[1336]

कम्मत्थे दुतीया।[1337] कर्मणि द्वितीया।[1338]

कालद्धानमच्चन्तसंयोगे।[1339] कालाध्वनोरत्यन्तसंयोगे।[1340]

कम्मप्पवचनीययुत्ते।[1341] कर्मप्रवचनीययुक्ते द्वितीया।[1342]

किन्तु अन्ये बर्नेलप्रभृतय: कच्चायनव्याकरणं पाणिनीयादुत्तरकालीनं स्वीकुर्वन्ति। उक्तानि समानसूत्राण्यपि ते मौलिकानि नाङ्गीकुर्वन्ति अपितु केनचित् पश्चाद्वर्तिना संशोधकेन तानि सूत्राणि तत्र योजितानि स्युरिति तेषां मति:।[1343] विदुषां एको वर्ग: कच्चायनव्याकरणे कातन्त्रस्य प्रभावम् अधिकं स्वीकरोति यत: सूत्रशैली, रचना-शैली, रचना-विधानम्, प्रकरणविभागश्च उभयोरपि सदृशो वर्तते। एतन्मतस्य पोषकेषु वेबर-मोक्डोनल-बर्नेल एते प्रमुखा: सन्ति।[1344]

अन्यप्राचीनभारतीयार्यभाषाया इव पालिभाषा अपि स्त्रीपुंनपुंसकरूपं लिङ्गत्रयं बिभर्ति। पुंनपुंसकयो: भेद: प्रथमयो: द्वयो: विभक्त्यो: एव दृष्टिगोचर: भवति। काञ्चन च प्रयोगविशेषान् विहाय पालिभाषाया: द्विवचनम् अपगतमेव। तत्स्थाने प्रामुख्येण

---

1329 कच्चा. २/६/४

1330 पा.सू. १/४/२८

1331 कच्चा. २/६/२१

1332 पा.सू. २/३/२०

1333 कच्चा. २/६/२३

1334 पा.सू. २/३/१३

1335 कच्चा. २/६/२५

1336 पा.सू. २/३/२८

1337 कच्चा. २/६/२७

1338 पा.सू. २/३/२

1339 कच्चा. २/६/२८

1340 पा.सू. २/३/५

1341 कच्चा. २/६/२९

1342 पा.सू. २/३/८

1343 द्र. A.C. Bernel, On the Aindra School of Sanskrit Grammarians, p. 61

1344 कच्चायन व्याकरण, भूमिका, पृ.६५

बहुवचनप्रसक्तिरूपलभ्यते। यथा 'द्वे अपि चक्खूनि'। तत्र औकारस्य ओकाररूपं ध्वनिपरिवर्तनम् अत्र कारणं भवेत् इति केचन विद्वांस: चिन्तयन्ति। किन्तु कानिचन रूपाणि पालिभाषायां द्विवचने एव प्रयुक्तानि दृश्यन्ते। यथा- अक्खी, चन्दिसूरियानम् इत्यादिवत्।[1345] तथैव हि 'तुम्हे क्क अत्थ, वसेद्वा' अस्य इव क्रियापदेष्वपि द्विवचनं प्रयुक्तं दृश्यते।[1346]

पालिव्याकरणे प्रातिपदिकानि अन्त्याक्षराणामाधारेण पञ्चधा विभक्तानि। तेषामनन्तरं विभक्तीनां योगेन तत्र रूपावलि: संस्कृत्य उपयुज्यते। यथा- अकारान्त-आकारान्त-ह्रस्व-इकारान्त/ उकारान्त, दीर्घ-ईकारान्त/ उकारान्त-व्यञ्जनान्ताश्च। इमानि तालिकया एवं बोद्धुं शक्यन्ते-

---

1345 Thomas Oberlies, Pali: A Grammar of the Theravada Tipitaka, P. 130

1346 तत्रैव, पृ. १३०-१३१

| | अकारान्त | आकारान्त | इ/उ-कारान्त | ई/ऊ-कारान्त | व्यंजनान्त |
|---|---|---|---|---|---|
| प्रथमा एकव॰ | देवो (-ए) | कञ्ञा | अग्गि (-ई) | देवी, जाति | -Ø |
| प्रथमा/द्वितीया एकव॰ नपुं॰ | रूपं | --- | अक्खि | --- | -Ø |
| द्वितीया | देवं | कञ्ञां | अग्गिं | --- | अं |
| तृतीया | देवेन | कञ्ञाय/कञ्ञातो | अग्गिना | देविया/देवीया धेनुया/धेनूया | आ |
| चतुर्थी | अर्थाय | | --- | | --- |
| पञ्चमी | देवा/देवस्मा/देवम्हा/देवतो | | अग्गिस्मा/अग्गिम्हा/अग्गिना/अग्गितो | | पञ्चम्यर्थोऽपि |
| षष्ठी | देवस्स | | अग्गिस्स/अग्गिनो | --- | ओ |
| सप्तमी | देवे/देवम्हि/देवस्मि | कञ्ञाया/-म्/-आये | अग्गिस्मिं/अग्गिम्हि/अम्बुनि | देविया/देवियां/-वुया/-वुयां | इ |
| सम्बोधन पु॰/नपुं॰ | देव/-आ/-अं | कञ्ञे | अग्गि | देवि | |
| प्रथमा/सम्बोधन | देवा/-आसो/-से | कञ्ञा/कञ्ञायो | अग्गयो/अग्गी | देवियो/-ईयो/-उवो | ओ |

| | | | | | |
|---|---|---|---|---|---|
| बहुव॰ | | | भिक्खवो/भिक्खू(इयो/उवो) | धेनुयो/-ऊ | |
| द्वितीया | देवे/-आनि | | | | |
| प्रथमा/द्वितीया बहुव॰ नपुं॰ | रूपानि/-आ | --- | अक्खीनि/अक्खी | --- | --- |
| तृतीया/पञ्चमी | देवेहि/देवेभि/-ए | कञ्ञाहि | अग्गीहि/-अग्गिभि/-इहि | देवीहि | भि/हि |
| षष्ठी | देवाना/-नां | कञ्ञानं | अग्गीनं/-इनं | देवीनं/-इनं | अं |
| सप्तमी | देवेसु | कञ्ञासु | अग्गीसि/-इसु | देवीसु/-इसु | |

तत्र प्रथमायां विभक्तौ अकारान्तप्रातिपदिकेन सह पुल्लिङ्गैकवचने मुख्यत: द्विधा रूपं निष्पद्यते; प्रतीच्यपालिभाषायां तद्रूपम् ओकारान्तं प्रयुज्यते, प्राच्यपालिभाषायाञ्च एकारान्तम्। सिंहलदेशे तु तादृशमेकारान्तरूपं स्थानीयासु भाषोपभाषास्वपि बौद्धेतरै: सह भेदलक्षणार्थं बौद्धधार्मिकै: प्रयुज्यते।[1347] पञ्चम्यां च अकारान्तपुल्लिङ्गेन सह स्मा, म्हा इत्यन्तं रूपं प्राप्यते। सप्तम्यामपि स्मि, म्हि, अम् इत्यन्तरूपाणि उपलभ्यन्ते। सर्वनामसम्बन्धिप्रत्ययानां नामशब्दै: सह प्रयोगोऽत्र कारणम्।[1348] आतो इति पञ्चम्यर्थक: प्रत्यय: संस्कृते तसिल् इव पालिभाषायां प्रयुज्यते यथा- मूल-फलातो इत्यत्र। क्वचिदपि अहि इति सप्तम्यर्थे दृश्यते यथा- कामाहि। इदञ्च प्राच्यप्रकृतसम्बद्धलक्षणम्।

आसो-आसे इति प्रत्ययै: प्रथमाबहुवचने उपलभ्यते। आस: इति वैदिकप्रत्ययापभ्रंशौ। आसे प्रत्ययस्तु प्राच्यपालिगोचर: मुख्यत: स च प्रतीच्याम् आसो इत्थमुपलभ्यते। करणापादानयो: बहुवचने 'एहि' इति प्रत्यय: भवति यथा वेदे 'एभि:' इत्यपि क्वचिदुपलभ्यते पालिभाषायाम्।[1349] हलन्तानां लोपकारणात् षष्ठीबहुवचने वहूत्र प्रत्ययलोप: भवति यथा- अंगाना, अरियाना, अरियसच्चाना इत्यादिवत्।

अकारान्तनपुंसकलिङ्गे द्वितीयायैकवचने 'ए' इत्यन्तं रूपं भवति। यथा- दुल्लभे दस्सने, दाने। इदं प्राच्यपाल्यामेव मुख्यत: दृश्यते प्रतीच्यां तु 'अम्'प्रत्ययदर्शनम्। तत्रैव बहुवचने प्रथमाद्वितीययो: 'आ' इत्यन्तं रूपं भवति यथा- गगना घरा। प्राच्यां सप्तमीबहुवचने बहुत्र एहि इत्यन्तं रूपं पठ्यते किन्तु तत् सप्तम्या: रूपं न सत् अन्यार्थकं भवति। यथा- 'अजिनम्हि हञ्ञते दीपी, नागो दन्तेहि हञ्ञति'।[1350]

आकारान्ततृतीयाविभक्तौ 'अया' इत्यन्तस्थाने 'आय' इत्यन्तं रूपं दृश्यते। तच्च रूपम् अन्यासामपि विभक्तीनां सामान्यं भवति। किन्तु अन्यरूपाण्यपि अन्यार्थेषु उपलभ्यन्ते यथा आये इत्यन्तं सप्तम्यां भवति- सभाये। कञ्ञायो इति प्रथमाद्वितीयासम्बोधनानां बहुवचने सामान्येन पठ्यते। इदं कन्याया: इति प्राचीनभारतीयभाषाया: अपभ्रंश:। ह्रस्व-इकारान्तोकारान्तप्रातिपदिकानां रूपाणि नाधिकं परिवर्तितानि मध्यभारतीयार्यभाषायाम्। यथा अग्गि, अग्गिं, अग्गिना, अक्खीनि, भिक्खु। एषु पुंनपुंसकयो: रूपेषु समानता दृश्यते यथा भिक्खुनो, अग्गिनो। दीर्घ-ईकारान्तोकारान्तानां प्रातिपदिकानां प्रथमासम्बोधनयो: विभक्त्यो: प्रत्ययलोप: प्राय: दृश्यते। यथा- निधी, भूतपती। इयमपि प्रवृत्ति: संस्कृतसमाना भाति।

---

[1347] तत्रैव, पृ.१४२

[1348] तत्रैव, पृ.१४२

[1349] तत्रैव, पृ.१४३

[1350] तत्रैव, पृ.१४६

सखाशब्दस्य प्रथमाबहुवचने पितृशब्द इव सखारा इति रूपं भवति। अन्यत्र षष्ठ्यां सखिनो संबोधने च सखारो इत्युपलभ्यते। सखाशब्दस्य रूपेषु विभक्तिजाते परिवर्तनं दृश्यते- (१५५)

| | एकवचन | बहुवचन |
|---|---|---|
| प्रथमा | सखा, सखो | सखा, सखारो |
| द्वितीया | सखं/सखारं | सखिनो |
| तृतीया | सखिना | --- |
| पञ्चमी | सखारस्मा | --- |
| षष्ठी | सखिनो | --- |
| सप्तमी | --- | --- |
| सम्बोधन | सखा | --- |

इनन्तानां रूपेषु प्राचीनभारतीयार्यभाषया सह समानता क्षयं न गता अपि पालिभाषायामपि लिखिता भवति। तेषाम् इकारान्तानानि रूपाणि अपि उपलभ्यन्ते। यथा हि त्थियो।

दीर्घ-ऊकारान्तशब्दानां रूपाणि ह्रस्वानामिव प्रयुज्यन्ते प्रथमा- एकवचनं विहाय। यथा अभिभू इति प्रथमा एकवचने अन्यत्र पञ्चम्याम् अभिभुं। दीर्घ-ईकारान्तोकारान्तशब्दानां रूपाणि समानप्रायाणि एव प्रयुज्यन्ते यथा- जाति, देवी, देविं, देवियां।

सन्ध्यक्षरान्तानां (एकारौकारान्तानां) शब्दरूपाणां प्राय: सामान्यीकरणेन लोप: भवति। यथा- प्राचीनभारतीयार्यभाषाया: गौ: शब्द: गा इति पठ्यते। किन्तु द्योप्रभृतय: केचन शब्दा: यथापूर्वं तिष्ठन्ति।[1351] तथैव हलन्तशब्दानां स्वरान्तादेशा: भवन्ति। यथा- दिसो, दिसं (कर्मणि), पदा, वाचा इत्यादय:।

[1351] तत्रैव, पृ.१६४

अनन्तप्रातिपदिकानां समीकरणेन शब्दरूपाणि प्राप्यन्ते प्राच्यदेशीयपालिभाषायाम्। यथा- राजन् शब्दस्य राजु इति समीकरणम्। प्रतीच्यां च रञ्ञो इति एककीकस्य णेन। अयं नियम: समासेषु न पाल्यते। राजन् शब्दस्य रूपेण इदं स्पष्टीभवति-

| | एकवचन<br>पुल्लिंगनपुंसकलिंग | | बहुवचन<br>पुल्लिंगनपुंसकलिंग | |
|---|---|---|---|---|
| प्रथमा | राजा<br>रञ्ञो<br>-अत्ता | कम्म<br>कम्मं | राजानो<br>राजा | कम्मानि |
| द्वितीया | राजानं<br>राजं<br>-अत्तानं | | राजानो | |
| तृतीया/पञ्चमी | रञ्ञा/राजिना(रजतो)<br>-राजेन<br>अत्तना(अत्ततो), कम्मना,कम्मुना | | राजूहि<br>-राजेहि<br>रञ्ञेहि | |
| षष्ठी | रञ्ञो/राजिनो<br>रजस्स, अत्तनो,कम्मुनो | | रञ्ञां, राजूनां | |
| सप्तमी | राजिनि, रञ्ञे<br>-अत्तनि, कम्मनि | | राजूसु | |
| सम्बोधन | राजा, -राजे.-अत्त | | राजानो | |

ऋकारान्तानां कर्तृवाचकशब्दाः स्वामिवाचकाः च यथापूर्वं शिष्टाः खत्ता, सत्था, नत्ता इत्यादिवत्। तथा हि मतुबन्ताः अपि ऐतिहासिकाः शब्दाः यथावत् शिष्टाः। अन्ये च परिवर्तनेन निर्मिता-सीलवा इत्यादिवत्।[1352]

[1352] तत्रैव, पृ.१७५

सप्तमोऽध्यायः

# उपसंहारः

वाक्यं यद्यपि भावप्रधानं स्वीक्रियते भारतीयभाषाशास्त्रिभिः किन्तु आख्यातपदैः कारकाण्युक्तानि भवन्तीत्यतः वाक्यार्थबोधे कारकतत्त्वं प्रमुखं स्थानं बिभर्ति। भारतीयभाषाणां विकासक्रमे कारकाणां व्यवस्थायां जायमानक्रमिकपरिवर्तनान्वेषणोन्मुखे अत्र शोधे संस्कृतपालिभाषयोः तेषां स्थितेः विचिकित्सा कृता। समीक्षणेनानेनोपपत्तिः जायते यत् समानपरिवेशे विकसिते इमे भाषे संरचनादृष्ट्या अत्यधिकं समाने स्तः। तयोः विकाससामग्र्याः समानत्वत् मुख्याभिलक्षणान्यपि तथैव सन्ति। नामशब्दानां क्रियाशब्दानां समाने स्रोतसि आश्रिते संस्कृतपालिभाषे नामक्रियागतसम्बन्धानामव्यक्तौ उच्चारणप्रयत्नलाघवे मुख्यतया भिद्येते। भावाभिव्यक्तौ प्रयत्नलाघवं प्राकृतभाषाणां मुख्या प्रवृत्तिरस्ति। पालिभाषाऽपि तस्याः एव प्रवृत्तेरुत्पत्तिरिति तस्याः व्याकरणेनाभिव्यज्यते। किन्तु भगवतः बुद्धस्योपदेशानां धारणरक्षणप्रसाराणां धुरं धारयन्ती इयं वाक् प्रयत्नलावघसस्य प्रवित्तिं विहाय मानकीकरणाभिमुखी बभूव। अट्ठकथासु च अस्यां नियमस्य आरम्भिकप्रयत्नानां दर्शनं जायते। अट्ठकथाभ्यः आरभ्यः अस्याः व्याकरणं विकसितुमरभत। तदनु च त्रिपिटकाणां भाषां मानकं स्वीकृत्य वैय्याकरणाः ग्रन्थानां भाष्याणां टीकाणां च प्रणयनं चक्रुः। संस्कृतपालिभाषयोः मूलसिद्धान्ताः भाषायाः संरचनायाः समत्वात् समानतया प्रवर्तन्ते। तत्र कारकविषयकप्रवृतीनामवलोकनेन इदं स्फुटीभवति। संस्कृतपालिभाषयोः व्याकरणेषु कारकाणां विभक्तीनां च तुलनायां कृतायां वाक्यार्थप्रक्रियादृष्ट्या समानता परिलक्ष्यते। तत्र मुख्यतः ध्वनिपरिवर्तनकारणेन भाषयोः प्रायोगिकस्वरूपे भेदाः संलक्ष्यन्ते। इदं ध्वनिपरिवर्तनम् आदौ मूलनामशब्देषु धातुशब्देषु च कृतं भवति तदनु सन्धिनियमानां शैथिल्यात् वाक्ये प्रयुक्तानि पदानि भाषायाः स्वरूपं अधिकतरं परिवर्तयन्ति। बाहुलककारणतोऽपि रूपाणामधिक्यमुपजायते।

तत्र प्राकृतेषु दृष्टः कासाञ्चन विभक्तीनाम् अप्रयोगः द्विवचनलोपश्च पालिभाषायाः प्रायोगिकस्वरूपं यद्यपि परिवर्तयति किन्तु वाक्यार्थबोधे अपेक्षितविभक्त्यर्थस्यैव बोधः भवति। अतः भाषायाम् अप्रयुक्तप्रायाः विभक्तयः व्याकरणे सातत्येन नियमिताः भवन्ति।

शोधक्रमारम्भे उभयभाषयोः उत्पत्तिविकाससम्बन्धिसिद्धान्तानां समीक्षणं कृतमस्ति। तत्र अनयोः उत्पतौ प्रवृत्तानां कारकाणां विवरणम् अस्ति। तत्र विदुषां मतानि विवृत्य इदं ज्ञातुं शक्यते यत् इमे भाषे प्रचीनभारतीयार्यभाषायाः मध्यभारतीयार्यभाषाणां विकासस्य

महत्वपूर्णे सूत्रे भवतः। तयोः समृद्धसंरचनां परितः अन्याः अपि प्राकृतभाषाः विकासस्य पदानि चक्रमुः।

द्वितीयाध्याये संस्कृतपालिभाषयोः व्याकरणपरम्परायाः विवरणेन व्याकरणस्य प्रकर्षेण अनयोः भाषयोः विकासस्य अपि कारकाणां पद्धतिः स्पष्टतां याति। तत्र न केवलं भाषिकत्त्वानामपितु व्याकरणस्य उद्देश्याद्यनुबन्धानामपि उल्लेखाः उपलभ्यन्ते। वैदिकज्ञानस्य प्रसाराय रक्षणाय च ग्रथितं संस्कृतव्याकरण, बौद्धागमप्रसारं तद्रक्षणं चोद्दिश्य विकसितं पालिव्याकरणं कथं नित्यव्यवहारस्य शास्त्राध्ययनस्य च उपकारकमभवत् अस्य साक्षात्कारः अस्याध्ययने भावति। भाषायाः अध्ययने तस्याः प्रयोगे व्याकरणस्य भूमिकायाः व्याकरणेन च भाषायाः स्वरूपस्य रक्षणं, शास्त्रीयचिन्तनस्य रक्षणं च सम्पद्यते इत्यपि ज्ञायते।

तृतीयाध्याये संस्कृतस्य व्याकरणपरम्परायां प्रतिपादितस्य कारकप्रकरणस्य विवरणमुपस्थापितमस्ति। तत्र पाणिनीयव्याकरणस्य आलोचकैः द्विसहस्राधिकवर्षेषु, तदितरव्याकरणैश्च प्रस्तुतचिन्तनस्य माध्यमेन भाषायाः प्रयोगेषु कारकाणां स्वरूपं, तेषां भाषिकप्रवृत्तेश्च रेखाङ्कनं क्रियते। कारकाणां निर्धारणे शास्त्रमेकमेव आधरभूत अथवा शास्त्रं लोकव्यवहारेण, यादृच्छया वा विधिं करोतीति विषये विस्तृता चर्चा अस्ति। तत्र पाणिनेः व्याकरणस्य अन्यव्याकरणानां च परम्परभिः स्वतर्कैः स्वाभिप्रायानुगुणं शास्त्राणि प्रस्तुतानि। दार्शनिकसम्प्रदायानुसारमपि कारकप्रतिपादने आचार्यैः सिद्धान्तानि कृतानि।

चतुर्थाध्याये पालिभाषायाः वैय्याकरणैः कारकविषये प्रतिपादितं चिन्तनं प्रस्तुतमस्ति। पालिव्याकरणस्य भिन्नैः सम्प्रदायैः कारकप्रतिपादने स्वीकृताणां तर्काणामपि तत्र विवेचितम्। मोग्गल्लानेन कृतेषु विभक्तिविषयकविधानेषु पूर्वाचार्याणां विधानैः सह भिन्नता तस्याः संभावितकारण्यपि चिन्तितानि। अट्ठकथाभ्यः आरभ्य धर्मकीर्तेः बालवतारपर्यन्तमाचार्यैः विचारितानां तत्थ्यानां विवरणेन पालिसाहित्ये कारकाणां प्रवृत्तेः निदर्शनं जायते।

पञ्चमाध्याये वैदिकदर्शनस्य बौद्धर्शनस्य च सिद्धान्तानुगुणं कारकाणां स्वरूपं प्रतिपादितमस्ति। वैदिकदर्शनस्य बौद्धदर्शनास्य च तत्वचिन्तने मौलिकभेदाः सन्ति अतः तेषां स्वसिद्धान्तानुगुणं कारकार्थस्य बोधः कथं भवतीति चर्चा अत्र कृता। वैय्याकरणैः पतञ्जलि-भर्तृहरिप्रमुखैः कौण्डभट्टान्तैः वैय्याकरणानां दर्शनानुगुणं कारकाणां विवेचनं यथास्थानं कृतम्। तैः समकालिकनैय्यायिकैः मीमांसकैश्च सह शास्त्र चर्चां विधाय कारकाणां विभक्तीनां च शाब्दबोधस्य स्वरूपं निर्णीतम्। सर्वेऽपि वैदिकदार्शनिकचिन्तकाः पाणिनेः प्रामाण्यं स्वीकृत्यैव शास्त्रव्याख्याने प्रवर्तन्ते।

षष्ठाध्याये संकृतव्याकरणे पालिव्याकरणे च कारकप्रतिपादने भेदाभेदानां विवेवेचनं तत्र संभावितकारणानां च चिन्तनं विहितम्। संस्कृतभाषायाः प्राकृतै सह भेदानां कारणविवेचनेन भेदोत्पादकसामाजिक-धार्मिक-भाषिक-दार्शनिकादिकारणानां विवेचनेन संस्कृतपालिभाषयोः सम्बन्धानां विवेचनं च कृतम्। तत्र प्राचीन-मध्य-आधुनिकानामपि भारतीयार्यभाषाणां विकासपदवीं स्फुटतया अनुमेयातामुपपद्यते। शोधे संस्कृतपालिभाषयोः वैयाकरणानां महतः समुदायस्य कारकसम्बन्धिनां सिद्धान्तामवलोकनेन तत्तद्वैय्याकरणसम्बद्धव्याकरणदर्शनस्य निदर्शनं भवति। यतः क्रियासम्बद्धकारकाणां भौतिकाध्यात्मिकपरिस्थितिं वैय्याकरणाः स्वशास्त्रानुकूलतया एव प्रतिपादयन्ति।

संस्कृतप्राकृतानां संबन्धे महेशदेवकरस्य निष्पत्तयः दर्शयन्ति यत् अनयोः व्याकरणेषु पर्याप्तं साम्यम् आसां भाषाणां प्रकृतेः साम्यस्य निर्धारयति[1353]। तदनुसारं मोग्गल्लानव्याकरणे प्रयुक्ताः अष्टपञ्चाशत् प्रतिशतं संज्ञाः चान्द्रव्याकरणे पूर्वप्रयुक्ताः सन्ति। पाणिनिकातन्त्रेणाप्यस्य चत्वारिंशत्तोप्यधिकप्रतिशतं संज्ञाः समानाः सन्ति[1354]। अस्य व्याकरणपि पाणिनिचन्द्रयोः व्याकरणाभ्यां व्यवस्थिततरमस्ति। अस्याशयः अस्ति यत् चान्द्रव्याकरणस्य उपायानामाश्रयेण मोग्गल्लानः कच्चायनात् उत्कृष्टतरं व्याकरणं ग्रथितुं कामयते। अत एव कच्चायन इव पाणिनेः अनुसरणम् अकृत्वा असौ चन्द्रगोमिनमनुससार[1355]।

पालिवैय्याकरणाः कच्चायनादारभ्य यद्यपि पालिभाषायाः स्वतन्त्रं विशिष्टं व्याकरणं कर्त्तुमैच्छन् किन्तु अस्मिन् क्रमे संस्कृतस्य समृद्धव्याकरणस्य प्रभावान्मुक्ताः भवितुं नाशक्नुवन्। अत्र अन्यदपि तथ्यमवधेयं भवति यत् पालिवैय्याकरणाः पाणिनेः परम्परायाः व्याकरणादधिकं कातन्त्रचान्द्राद्यपाणिनीयव्याकरणान्वसरन्। यतो हि तौ उभावपि सम्प्रदायविशेषानुयायिनौ आस्ताम्। तयोः व्याकरणस्य प्रवृत्तिः प्रयोगमूला आसीत् न तु संस्कृतव्याकरणमिव शास्त्रवृद्धिमूला[1356]। संकृतव्याकरणेषु प्रयोगमूलकव्याकरणस्य प्रवृत्तिः सप्रदायानुयायिषु प्रामुख्येण स्वीक्रियते। तत्र शर्ववर्मा, देवनन्दी, जीवगोस्वामी इत्यादयः प्रमुखाः सन्ति। अपूर्बचन्द्र-बडाठाकुरिया इदं तथ्यं स्वकीयशोधे प्रतिपादयति तदनुसारं

---

[1353] In this scenario, it is noticeable that Mogg though he has followed the basic framework of K. Has initiated changes in the fields of technological terminology and technique. Deokar, Mahesh Ashok, A Comparative Study of The Paninian Grammatical Tradition and The Three Grammars of Pali, P 404

[1354] तत्रैव, पृ. ४०४

[1355] तत्रैव, पृ. ४०४

[1356] This choice of an instructional grammar over theoretical grammar shows that Pali grammarians were more interested in imparting the language for the practical purposes of leraning buddist philosophy. And not to create an independent Vyakarana Shastra. Deokar, Mahesh Ashok, A Comparative Study of The Paninian Grammatical Tradition and The Three Grammars of Pali, P 405

जीवगोस्वामी हरिनामसहितं व्याकरणाध्ययनेन अध्येतृणां मोक्षस्य उपायमपि कल्पयति[1357] प्रयोगमूलकव्याकरणाध्ययनस्य इयं प्रवृत्तिः गच्छता कालेन संस्कृतव्याकरणस्य प्रक्रियापद्धतेः अपि आरम्भिका अभवत्।

---

[1357] Among the above sutrakaras Devanandi and Hemachadr are Jainas and Jivagosvami is a Vaishnava. But there is a very little trace of Jaina religious and philosophical views in Karaka chapter of the works of Devanandi and Hemachadra. On the other hand, the karaka chapter of Jivagosvami clearly displays the religious motive of the grammarian. Barthakuria Apurb Chandra, The Philosophy Of Sanskrit Grammar. P.411

## सन्दर्भग्रन्थसूची (Bibliography)-

### प्राथमिकानि स्रोतांसि-


- अष्टाध्यायी (अनुवृत्ति-वृत्ति-उदाहरण-वार्तिक-गणपाठादिसूचीसहिता, सम्पादकः-डा अभिमन्युः) महर्षिपाणिनिः, प्रतिभाप्रकाशन, नईदिल्ली. प्रथमसंस्करणम्-२०११
- कच्चायन व्याकरण (पालि व्याकरण), भदन्त आचार्य कच्चायन महाथेर, अनु. एवं व्याख्या. लक्ष्मीनारायण तिवारी एवं बीरबल शर्मा, तारा बुक एजेन्सी, वाराणसी. १९६२
- कातन्त्रव्याकरणम्, शर्ववर्मा, संपा. जे एकलिंग, कलकत्ता. १८७९
- कारकचक्रम्, भवानन्दः, सपा. ब्रह्मशंकर शास्त्री, जयपुर. १९५६
- काशिका, वामनजयादित्यविरचिता, संपा. विजयपालो विद्यावारिधि, रामलाल कपूर ट्रस्ट, सोनीपत. १९९७
- काशिकावृत्तिः न्यासपदमञ्जरीसहिता, वामनजयादित्यविरचिता, संपा. द्वारिकादासशास्त्री, कालिकाप्रसादशुक्ल, चौखम्बा विद्याभवन, वाराणसी. १९५६
- चान्द्रव्याकरणम्, चन्द्रगोमी, संपा. क्षितीशचन्द्र चटर्जी, पूना. १९५३
- न्यायदर्शनम् (न्यायभाष्यसहितं ढुण्ढिराजशास्त्रिव्याख्यासमन्वितञ्च), अक्षपादः, चौखम्भासंस्कृतभवनम्, वाराणसी. २००७
- न्यायसिद्धान्तमुक्तावली (किरणावलीसमाख्यव्याख्योपेता), विश्वनाथपञ्चाननभट्टाचार्यः, चौखम्भासंस्कृतसंस्थानम्, वाराणसी.२००६
- पाणिनीयशिक्षा (प्रभावतीहिन्दीव्याख्यासमन्विता, व्याख्याकारः-डा०कमलाप्रसादपाण्डेयः) पाणिनिः, विश्वविद्यालयप्रकाशनम्, वाराणसी. द्वितीयसंस्करणम्-२०१०
- प्रक्रियाकौमुदी, रामचन्द्राचार्यः, बॉम्बे संस्कृत एण्ड प्राकृत सीरीज. १९२५
- प्रयोगरत्नमाला, पुरुषोत्तमविद्यासागरः, आसाम संस्कृत बोर्ड, गवाहटी. १९७३
- प्रौढमनोरमा (संस्कृतहिन्दीव्याख्यासमन्विता, व्याकारः- पं० द्वारिकाप्रसादद्विवेदी), भारतीयविद्याभवनम्, वाराणसी.२००५

- बालावतार, महासामिधम्मकित्ति, संपा द्वारिकादासशास्त्री, बौद्धभारती प्रकाशन, वाराणसी. २००७
- भाट्टचिन्तामणिः, गागाभट्टः, दि चौखम्बा संस्कृत सीरीज ऑफिस, बनारस सिटि. १९३४
- भाषावृत्तिः, पुरुषोत्तमदेवः, तारा पब्लिकेशन, वाराणसी. १९७१
- भाषावृत्यर्थव्यावृत्तिः, सृष्टिधराचार्यः, एशियाटिक सोसायटि लायब्रेरी, कलकत्ता. अज्ञात
- महाभाष्यम्, पतञ्जलिः, मोतीलाल बनारसीदस, दिल्ली. १९६७
- मुग्धबोधव्याकरणम्, बोपदेवः, संपा. शिवनारायण शिरोमणि, कलकत्ता. १९१२
- मोग्गल्लान पालि व्याकरण, आचार्य मोग्गल्लान, अनु. भदन्त आनन्द कौसल्यायन, सम्पा. विमलकीर्ति, सम्यक् प्रकाशन, दिल्ली. २०१३
- लघुमञ्जूषा, नागेशभट्टः, चौखम्बा संस्कृत सीरीज ऑफिस, बनारस सिटि. १९२५
- लघुशब्देन्दुशेखरः (अव्ययीभावान्तः, म० म० श्रीनित्यानन्दपर्वतीयविरचितेन शेखरदीपिकाख्येन टिप्पणेन समुज्ज्वलितः), म० म० श्रीनागेशभट्टविरचितः, चौखम्भासंस्कृतसंस्थानम्, वाराणसी. दशमसंस्करणम्, वि०स०-२०५८
- लघुशब्देन्दुशेखरः (कारकप्रकरणम्), महामहोपाध्यायश्रीनागेशभट्टः, मुख्यसम्पादकः- प्रो० हरेकृष्णसतपथी, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः.२००७
- लघुशब्देन्दुशेखरः, नागेशभट्टः, भार्गव पुस्तकालय, काशी. १९३४
- वाक्यपदीयम्(हरिवृषभकृतया स्वोपज्ञवृत्त्या, पद्मश्रीपण्डितरघुनाथशर्मणा विरचितया अम्बाकर्त्रीव्याख्यया च सहितम्) आचार्यभर्तृहरिः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी. २००६
- वैयाकरणसिद्धान्तकौमुदी (ज्ञानेन्द्रसरस्वतीप्रणीत “तत्त्वबोधिनी” समन्विता, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, दिल्ली. द्वितीयसंस्करणम्-२०१०
- वैयाकरणसिद्धान्तकौमुदी (द्वितीयांशः), (शर्मोपाध्यायविरचितयालक्ष्मीव्याख्योपेता, श्रीबालकृष्णपञ्चोलिसम्पादिता) भट्टोजिदीक्षितः, मोतीलालबनारसीदासः, दिल्ली. प्रथमसंस्करणम्-१९६१

- वैयाकरणसिद्धान्तकौमुदी (प्रथमो भागः) (वासुदेवदीक्षितप्रणीतबालमनोरमाटीकया समलङ्कृता दीपिकाख्यहिन्दीव्याख्यासमन्विता), भट्टोजिदीक्षितः, सम्पादकः – गोपालदत्तपाण्डेयः, चौखम्बासुरभारतीप्रकाशन, वाराणसी.२००१
- वैय्याकरणभूषणसारः, कौण्डभट्टः, चौखम्बा संस्कृत सीरीज ऑफिस, बनारस सिटि. १९२५
- व्याकरणमहाभाष्यम्,(कैयटनिर्मितप्रदीपव्याख्यान्वितम्मधुसूदनप्रसादमिश्रकृतप्रकाशव्याख्यान्वितञ्च), महर्षिपतञ्जलिः,चौखम्बाविद्याभवन, वाराणसी-२००३
- व्युत्पत्तिवादः, गदाधरभट्टाचार्यः, संपा. एवं प्रका. म.म. उमेशमिश्रः, प्रायाग. १९४३
- शब्दशक्तिप्रकाशिका, जगदीशतर्कालङ्कारः, चौखम्बा संस्कृत सीरीज ऑफिस, बनारस सिटी. १९३४
- शब्दानुशासनम्, हेमचन्द्राचार्यः, निर्णयसागर प्रेस, बॉम्बे. १९१८
- संक्षिप्तसारः, क्रमदीश्वरः, संपा. जीवानन्दविद्यासागरः, कलकत्ता. १९७३
- सर्वदर्शनसङ्ग्रहः (उमाशङ्करशर्म-ऋषिविहिहिन्दीव्याख्यासमन्वितः), माधवाचार्यः, चौखम्बाविद्याभवन, वाराणसी. २००४
- सारमञ्जरी, जयकृष्णभट्टाचार्यः, संस्कृत पुस्तक भण्डार, कलकत्ता. १९६१
- सारस्वतव्याकरणम्, अनुभूतिस्वरूपाचार्यः, निर्णायसागर प्रेस, बॉम्बे. १९५२
- सिद्धान्तकौमुदी (जिनेन्द्रसरस्वतीरचिततत्त्वबोधिनीटीकया संवलिता जयकृष्णविहितसुबोधिन्याख्याटीकया समुपेता च), भट्टोजिदीक्षितः, सम्पादकः-भार्गवशास्त्री, निर्णयसागरमुद्रणालयः, मुम्बई. १९४२
- सुपद्मव्याकरणम्, पद्मनाभ, सपा. एवं प्रका. त्रिलोकीनाथ भट्टाचार्य, सरस्वती प्रेस, बनारस. १९९५
- हरिनामामृतम्, जीवगोस्वामी, श्रीचैतन्य रीसर्च इन्स्टीट्यूट, कलकत्ता. १९७२

अन्यग्रन्थाः


- An Introduction to Indian Philosophy, Datta and Catterjee, University of Calcuta, Frifth Edition-1939
- कालिप्रसादसिह्विरचितः न्ययदर्शनविमर्शः, संस्कृतबुकडिपो, विधानसरणी कालिकाता. प्रथमसंस्करणम्-१९८०।
- केशवमिश्रविरचिता तर्कभाषा, हिन्दी व्या० आचार्यः विश्वेश्वरः, चौखम्बासुरभारतीभवनम्, वाराणसी. द्वदशसंस्करणम्, विक्रमसंवत्सरः-१९५३।
- कौण्डभट्टविरचितः वैयाकरणभूषणसारः (दर्पणव्याख्यासंवलितः), सम्पादकः-चन्द्रप्रकाशद्विवेदी, चौखम्बासंस्कृतप्रतिष्ठानम्, वाराणसी. द्वितीयसंस्करणम्-१९९९।
- जगदीशमिश्र, भारतीयदर्शनम्, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी. प्रथमसंस्करणम्-२०१०
- जगदीशतर्कालङ्कार, तर्कामृतम् (चषकव्याख्या एवं चषकतात्पर्यटीकाव्याख्यासमेतम्), सम्पादकः प्रो०पीयूषकान्तदीक्षितः, नागपब्लिशर्स, प्रथमसंस्करणम्।
- जगदीशतर्कालङ्कार शब्दशक्तिप्रकाशिका, (कृष्णकान्तीटीकासहिता), चौखम्बा संस्कृतसंस्थानम्, वाराणसी. पुनर्मुद्रितम्-२०१०।
- जैनिनिविरचितं मीमांसादिग्दर्शनम्, सोमनाथः नेने , मोतीलालबनारसीदासः, वाराणसी, प्रथमसंस्करणम्-२००६।
- उपाध्याय, बलदेव, भारतीयदर्शनस्य रूपरेखा, चौखम्बासंस्कृतपब्लिसर्सः, दिल्ली. संस्करणम्-१९९९।

* उपाध्याय, बलदेव, संस्कृतवाङ्मयस्य बृहदितिहासः, उत्तरप्रदेशसंस्कृतसंस्थानम्, प्रथसंस्करणम्-१९९९।

द्वितीयकस्रोतांसि-

* Barthakuria Apurb Chandra, The Philosophy Of Sanskrit Grammar (A Critical Study of Karaka), Punthi Pustak, Culcutta. 1997
* Ganeri, Janardon, Artha, Oxford University Press, New Delhi. 2006
* John, Grimes, An Advait Vedanta Perspective on Language, Shri Satguru Publications, Delhi. 1991
* Kumar, Shashiprabha and Others, Saskrit and Other Indian Languages, D.K. Printeorld, New Delhi. 2007
* O.H. de A. Wijesekera, Syntax of the Cases in the Pali Nikayas, The Postgraduate Institute of Pali and Buddhist Studies, University of Kelaniya Sri Lanka. 1993
* Oberlies, Thomas, Pali: A Grammar of the Thervavda Tipitaka, Walter de Gruyter, Berlin. 2001
* Hans Henrich Hock, Sanskrit syntax, D.K. Printworld, Delhi. 2015
* आचार्य उपाध्याय, बलदेव संस्कृतशास्त्रों का इतिहास, चौखम्बा विद्याभवन, वाराणसी, प्रथमसंस्करण-२०१०
* चतुर्वेदी, आचार्य सीताराम, वाग्विज्ञान (भाषाशास्त्र), चौखम्बा विद्याभवन, वाराणसी. १९७९
* चोकसी, कमलेशकुमार छ. पाणिनीय व्याकरणपरम्परामां कारकमीमांसा, चोकसी, कमलेशकुमार, अहमदाबाद. २००१
* जैन फूलचन्द प्रेमी, प्राकृत भाषा विमर्श, भोगिलाल लहेरचन्द इन्स्टीट्यूट ऑफ इण्डोलॉजी, दिल्ली. २०१३
* झा, कलानाथ, कारकर्शदनम्, चौखम्बा विद्याभवन, वाराणसी. १९६९

- बोरा, राजमल, भारत की प्राचीन भाषाएँ, हिन्दी माध्यम कार्यान्वय निदेशालय दिल्ली विश्वविद्यालय, दिल्ली. १९९९
- मिश्र, हरिराम, व्याकरणतन्त्र का काव्यशास्त्र पर प्रभाव, ईस्टर्न बुक लिंकर्स , दिल्ली, १९९७
- मीमांसक श्रीयुधिष्ठिर, संस्कृतव्याकरण शास्त्र का इतिहास, सम्पादक- रामनाथ त्रिपाठी शास्त्री
- शर्मा, देवीदत्त, संस्कृत का ऐतिहासिक एवं संरचनात्मक विकास, हरियाणा साहित्य अकादमी चण्डीगढ. १९१९५
- शास्त्री, इन्द्र चन्द्र, पालि भाषा और सहित्य, हिन्दी माध्यम कार्यान्वय निदेशालय दिल्ली विश्वविद्यालय, दिल्ली. २०१०


कोशग्रन्थाः-


- Encyclopaedia of Indian Philosophies, (Vol. V): The Philosophy of the Grammarians, ed. Coward, Harold, G. and K. Kunjunni Raja, Motilal Benarasidas, Delhi. 1990
- अमरकोशः, अमरसिंहः, निर्णयसागरमुद्राणालयः, मुम्बई.१९६१
- शब्दकल्पद्रुमः(पञ्चमः भागः), चौखम्बासंस्कृतग्रन्थमाला, ग्रं.सं ९३, वाराणसी.१९६७


शोधप्रबन्धाः


- Deokar, Mahesh Ashok, A Comparative Study of The Paninian Grammatical Tradition and The Three Grammars of Pali, Dept. Of Sanskrit and Pali Languages, University of Poona. 2003

- Phrmha, Tahib Malai, Kaccayana Vyakarana: A critical Study, Dept. Of Sanskrit and Pali Languages, University of Poona. 1997
- Tripathi, Dhar, Autonomy of Language: A Comparative and Critical Study with reference to Patanjali Bhartrhari, Wittgenstein & Chomsky, Philosophy Department, University of North Bengal, Darjeeling. 2008
- सिंह, हरदीप, कातन्त्र व्याकरण और पाणिनीय व्याकरण का तुलनात्मक अध्ययन, संस्कृत विभाग, पंजाब विश्वविद्यालय, चण्डीगढ. २०१२